भङ्गाद्यभिधानमुखेन स्थायित्वानुकूलवेदनीयत्वानुगतसर्व्वस-
त्यत्वभ्रमव्यावर्त्तनेन सर्व्वशून्यतायामेव पर्य्यवसानम् ।
अतस्तत्त्वं सदसदुभयानुभवात्मकचतुष्कोटिविनिर्म्मुक्तं शून्य-
मेव । तथाहि यदि घटादेः सत्त्वं स्वभावस्तर्हि कारकव्यापार
वैयर्थ्यम् । असत्त्वं स्वभाव इति पक्षे प्राचीन एव दोषः प्रादु-
ष्यात् ॥ १८ ॥

सबहीके पक्षमें संसार दुःखकर यही सर्व्वसम्मत पक्ष है । अन्यथा संसारनिवृत्तिसमु-
त्सुकलोगोंके संसारनिवृत्तिके उपायमें प्रवृत्तिकी उपपत्ति होतीहै अतएव सब संसार दुःख
जनक है यही भावना करनी होगी इसविषयमें यदि कोई जिज्ञासा करे जो संसार किसकी
नाईं दुःखजनक करताहै? इसमें दृष्टान्त कहना आवश्यक है सो नहीं । स्वलक्षन क्षणके क्ष-
णिकत्व हेतु से लक्षणका अभाव है अर्थात् सदृशाभाव प्रयुक्त दृष्टान्तका देना असम्भव
है संसारमें जिसप्रकार दुःखभोग होताहै इसप्रकार दुःखका अन्यत्र सम्भव नहीं कहकर
दृष्टान्तप्रदर्शनद्वारा सांसारिक दुःखका प्रकाश होसकताहै । अतएव जिसका कोई लक्षण नहीं
उसको उसीके रूपमें भावना करनी चाहिये—जिसप्रकार शून्यको शून्यस्वरूपही ज्ञान करना
पड़ता है । मैं स्वप्न [illegible]में या जागरणमें रजतादि नहीं देखताहूं इसस्थानमेंभी विशिष्ट निषेधका अवग-

पहै। और यदि दृष्ट पदार्थ ही सत् होता है तो उससे विशिष्ट कहे दर्शन होनेहीसे उसके अधिष्ठानका एवं उस अधिष्ठानमें अधिष्ठित रजतादि और तत् सम्बंध समवायादि सत्ता जानी जाती है, इसको कोई वादीभी स्वीकार नहीं करता । और अर्द्धजरती मतसे भी उचित नहीं, जिसकारण कुक्कुटका एक भाग पाकार्थ एवं अपर भाग प्रसवार्थ इसप्रकार कल्पना नहीं किया जाती । अतएव अध्यस्त, अधिष्ठान और उसका सम्बन्ध दर्शन द्रष्टा आदिके मध्यमें एक या अनेककी सत्तामें बलपूर्व्वक सबकी असत्ताकी आपत्ति होती है । भगवद्बुद्धि विषयमें भी उत्तम प्राज्ञ माध्यमिक लोगोंने भी इसी प्रकार कहा है । क्षणभङ्गादि कथनद्वारा स्थायित्वानुकूल ज्ञातव्यार्थानुगत सब पदार्थही सत्यत्वके भयके व्यावर्त्तन हेतु सर्व शून्यताही पर्य्यवसित होताहै । इसलिये तत्त्वही सत् और असत् यही उभयात्मक वास्तविक वह शून्य है । यदि घटादिका सत्त्वही स्वभाव होता तो कर्त्तादि कारक व्यापार व्यर्थ होता है और असत् स्वभाव पक्षमें भी प्राचीन दोषका प्रादुर्भाव होजाताहै ॥ १५ ॥

यथोक्तम्--न सतः कारणापेक्षा व्योमादेरिव युज्यते । कार्य्यस्यासम्भवो हेतुः खपुष्पादेरिवासत इति ॥ विरोधादितरौ पक्षावनुपपन्नौ तदुक्तं भगवतालङ्कावतारे--बुद्ध्या विविच्यमानानां स्वभावो नावधार्य्यते । अतो निरभिलप्यास्ते निःस्वभावाश्च दर्शिता इति ॥ इदं वस्तु बलायातं यद् वदन्ति विपश्चितः । यथा यथार्थाश्चिन्त्यंते विशीर्य्यन्ते तथा तथेति च ॥ न क्वचिदपि पक्षे व्यवतिष्ठत इत्यर्थः दृष्टार्थव्यवहारश्च न स्वप्नव्यवहारवत् संवृत्त्या सङ्गच्छते ॥ अत एवोक्तम्--परिव्राट् कामुकशुनामेकस्यां प्रमदातनौ । कुणपः कामिनी भक्ष्य इति तिस्रो विकल्पना इति ॥ १६ ॥

दूसरे शास्त्रमें कहा है कि, जिस प्रकार आकाशादिकी कारणकी अपेक्षा नहीं उसी प्रकार सत्पदार्थकी कारणापेक्षा युक्त नहीं होती । और जिस प्रकार आकाश पुष्पका कार्य्य असम्भव है, उसीप्रकार असत्पदार्थका अभाव हेतु है उसका कार्य्य असम्भव जानना । और विरोध हेतु अन्य दोनोंपक्ष अनुपपन्न होते है, भगवानने लङ्कावतारमें कहाहै जो, बुद्धिद्वारा विविच्यमान पदार्थका स्वभाव अवधारण नहीं किया जाता इसलिये सबपदार्थोंका कोई स्वभाव नहीं है यही जानाजाताहै । और यह यही वस्तु है

पण्डितलोग बलपूर्वक यह बात कहते हैं । जिस कारण जिस २ स्थानमें वस्तुका निश्चय होजाताहै, उसी २ स्थानमें वे सब शीर्ण (नाश) होते हैं, सुतरां वस्तुकी सत्ताही असम्भव होती है । दृष्टार्थ व्यवहार भी वृत्तिक्रममें सङ्गत नहीं होता । अतएव कहाहै जो परिव्राजक कामुक और कुक्कुट ये सबही एक प्रमदाशरीरमें समासक्त है परन्तु इन सबके प्रकार भेद है ॥ १६ ॥

तदेवं भावनाचतुष्टयवशान्निखिलवासनानिवृत्तौ परनिर्व्वाणं शून्यरूपं सेत्स्यतीति वयं कृतार्थाः नास्माकमुपदेश्यं किञ्चिदस्तीति । शिष्यैस्तावद्योगश्चाचारश्चेति द्वयं करणीयम् । तत्राप्राप्तस्यार्थस्य प्राप्तये पर्य्यनुयोगो योगः गुरूक्तस्यार्थस्याङ्गीकरणमाचारः गुरूक्तस्याङ्गीकरणादुत्तमाः पर्यनुयोगस्याकरणादधमाश्च अतस्तेषां माध्यमिका इति प्रसिद्धिः । गुरूक्तभावनाचतुष्टयं बाह्यार्थस्य शून्यत्वञ्चाङ्गीकृत्यान्तरस्य शून्यत्वञ्चाङ्गीकृतं कथमिति पर्य्यनुयोगस्य करणात् केषाञ्चिद् योगाचारप्रथा । एषा हि तेषां परिभाषा स्वयं वेदनं तावदङ्गीकार्य्यमन्यथा जगदान्ध्यं प्रसज्येत । तत् कीर्तितं धर्म्मकीर्त्तिना ॥ १७ ॥

तब चारों भावनाओंके कारण निखिल वासनाकी निवृत्ति होनेसे जो परम मोक्षपद लाभ होता है. वहभी शून्यरूपमें सिद्ध होता है इस समय हमही लोग कृतार्थ हुए, हमलोगोंका और कुछ उपदेश नही किन्तु शिष्यगण योग और आचार येही दो कार्य्य करेंगे अप्राप्त वस्तुकी प्राप्तिके लिये जो पर्य्यनुयोग उसीको योग कहते हैं, और गुरु जो कहते हैं, उसीका स्वीकार करना आचार है । जो लोग गुरुका उपदेश ग्रहण करते हैं वही लोग उत्तमाधिकारी हैं और जो लोग योगानुष्ठान नही करते वे लोग अधम अधिकारी हैं । अतएव माध्यमिकाधिकारी प्रसिद्धही है गुरूक्त भावना चतुष्टय और शून्यता स्वीकार करनेपर आन्तरिक की शून्यता किस प्रकार स्वीकृत होसकती ? योगाचरण हेतु किस २ व्यक्तिकी योगाचरण प्रथा प्रसिद्ध हुई है । यह उनकी परिभाषामात्र है । स्वयं ज्ञानही उन सबके स्वीकार करने योग्य है. अन्यथा जगत्‌हीकी अन्धता प्रसङ्ग हो उठेगी । यही धर्म्मकीर्ति मानवगणने कीर्त्तन किया है ॥ १७ ॥

प्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यतीति । बाह्यं ग्राह्यं नोपपद्यत एव विकल्पानुपपत्तेः । अर्थो ज्ञानग्राह्यो भावादुत्पन्नो भवति अनुत्पन्नो वा । न पूर्व्वः उत्पन्नस्य स्थित्यभावात् नापरः अनुत्पन्न-

स्यासत्त्वात् । अथ मन्येथाः अतीत एवार्थो ज्ञानग्राह्यः तज्जनकत्वादिति तदपि बालभाषितं वर्त्तमानतावभासविरोधात् इन्द्रियादेरपि ग्राह्यत्वप्रसङ्गाच्च ॥ १८ ॥

और अप्रत्यक्षीभूत पदार्थकी अर्थदृष्टि प्रसिद्ध नहीं जिसकारण बाह्यपदार्थ ग्राह्य है या अग्राह्य? इसप्रकार विकल्पकी उपपत्ति असम्भवहै । ज्ञानग्राह्य क्या भावपदार्थसे उत्पन्न होताहै या अभावजन्य ? इसमें कहना यही है जो ज्ञानग्राह्य अर्थ भावपदार्थसे उत्पन्न होता है यह नहीं कहाजाता कारण यह है जो उत्पन्न पदार्थकी स्थिति नहीं । और अभावजन्य यहभी नहीं हो सकताहै; जिसकारण अनुत्पन्नकी सत्ता असम्भव नही यदि यही ज्ञान करोजो तज्जनकत्वहेतु भूतअर्थही ज्ञानग्राह्य है तो यहभी बालकका वाक्यहै जिसहेतु अतीतार्थकी वर्त्तमानताका विरोध है एवं इन्द्रियादिकाभी ग्राह्यात्वप्रसङ्ग होताहै । इसलिये अतीतार्थज्ञान ग्राह्य होसकताहै ॥ १८ ॥

किञ्च ग्राह्यः किं परमाणुरूपोऽर्थः अवयविरूपो वा । न चरमः कृत्स्नैकदेशविकल्पादिना तन्निराकरणात् । न प्रथमः अतीन्द्रियत्वात् षट्केन युगपद्योगस्य बाधकत्वाच्च । यथोक्तम्—षट्केन युगपद्योगात् परमाणोः षडंशता । तेषां मध्येकदेशत्वे पिण्डः स्यादणुमात्रक इति ॥ तस्मात् स्वव्यतिरिक्तग्राह्यविरहात्तदात्मिका बुद्धिस्स्वयमेव स्वात्मरूप प्रकाशिका प्रकाशवदितिसिद्धम् । तदुक्तम्—नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः । ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशत इति ॥ १९ ॥

दूसरा पक्ष कहते हैं:—परमाणुरूप ही क्या अर्थ ग्रहण होता है अथवा अवयवरूपमें अर्थग्रहण होताहै ? इसमें वक्तव्य यहहै जो अवयवरूपमें अर्थग्रहण होताहै, यह कहा नहीं जाता कारण यह है जो सबपदार्थका क्या एकदेशका ज्ञान होताहै? इसप्रकार विकल्पद्वाराही उसका निरास होताहै । और परमाणुरूपसे अर्थग्रहण होताहै यह सम्भव नहीं । जिसकारण परमाणु अतीन्द्रिय वह ग्राह्य नहीं होसकता एव षट् पदार्थका एकदा योगमें बाधक है ग्रन्थान्तरमें कहाहै जो छःपदार्थका एकदा योग स्वीकार करनेपर परमाणुकोभी छः अंश होसकते और उन सबका एकदेशमात्र कहनेसे पिण्डभी अणुमात्र होजाताहै । अतएव स्वव्यतिरिक्तमें ग्राह्य नहीं होसकता सुतरां तदात्मरूप बुद्धि स्वयही आत्मरूपमें प्रकाश पातीहै । जिसप्र-

कार प्रकाश अपनेआप बढ़ताहै उसीप्रकार वस्तुविषयक बुद्धि भी स्वय प्रकाशित हो जाती है इसी विषयमें कहा है जो बुद्धिका दूसरा अनुभवनीय नहीं एवं बुद्धिका भी अपर अनुभव असम्भवहै तो ग्राह्य और ग्राहककी विचित्रता वशात् स्वयं बुद्धि प्रकाश पाती है ॥ १९॥

ग्राह्यग्राहकयोरभेदश्चानुमातव्यः यद्वेद्यते येन वेदनेन तत्ततो न भिद्यते यथा ज्ञानेनात्मा। वेद्यन्ते तैश्च नीलादयः। भेदे हि सत्य-धुना अनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नियम हेतोरभावात्तदुत्पत्तेरनियामकत्वात् यश्चायं ग्राह्यग्राहकसंवि-त्तीनां पृथगवभासः स एकस्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः । अत्राप्यनादिरविच्छिन्नप्रवाहभेदवासनैव निमित्तम् । यथोक्तम्--सहोपलम्भनियमादभेदो नीलतद्धियोः । भेदश्च भ्रा-न्तिविज्ञानैर्दृश्येतेन्दाविवाद्वय इति ॥ अविभागोऽपि बुद्ध्यात्मा विपर्य्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यत इति च ॥ न च रसवीर्य्यविपाकादिसमानमाशामोदकोपार्जित मोदकानां स्यादिति वेदितव्यं वस्तुतो वेद्यवेदकाकारविधु-राया अपि बुद्धेर्व्यवहर्त्तृपरिज्ञानानुरोधेन विभिन्नग्राह्यग्राह-काकाररूपवत्तया तिमिराद्युपहताक्ष्णां केशेन्द्रनाडीज्ञाना भेद-वदनाद्युपप्लववासनासामर्थ्याद्व्यवस्थोपपत्तेः पर्यनुयो गात् । यथोक्तम्--अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते । विभक्त-लक्षणग्राह्यग्राहकाकारविप्लवा ॥ तथा कृतव्यवस्थेयं केशा-दिज्ञानभेदवत् । यदा तदा न सञ्चोद्या ग्राह्यग्राहकलक्षणेति ॥ तस्मद्बुद्धिरेवानादिवासनावशादनेकाकारवभासत इति सिद्ध-म् । ततश्च प्रागुक्तभावनाप्रचयबलान्निखिलवासनोच्छेदविगलि-तविविधविषयाकारोपप्लवविशुद्धविज्ञानोदयो महोदय इति॥२०॥

और ग्राह्य और ग्राहक इन्ही दोनोंके अभेद हेतु यही अनुमान किया जासकता जो, वही ज्ञानान्तर भी ज्ञानद्वारा उसका भेदज्ञान होता नहीं जिसप्रकार ज्ञानद्वार

आत्माको जान सकते एवं नीलादि भी परिज्ञात होजाताहै । यदि भेदज्ञान रहताहै तो अधुना अर्थका सम्बन्ध नहींहोता । जिसकारण तादात्म्यके नियमहेतु अभावप्रयुक्त उसकी उत्पत्तिकी नियामकता है । इसप्रकार जो ग्राह्य और ग्राहक ज्ञानका पृथक्प्रकाश होताहै वह एक चन्द्रमामें द्वित्व (दो) ज्ञानकी नाई भ्रम मात्रजानना । वस्तुतः इसविषयमें अनादि अविच्छिन्न प्रवाहभेदवासनाही निमित्त है । शास्त्रान्तरमें कहाहै जो, एकत्र ज्ञानकी उपलब्धिका नियम होनेपर नीलपदार्थ और उसकी बुद्धि इन सबका अभेद होताहै । और इसका जो भेदज्ञान वह एक चन्द्रमामें दो चन्द्रमाके ज्ञानकी नाई भ्रान्ति जानना । और जो लोग विपरीतदर्शी हैं उनलोगोंके पक्षमें बुद्धि औरआत्माका अविभागग्राह्यग्राहक ज्ञानका भेद निशिष्टकी नाई लक्षित होताहै और रसवीर्य्य विपाकादि आशारूपी लड्डुके तुल्य नहीं है । यही जानना होगा । वास्तविक बुद्धि वेद्य और वेदन कर्त्ताके अधीनहै व्यवहार कर्त्ताके परिज्ञानानुरोधसे विभिन्न ग्राह्य और ग्राहकाकार रूपकताहै । जिसप्रकार जिनलोगोंके चक्षु अन्धकारादिद्वारा उपहत हुआहै । उन सबका केश इन्द्रिय और नाडी इन सबका अभेदज्ञान होताहै उसीप्रकार अनादि उपप्लव (उत्पात) वासना सामर्थ्यादिकी उपपत्ति है दूसरे शास्त्रमें कहाहै जो, जिसप्रकार भ्रान्तव्यक्ति गण प्रकृत (असल) अर्थ न जानकर भी जानते हैं ऐसा ज्ञानकरते हैं एव ग्राह्य और ग्राहक विभाग नही कर सकते उसीप्रकार बुद्धिकी व्यवस्था जाननी । उपहत चक्षु व्यक्तिका केशादि ज्ञानभेदकी नाई ग्राह्य ग्राहक लक्षण वक्तव्य नहीं है अतएव जाना जाता है जो बुद्धि अनादि वासना वशात अनेक रूपमें प्रकाश होतीहै । इसी कारण पूर्वोक्त भावना समूह वशसे वासनाका उच्छेद होकर बुद्धिकी विविध . (निवृत्ति होनेपर जो विशुद्ध ज्ञानोदय होता है । उसीको महोदय कहकर .त है ॥ २० ॥

अन्येतु मन्यन्ते यथोक्तं बाह्यं वस्तुजातं नास्तीति तदयुक्तं प्रमाणाभावात् । न च सहोपलम्भ नियमः प्रमाणमिति वक्तव्यं वेद्यवेदकयोरभेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्धविपक्षव्यावृत्तिकत्वात् । ननु भेदे सहोपलम्भनियमात्मकं साधनं न स्यादिति चेन्न । ज्ञानस्यान्तर्मुखतया च भेदेन प्रतिभासमानतया एकदेशत्वैककालत्वलक्षणसहत्वनियमासम्भवाच्च नीलाद्यर्थस्य ज्ञानाकारत्वे अहमिति प्रतिभासः स्यात् नत्विदमिति प्रतिपत्तिः प्रत्ययादव्यतिरेकात् । अथोच्यते ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्वद्भेदेन प्रतिभासत

इति न च तत्राहमुल्लेख इति । तथोक्तम्--परिच्छेदान्तराद्योयं भागो बहिरिव स्थितः । ज्ञानस्याभेदिनो भेदप्रतिभासोऽप्युपप्लव इति । यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासत इति च ॥ २१ ॥

अन्यान्य वादी लोग यही विवेचना करते हैं जो बाह्य वस्तुसमूह नहीं यह युक्तियुक्त मत नहीं है, जिसकारण बाह्य पदार्थ नहीं इस विषयमें कोई प्रमाण नहीं दीखता । यहभी नहीं कहा जासकता, जो सहोपलब्धिही प्रमाणरूपसे विद्यमान है । कारण यह है जो वेद्य और वेदक इन्हीं दोनोंके अभेदकत्वमें अभिमत उपलब्धिका सन्देह होताहै जिसकरण विपक्षीगण उसकी निवृत्ति करते हैं । यदि कहो जो भेद विषयमें सहोपलब्धि नियममें प्रयोजन साधन नहीं होताहै । सो नहीं कारण यह है जो ज्ञानके आन्तरिकत्व प्रयुक्त भेदरूपसे प्रतिभासमान होताहै; सुतरां एकदेशकत्व और एककालत्व लक्षणमें सहोपलब्धिनियमका सम्भव नहीं । नीलादि अर्थका ज्ञानाकारकत्व होनेहीसे " अहं " इसप्रकार प्रतिभास होसकताहै किन्तु " इदं " यही ज्ञान प्रत्ययके अव्यतिरिक्त नही । इसविषयमें यही कहाजासकता जो ज्ञानस्वरूप और नीलाकार केवल भ्रान्तिक्रमसे बाह्यपदार्थकी नाई भेदरूपसे प्रतीयमान होताहै किन्तु उसस्थलमें अहंशब्दका उल्लेख नही । शास्त्रान्तरमें कहाहै ,जो इसप्रकार विभाग परिच्छेदान्तरका आद्य यह बाह्यपदार्थकी नाई अवस्थित है । अभेदज्ञानका जो भेद प्रतिभास वह निर्दुष्ट नही । और ज्ञानका जो अन्तरिकत्व वहभी बाह्यपदार्थकी नाई प्रतीयमान होताहै ॥ २१ ॥

तदयुक्तं बाह्यार्थाभावे तदुत्पत्तिरहिततया बहिर्वदित्युपमानोक्तेरयुक्तेः।न हि वसुमित्रो वन्ध्यापुत्रवदभासत इति प्रेक्षावानाचक्षीत। भेदप्रतिभासस्य भ्रान्तत्वे अभेदप्रतिभासस्य प्रामाण्यम् । तत् प्रामाण्ये च भेदप्रतिभासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गाच्च अविसंवादान्नीलतादिकमेव संविदाना बाह्यमेवोपाददते जगत्युपेक्षन्तेऽन्तरमिति व्यवस्थादर्शनाच्च । एवञ्चायमभेदसाधको हेतुर्गोमयपायसीयन्यायवदाभासतां भजेत । अतो बहिर्वदिति वदता बाह्यं ग्राह्यमेवेति भावनीयमिति भवदीय एव बाणो भवन्तं प्रहरेत ॥ २२ ॥

और बाह्य पदार्थके न माननेसे उन सबकी उत्पत्तिरहित होनेसे " बाह्यपदार्थकी नाई " इस उपमाका देना युक्तिहीन होता है । भेदज्ञान भ्रान्त होनेसे अभेद प्रतिभासका प्रमाण्य होता है । और इसके प्रमाण्य होनेपर भेदप्रतिभासको भ्रान्त कहाजाता है । सुतरां अन्यो-

न्याश्रयदोषका प्रसङ्ग होताहै; परन्तु नीलत्वादिविषयमें कोई विवादही नहीं । ऐसा होनेसे अभेद साधक गोमयपायसीयन्यायकी नाईं अभासनाभागी होसकता है । इसलिये बाह्यपदार्थकी नाईं यह कारण कहकर बाह्यपदार्थ ग्राह्यहै यहभावना करनी चाहिये, इसलिये तुम लोगोंकी रूपवतीवाद तुमही लोगोंको मारतीहै ॥ २२ ॥

ननु ज्ञानाभिन्नकालस्यार्थस्य बाह्यत्वमनुपपन्नमिति चेत्तदनुपपन्नम् । इन्द्रियसन्निकृष्टस्य विषयस्योत्पाद्ये ज्ञाने स्वाकारसमर्पकतया समर्पितेन चाकारेण तस्यार्थस्यानुमेयतोपपत्तेः । अतएव पर्य्यनुयोगपरिहारौ समग्राहिषाताम्—

भिन्नकालं कथं ग्राह्यमिति चेत् ग्राह्यतां विदुः ।
हेतुत्वमेव च व्यक्तेर्ज्ञानाकारार्पणक्षममिति ॥

तथाच, यथा पुष्ट्या भोजनमनुमीयते यथा च भाषया देशः यथा वा सम्भ्रमेण स्नेहः, तथा ज्ञानाकारेण ज्ञेयमनुमेयं तदुक्तम्,

अर्द्धेन घटयत्येनां नहि मुक्त्वार्द्धरूपताम् ।
तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपतेति ॥ २३ ॥

यदि कहो कि ज्ञानसे अभिन्न कार्य्यकालार्थ—का बाह्यत्व अनुपपन्न हुआ इसकी भी उपपत्ति है इन्द्रिय संनिकृष्टता विषयका ज्ञानहोनेसे स्वीय आकारकी समर्पकता वशतः समर्पित आकारके अनुसार उस अर्थका अनुमान होताहै अत एव पर्य्यनुयोग और परिहार ग्रहणकियाहै। इस विषयका प्राचीन उपदेशहै जो भिन्नकाल किसप्रकार ग्रहणकिया जासकता? इस आशङ्काम कहाहै जो व्यक्तिका हेतुत्वही ज्ञानाकार समर्पणमें सक्षम होता है । इस समय यह जानाजाता है कि जिसप्रकार पुष्टिद्वारा भोजनका अनुमान कियाजाताहै । उसीप्रकार ज्ञानाकारमें ज्ञेयपदार्थका अनुमान होताहै । इस विषयमें शास्त्रान्तरका वचनहै जो कभीभी आधेका छोडकर आधेसे कार्य नहीं घटसकता अत एव प्रमेयरूपताही प्रमेयका अधिगमविषयमें कारणहै ॥ २३ ॥

न हि वित्तिसत्तैव तद्वेदना युक्ता तस्याः सर्वत्राविशेषात् । तान्तु सारूप्यमाविशत् सरूपयितुं घटयेदिति च । तथाच बाह्यार्थसद्भावे प्रयोगः ये यस्मिन् सत्यपि कादाचित्काः ते सर्वे तदतिरिक्तसापेक्षाः । यथा अविवक्षति अजिगमिषति मयि वचन गमनप्रतिभासा विवक्षुजिगमिषुपुरुषान्तरसन्तानसापेक्षाः ।

तथाच विवादाध्यासिताः प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञाने कदाचित्कैव नीलाद्युल्लेखना इति । तत्रालयविज्ञानं नामाहमास्पदं विज्ञानं, नीलाद्युल्लेखि च प्रवृत्तिविज्ञानम् । यथोक्तम्—

तत् स्यादालयविज्ञानं यद् भवेदहमास्पदम् ।
तत् स्यात् प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेदिति ॥२४॥

और ज्ञानसत्ताही जो ज्ञान है यहभी युक्त नहीं होता जिसकारण ज्ञानसत्ताका सर्वत्रही अविशेष देखाजाताहै । इस ज्ञानसत्ताकी समानरूपता मवेशहै उसमें भी समानरूपता संघटित करसकतीहै सुतरां जानपड़ताहै जो बाह्यसद्भवही प्रयोग होताहै । जो सबपदार्थ जिसकी सत्तामें कदाचित् उपपन्नहोताहै । वे ही पदार्थ उसके अतिरिक्तपदार्थकी अपेक्षा रहतीहै । जैसे अविविक्षति और अजिगामिषति इनदोनोंपदोंमें वचन और गमन प्रतिषेध प्रतीयमान होतेहैं । परन्तु वचनेच्छु और गमनेच्छु व्यक्ति पुरुषान्तरकी अपेक्षाकरताहै; सुतरां इस समय प्रवृत्ति प्रत्यय विवादास्पद ही हुआ । आलयपरिज्ञान सत्त्वही कदाचित् नीलादिका उल्लेख होताहै । इस समय आलयविज्ञानही " अहं " इत्याकारज्ञानका आस्पद एवं वह भी ज्ञानस्वरूप और प्रवृत्ति विज्ञानभी नीलादि उल्लेखकरना पडताहै । इस विषयमें कहाहै जो जिसको अहंज्ञानका आस्पद वही आलयविज्ञान और प्रवृत्तिविज्ञान जिसमें नीलादिका उल्लेख होताहै ॥ २४ ॥

तस्मादालयविज्ञानसन्तानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुर्बाह्योऽर्थो ग्राह्य एव, न वासनापरिपाकप्रत्ययः कादाचित्कत्वात् कदाचिदुत्पाद इति वेदितव्यम् । विज्ञानवादिनये हि वासनानामेकसन्तानवर्त्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिजननशक्तिः तस्याश्च स्वकार्य्योत्पादं प्रत्याभिमुखं परिपाकः तस्य च प्रत्ययः कारणं स्वसन्तानवर्त्तिपूर्वक्षणः कक्षीक्रियते सन्तानान्तरनिबन्धनत्वानङ्गीकारात् । ततश्च प्रवृत्तिज्ञानजननालयविज्ञानवर्त्तिवासनापरिपाकं प्रति सर्वेऽप्यालयविज्ञानवर्त्तिनः क्षणाः समर्था एवेति वक्तव्यम् । न चेदेकोऽपि न समर्थः स्यादालयविज्ञानसन्तानवर्त्तित्वाविशेषात् सर्वे समर्था इति पक्षे कार्य्यक्षेपानुपपत्तिः । ततश्च कादाचित्कत्वनिर्वाहाय शब्दस्पर्शरूपरसगन्धविषयाः सुखादिविषयाः षडपि प्रत्ययाश्चतुरः

प्रत्ययान् प्रतीत्योत्पद्यन्ते इति चतुरेणानिच्छताप्यच्छमतिना स्वानुभवमनाच्छाद्य परिच्छेत्तव्यम् । ते चत्वारः प्रत्ययाः प्रसिद्धाः, आलम्बनसमनन्तरसहकार्य्यधिपतिरूपाः । तत्र ज्ञानपदवेदनीयस्य नीलाद्यवभासस्य चित्तस्य नीलालम्बनप्रत्ययात् नीलाकारता भवति, समनन्तरप्रत्ययात् प्राचीनज्ञानाद् बोधरूपता, सहकारिप्रत्ययादालोकात् चक्षुषोऽधिपतिप्रत्ययाद्विषयग्रहणप्रतिनियमाः, विदितस्य ज्ञानस्य रसादिसाधारण्यप्राप्तेर्नियामकं चक्षुरधिपतिर्भवितुमर्हति लोके नियामकस्याधिपतित्वोपलम्भात् । एवं चित्तचैत्तात्मकानां सुखादीनां चत्वारि कारणानि द्रष्टव्यानि । एवं चित्तचैत्तात्मकस्कन्धः पञ्चविधः रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकः तत्र रूप्यन्त एभिर्विषया इति व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः, आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः, प्रागुक्तस्कन्धद्वयसम्बन्धजन्यः सुखदुःखादिप्रत्ययप्रवाहो वेदनास्कन्धः, गौरित्यादिशब्दोल्लेखिसंविज्ञानप्रवाहः संज्ञास्कन्धः, वेदनास्कन्धनिबन्धना रागद्वेषादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्माधर्मौ च संस्कारस्कन्धः ॥ २९ ॥

पूर्व्वोक्त कारणोंसे बोध होताहै जो आलयविज्ञान समूहके विना जो कदाचित् प्रवृत्तिविज्ञानका कारणहै, वही बाह्यअर्थहै किन्तु वह ग्राह्य नही होता, परन्तु यह बाह्यार्थवासना परिपाकजन्यहै जिसकारण यह बाह्यार्थ कदाचित् उत्पन्न होताहै यही जानना चाहिये । विज्ञानवादीके मतमें एक सन्तानवर्त्ति वासनासमूहही आलयविज्ञानहै । उनसबकी [illegible] जनकशक्तिहै एवं उस शक्तिका [illegible] उत्पादन करनेमें अभिमुख्यहै, वही परिपाक, प्रत्ययही इस परिपाकका कारण है इसमें स्वीय प्रवाहवर्त्ती पूर्वक्षणकी रक्षा कियी जातीहै, जिस कारण अपने प्रवाहके पीछे [illegible] वह आलयविज्ञानवर्त्ती वासना निबन्धनत्वका स्वीकार नहीं । अत एव प्रवृत्तिज्ञानजननहेतु वह आलयविज्ञानवर्त्ती वासना [illegible] । यदि कहो परिपाकके प्रति सब आलयविज्ञानवर्त्ती क्षणही समर्थ है, यह कहना चाहिये । [illegible] एकक्षणभी समर्थ नहीं, सो कहा नही जासकता, कारण यह है जो, आलयविज्ञान प्रवाहवर्त्ति- त्वमें कोई विशेष नहीं । सब ही क्षणसमर्थ इस पक्षमें भी कार्य्यताकी अनुपपत्ति होतीहै

इस निमित्त ज्ञानका कदाचित्कत्व निर्वाहार्थ शब्द, स्पर्श, रूप, रस, और गन्धका विषय सब, सुखादिका विषय एवं छः प्रकारका प्रत्यक्ष यह समुदाय चारप्रकारके प्रत्ययके अन्तर्गत होकर उत्पन्न होता है । यह निर्मलबुद्धि पण्डित लोग कहते हैं । उक्त चार प्रकारके प्रत्यय ही प्रसिद्ध हैं । ये अवलम्बन समनन्तर सहकारी और अधिपतिरूप, उक्त प्रत्यय चतुष्टयमें अवलम्बन प्रत्ययसे ज्ञानपद प्रतिपाद्य नीलादिका अवभास विशिष्ट चित्तका नीलावलम्बन प्रत्ययहेतु नीलाकारता होतीहै । समनन्तर प्रत्ययसे प्राचीनज्ञानहेतु बोधरूपता उत्पन्न होती है, सहकारी प्रत्ययसे आलोक हेतु चक्षुका कार्य्य होताहै एवं अधिपतिप्रत्ययसे विषय ग्रहणका नियम होता है । ज्ञानका रसादि साधारण्य प्राप्तिका नियामक चक्षुही अधिपति होसकता है, जिस कारण लोकमें नियामकहीका अधिपतित्व उपालम्भ है । इस प्रकार चित्तानुगत सुखादिका कारणचतुष्टय देखाजाताहै एवं चित्तसम्बन्धीय स्कन्ध पांच प्रकार के है । जैसे रूप, विज्ञान, वेदना, संज्ञान और संस्कार । जिनके द्वारा विषयग्रहण होताहै । यही व्युत्पत्ति करके सविषय इन्द्रिय सबको रूपस्कन्ध कहकर जानाजाताहै । और विज्ञान प्रवृत्ति प्रवाहही विज्ञानस्कन्ध उक्तदोनों स्कन्धोंके कारण सुखदुःख आदि प्रत्यय प्रवाहही वेदना स्कन्धहै और गो इत्यादि शब्दोल्लेखी सविज्ञान प्रवाहही संज्ञास्कन्ध एवं वेदनास्कन्ध निबन्धही रागद्वेषादिक्लेश उपक्लेश मदमानादि, एवं धर्म्माधर्म्ममे ही सब संस्कारस्कन्धहै॥२५॥

तदिदं सर्वं दुःखं दुःखायतनं दुःखसाधनञ्चेति भावयित्वा तन्निरोधोपायं तत्त्वज्ञानं सम्पादयेत् । अतएवोक्तं, दुःखसमुदायनिरोधमार्गाश्चत्वारः आर्य्यस्य बुद्धाभिमतानि तत्वानि । तत्र दुःखं प्रसिद्धं, समुदायो दुःखकारणं, तद् द्विविधं, प्रत्ययोपनिबन्धनो हेतूपनिबन्धनश्च । तत्र प्रत्ययोपनिबन्धनस्य संग्राहकं सूत्रम् "इदं कार्य्यं ये अन्ये हेतवः प्रत्ययन्ति" गच्छन्ति तेषामयमानानां हेतूनां भावः प्रत्ययत्वं कारणसमवायः तन्मात्रस्य फलं न चेतनस्य कस्यचिदिति सूत्रार्थः । यथा बीजहेतुरङ्कुरो धातूनां षण्णां समवायाज्जायते । तत्र पृथिवीधातुरङ्कुरस्य काठिन्यगन्धञ्च जनयति, अब्धातुः स्नेहं रसञ्च जनयति, तेजोधातू रूपमौष्ण्यञ्च, वायुधातुः स्पर्शनं चलनञ्च, आकाशधातुरवकाशं शब्दञ्च, ऋतुधातुर्यथायोगं पृथिव्यादिकम् । हेतूपनिबन्धनस्य च संग्राहकम् सूत्रम्. उत्पादाद्वा तथागता-

नामनुत्पादाद्वा स्थितैवैषां धर्माणां धर्मता धर्मस्थितिता धर्म-नियामकता च प्रतीत्य समुत्पादानुलोमतेति । तथागतानां बुद्धानां मते धर्माणां कार्य्यकारणरूपाणां या धर्मता कार्यकार-णभावरूपा एषोत्पादादनुत्पादाद्वा स्थिता, यस्मिन् सति यदुत्पद्यते तत्तस्य कारणस्य कार्यमिति धर्मतेत्यस्य विवरणं, धर्मस्य कार्य्यस्य कारणानतिक्रमेण स्थितिः । स्वार्थिकस्त-ल्प्रत्ययः । धर्मस्य कारणं स्वकार्य्यं प्रति नियामकता ॥२६॥

यह संसारही दुःखमय, दुःखायतन एवं दुःखसाधन है, इस प्रकार चिन्ता करके संसारनिरोधका उपाय स्वरूप तत्त्वज्ञने सम्पादनमें यत्न करना चाहिये इस कारण दूसरे शास्त्रोंमें लिखाहै जो दुःखकी निवृत्तिके ४ मार्ग हैं। आर्य्यबुद्धके मतानुसार तत्त्व समु-दायही दुःख निरोधका मार्ग है दुःख किसको कहतेहैं सो प्रसिद्ध है, परन्तु सम्पूर्ण संसारही दुःखका कारण है । जो उत्पन्न होता है, वही उसकारणका कार्य्य है । यही धर्म्मता यही शब्दका विवरणहै । कार्य्यरूपधर्म्मके कारणका अतिक्रम न करके जो स्थिति, वही कार्य्यके प्रति कारणकी नियामकता है ॥ २६ ॥

नन्वयं कार्य्यकारणभावश्चेतनमन्तरेण न सम्भवतीति अत उक्तं कारणे सति तत्प्रतीत्यप्राप्यसमुत्पादे अनुलोमता अनुसारिता या सैव धर्मता उत्पादादनुत्पादाद्वा धर्माणां स्थिता । न चात्र कश्चिच्चेतनोऽधिष्ठातोपलभ्यत इति सूत्रार्थः । यथा प्रतीत्यसमु-त्पादस्य हेतूपनिबन्धः,बीजादङ्कुरोऽङ्कुरात् काण्डं काण्डान्नालो-नालाद्गर्भस्ततः शूकं ततः पुष्पं ततः फलम् । न चात्र बाह्ये समुदाये कारणं बीजादि कार्य्यमङ्कुरादि वा चेतीयते । अहम-ङ्कुरं निर्वर्त्तयामि अहं बीजेन निर्वर्त्तित इति । एवमाध्यात्मि-केष्वपि कारणद्वयमवगन्तव्यम् । पुरः स्थिते प्रमेयाब्धौ ग्रन्थ-विस्तरभीरुभिरुपरम्यते ॥ २७ ॥

इसपर कोई संदेह करते हैं कि, यह कार्य कारणभाव चेतनके विषयमें ही संभवना है अन्यथा नहीं इससे कहाहै कि, कारणके होनेपर उसके प्रतीतिके प्राप्त न होने योग्यकी उत्पत्तिमें जो अनुलोम अनुसरणहै वही धर्मता धर्मोंकी उत्पत्ति या अनुत्पत्तिमें रहती है ।

यह तो कोईभी चेतन अधिष्ठाता नहीं मिलता ऐसा सूत्रार्थ कहाहै । जैसे विना प्रतीतिसे उत्पन्न हुवाहै उसको हेतु संबंध सदैव रहताहै जैसे बीजसे अंकुर अंकुरसे कांड कांडसे नाल नालसे गर्भ उससे शूक शूकसे पुष्प और पुष्पसे फल उत्पन्न होताहै यहा बाह्य समुदायमे बीज कारण और अंकुरादिकार्यमें चैतन्य नही है- मैं अंकुरको परास्त करूंगा या मुझको बीजने निवृत्त किया यहां ऐसा संभव कभी नही होता इसके समान अध्यात्ममें भी कार्यकारण भाव जानना चाहिये आगे प्रमेय समुद्रका कहांतक विचारकरै ग्रंथका विस्तार वहोत होगा इससे इतनाही कहा पूराहै ॥ २७ ॥

तदुभयनिरोधस्तदनन्तरं विमलज्ञानोदयो वा मुक्तिः, तन्निरोधोपायो मार्गः स च तत्त्वज्ञानं, तच्च प्राचीनभावनाबलाद्भवतीति परमं रहस्यम्। सूत्रस्यान्तं पृच्छतां कथितं भवन्तश्च सूत्रस्यान्तं पृष्टवन्तः सौत्रान्तिका भवन्त्विति भगवताभिहिततया सौत्रान्तिकसंज्ञा सञ्जातेति ॥ २८ ॥

उक्त उभय कारणके निरोध होनेपरही तदनन्तर विमल ज्ञानोदय या मोक्षलाभ होताहै । जो लोग उक्त दोनों कारणोंका निरोध करसकते वे ही लोग तत्त्वज्ञान लाभकर सकते हैं प्राचीनभावना बलहीसे उक्ततत्त्वज्ञान उत्पन्न होताहै यही परमरहस्यहै । जो सूत्रके अन्तको जिज्ञासा करतेहैं उनको कहाजाताहै तुम जो सन्धानजिज्ञासा करतेहो किम्वा सौत्रिक होताहै । इसी निमित्त भगवान्ने कहाहै एव सौत्रान्तिक संज्ञा उत्पन्न हुईहै ॥ २८ ॥

केचन बौद्धा बाह्येषु गन्धादिषु आन्तरेषु रूपादिस्कन्धेषु सत्स्वपि तत्रानास्थामुत्पादयितुं सर्वं शून्यमिति,प्राथमिकान् विनेयानचीकथत् भगवान्, द्वितीयांस्तु विज्ञानमात्रग्रहाविष्टान् विज्ञानमेवैकं सदिति,तृतीयानुभयं सत्यमित्यास्थितान् विज्ञेयमनुमेयमिति, सेयं विरुद्धा भाषेति वर्णयन्तो वैभाषिकाख्यया ख्याताः एषा हि तेषां परिभाषा समुन्मिषति । विज्ञेयानुमेयत्ववादे प्रात्यक्षिकस्य कस्यचिदप्यर्थस्याभावेन व्याप्तिसंवेदनस्थानाभावेनानुमानप्रवृत्त्यनुपपत्तेः सकललोकानुभवविरोधश्च । ततश्चार्थो द्विविधः; ग्राह्योऽध्यवसेयश्च । तत्र ग्रहणं निर्विकल्पकरूपं

प्रमाणं कल्पनापोढत्वात् । अध्यवसायः सविकल्पकरूपो ऽप्रमाणं कल्पनाज्ञानत्वात् । तदुक्तम्-

"कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम् ।
विकल्पो वस्तुनिर्भासादसंवादादुपप्लव" इति ॥
"ग्राह्यं वस्तुप्रमाणं हि ग्रहणं यदितोऽन्यथा ।
न तद्वस्तु न तन्मानं शब्दलिङ्गेन्द्रियादिजमिति च" ॥२९॥

कोई कोई बौद्धमतावलम्बी लोग वायुगन्धादिमें एवं आन्तरिक रूपादिस्कन्ध विद्यमानही उसमें अनास्थाउत्पादनार्थ सब शून्य कहते हैं । भगवान् बुद्धने प्राथमिक कल्पमेंही कहाहै एवं द्वितीयकल्पमें उभयसत्य यह आश्रयकरके विज्ञेयमात्र अनुमेय यह ही स्वीकारकरते हैं । वह मत अतिविरुद्ध है । यह कारण दो प्रकारके हैं—जैसेः—प्रत्ययोपनिबन्धन एवं हेतूपनिबन्धन इसमें प्रत्ययोपनिबन्धनकारणका संग्राहक सूत्र यह है, कार्यके प्रति जो सब अन्य हेतु गमन करता है, उन्हीं सब हेतुका भावही कारण समवायहै, यही तन्मात्रका फलहै, यह किसी चैतन्यपदार्थका सम्भव नही । जिस प्रकार बीजके हेतुभूत अंकुर प्रकार धातुके समवायमें उत्पन्न होते हैं । पृथिवी धातु अंकुरके काठिन्य और गन्ध जन्माता है, जलधातु स्नेह और रस उत्पादन करता है, तेजोधातु रूप और उष्णता, वायुधातु स्पर्श और चाञ्चल्य आकाशधातु अवकाश और शब्द उत्पादन करता है, एव ऋतुधातु पृथिवी आदिका यथा-[illegible]य साधन करजाता है और हेतूपनिबन्धन कारणका सूत्र यह बुद्ध आदिकमतमें कार्य्य-[illegible] धर्म्म सबका जो कार्य्य कारण भावरूप धर्म्मता है यह धर्म्मता उत्पादन व[illegible] [illegible] स्थित है । जिसकी सत्तामें जो पदार्थ इसीके वर्णन करनेसे उन लोगोंका वैभाषिक प्रसिद्ध हुआ है वस्तुतः उनलोगोंकी यह भाषाही प्रकाशित होती है, विज्ञेयके अनुमेयत्व कथनमें प्रत्यक्ष सिद्धकीसी अर्थके अभाव हेतु व्याप्तिज्ञानका स्थानाभाव प्रयुक्त अनुमान प्रवृत्तिकी अनुपपत्ति होती है एवं सबलोगोंका अनुभवका विरोध होजाता है । अतएव जानाजाता है जो अर्थ दो प्रकारका है, जैसे—ग्राह्य और अध्यवसेय इसमें निर्विकल्पकरूप प्रमाणही कारण और सविकल्पकरूप प्रमाणही अध्यवसाय है दूसरे शास्त्रमें लिखाहै जो कल्पना कल्पित अभ्रान्त प्रत्यक्षही निर्विकल्पक एव वस्तु निर्भास हेतु असंवादयुक्त जो उत्पात है, वही विकल्प होता है । और वस्तुप्रमाण ही ग्राह्य एव जो उससे भिन्न है, वही ग्रहण है । केवल वही वस्तु और वही मान ग्राह्य नहीं वस्तुतः वह शब्द लिङ्ग और इन्द्रियजन्य है ॥ २९ ॥

ननु सविकल्पकस्याप्रामाण्ये कथं ततः प्रवृत्तस्यार्थप्राप्तिः संवादश्चोपपद्येयातामिति चेन्न तद्द्वारं मणिप्रभाविषयमणिविकल्प-

न्यायेन पारम्पर्य्येणार्थप्रतिलम्भसम्भवेन तदुपपत्तेः । अवशिष्टं सौत्रान्तिकप्रस्तावे प्रपञ्चितमिति नेह प्रतन्यते । न च विनेयाशयानुरोधेनोपदेशभेदः साम्प्रदायिको न भवतीति भणितव्यम् । यतो भणितं बोधचित्तविवरणे ॥ ३० ॥

इस समय यदि सविकल्पका अप्रामाण्य हुआ तो किसप्रकार उसमें प्रवृत्तिकी अर्थप्राप्ति होसकती ? यह आशङ्का नही होसकती, जिसकारण मणिमें प्रभाविषय विकल्पन्यायद्वारा परम्परासे अर्थलाभ सम्भव हेतु अर्थकी उपपत्ति है सौत्रान्तिक प्रस्ताव प्रपश्चित है, इसलिये इस स्थानमें उसका विस्तार नही हुआ और विनेय और आशयानुरोधसे उपदेशभेद नही एवं यह मत सम्प्रदायिक नही, यहभी कहाजावेगा, जिसकारण बोधचित्त विवरणमेंही कहाहै ॥ ३० ॥

देशनालोकनाथानां सत्वाशयवशानुगाः ।
विद्यन्ते बहुधा लोके उपायैर्बहुभिः किल ॥ ३१ ॥

जो लोग लौकिक व्यवहारके प्रति तरहैं वे लोग अनेक प्रकारके मतोंके वशवर्ती होकर नानाप्रकारके सम्प्रदायमें बटे है यह लोकके व्यवहार में भी देखाजाता है जो सबही बहुत उपायोंसे अनेक मार्ग अवलम्बनकर विविधमतका आश्रय करते हैं। इसी प्रकार लोकमें बहुत २ मतोको स्वीकार कर २ नानासम्प्रदायमें विभक्त हुए हैं ॥ ३१ ॥

गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणाः ।
भिन्ना हि देशना भिन्ना शून्यताऽद्वयलक्षणेति ॥ ३२ ॥

गम्भीर और उत्तानभेदसे किसी २ स्थानमें दोनों लक्षणही स्वीकृत हैं. सम्प्रदायभेदसे सर्वही जगह मतभेद देखाजाता है, जो लोग अद्वयवादी और जो लोग शून्यवादी हैं उन लोगोंकी अनेक प्रकारकी लक्षणा परिलक्षित है ॥ ३२ ॥

द्वादशायतनपूजा श्रेयस्करीति बौद्धनये प्रसिद्धम्–
अर्थानुपार्ज्य बहुशो द्वादशायतनानि वै ।
परितः पूजनीयानि किमन्यैरिह पूजितैः ॥ ३३ ॥

बौद्ध सम्प्रदायमें १२ आयतन पूजाही परम कल्याणकारक है, यह प्रसिद्ध है । वे लोग कहते हैं कि, धन उपार्जन कर अनेक प्रकारसे द्वादश आयतनकी पूजा करनी चाहिये इन १२ आयतनोंकी पूजाही छोडकर अन्यान्य देवदेवीकी पूजामें कोई फल नही ॥ ३३ ॥

ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च ।
मनो बुद्धिरिति प्रोक्तं द्वादशायतनं बुधैरिति ॥ ३४ ॥

चक्षु, कर्ण, नासिका, जिह्वा, और त्वक् ये पांच ज्ञानेन्द्रिय हैं, वाक्, पाणि, पाद, पायु, और उपस्थ ये ही पांच कर्मेन्द्रिय हैं एवं मन और बुद्धि, इन्ही १२ को द्वादश आयतन कहते हैं । उक्त इन्द्रियादिकी साधनही मनुष्यका कर्त्तव्य कहकर पण्डितोंने स्थिर सिद्धान्त किया है ; अतएव द्वादश आयतन, अर्थात् इन्द्रियसेवा ही करनी चाहिये ॥ ३४ ॥

विवेकविलासे बौद्धमतमित्थमभ्यधायि—
बौद्धानां सुगतो देवो विश्वञ्च क्षणभङ्गुरम् ।
आर्य्यसत्वाख्यया तत्त्वचतुष्टयमिदं क्रमात् ॥ ३५ ॥
दुःखमायतनञ्चैव ततः समुदयो मतः ।
मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः ॥ ३६ ॥

विवेकविलासमें इसप्रकार बौद्धमत अवधारित हुआ है जो सुगतही बौद्धोंकी परम देवता है । और यह संसार क्षणभंगुर अर्थात् अनित्य है । और आर्य्यलोगोंने वक्ष्यमाण तत्त्व चतुष्टयकी सत्ता कियी है । इस समय क्रमशः इन चार तत्त्वोंका निरूपण करते हैं । दुःख, आयतन, समुदय, और मार्ग इन्हीको तत्त्वचतुष्टय कहते हैं। इसके अनन्तर क्रमतः उक्त [illegible] व्याख्या श्रवण करो ॥ ३५ ॥ ३६ ॥

दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्त्तिताः ।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च ॥ ३७ ॥

संसारी लोगोंका दुःखही स्कंध, यह स्कन्ध ५ प्रकारका कहा जाता है । जैसे—विज्ञान-स्कन्ध, वेदनास्कन्ध, संज्ञास्कन्ध, संस्कारस्कन्ध और रूपस्कन्ध हैं । ये ही पांचस्कन्ध पहिलेभी कहे गये हैं, इसके पीछेभी उक्त पांचस्कन्धोंका विशेष विवरण कहा जावेगा ॥ ३७ ॥

पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम् ।
धर्मायतनमेतानि द्वादशायतनानि तु ॥ ३८ ॥

पञ्चज्ञानेन्द्रिय, शब्दादि पांच विषय, मन और धर्म्मायतन, येभी द्वादश आयतन कहकर प्रसिद्ध हैं । ये ही पूर्वोक्त आयतन शब्दके प्रतिपाद्य हैं । इसी प्रकार द्वादश आयतन मतान्तर प्रसिद्ध कहकर प्रसिद्ध कहा जाता है परन्तु यह सर्ववादि सिद्ध नहीं ॥ ३८ ॥

रागादीनां गणोऽयं स्यात् समुदेति नृणां हृदि ।
आत्मात्मीयस्वभावाख्यः स स्यात् समुदयः पुनः ॥ ३९ ॥

मनुष्योंके हृदयमें रागादि उदय होतेहैं, परन्तु केवल आत्माही आत्मीय स्वभावस्थ, इसप्रकार ज्ञानको समुदयतत्त्व कहकर जाना जाता है। यह तत्त्व पर्यालोचना करना परमावश्यक है स्थानान्तरमें इसका विशेष विवरण होगा ॥ ३९ ॥

क्षणिकाः सर्वसंस्कारा इति या वासना स्थिरा ।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते ॥ ४० ॥

सब प्रकारका संस्कारभी क्षणिक, इसीप्रकार जो स्थिर वासना है, उसीको मार्ग कहकर जाना जाता है, और यह मार्ग मोक्षनामसे कहा जाता है, अर्थात् जो लोग उक्तप्रकार ज्ञान को दृढीभूत करसकते हैं, वेही लोग मोक्ष प्राप्त करसकते है ॥ ४० ॥

प्रत्यक्षमनुमानञ्च प्रमाणद्वितयं तथा ।
चतुःप्रस्थानिका बौद्धाः ख्याता वैभाषिकादयः ॥ ४१ ॥

प्रत्यक्ष और अनुमान, इन्ही दोको प्रमाण कह सकते हैं । और बौद्धलोग चतुः प्रस्थानिक, अर्थात् चार प्रकारके प्रमाणको स्वीकार करते है, येही वैभाषिक नामसे प्रसिद्ध हैं ॥ ४१ ॥

अर्थो ज्ञानान्वितो वैभाषिकेण बहु मन्यते ।
सौत्रान्तिकेन प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः ॥ ४२ ॥

वैभाषिक लोग ज्ञानान्वित अर्थको बहुज्ञान कहते है, नास्तिक लोग केवल प्रत्यक्ष वस्तु हीको ग्रहण करते है, वे लोग जिसका प्रत्यक्ष नहीं होता ऐसे किसी पदार्थको नही मानते । इन लोगोंके मतमे अनुमानादिप्रमाण नही मानाजाता ॥ ४२ ॥

आकारसहिता बुद्धिर्योगाचारस्य सम्मता ।
केवलां संविदं स्वस्थां मन्यन्ते मध्यमाः पुनः ॥ ४३ ॥

जो लोग योगाचारमें रतहै, वे लोग आकारसहित बुद्धि स्वीकार करते हैं, और जो लोग मध्यम वे केवल संवेदन सूक्ष्म पदार्थमात्र स्वीकार करते हैं ॥ ४३ ॥

रागादिज्ञानसन्तानवासनाच्छेदसम्भवा ।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्त्तिता ॥ ४४ ॥

रागादि ज्ञानप्रवाहरूप वासनाके उच्छेद होनेपर मुक्ति होती है, यह चार प्रकारके बौद्धोंका मत है, किन्तु चार प्रकारके बौद्धही लोग उक्त प्रकार वासनाके उच्छेदको मुक्ति कहते हैं एवं वासनाके उच्छेद होनेही पर मुक्ति होसकती है ॥ ४४ ॥

कृत्तिः कमण्डलुर्मौण्ड्यं चीरं पूर्वाह्णभोजनम्।
सङ्घो रक्ताम्बरत्वञ्च शिश्रिये बौद्धभिक्षुभिरिति ॥ ४५ ॥

बौद्ध भिक्षुकलोग चर्म्म और कमण्डलु धारण करते हैं, वे लोग मस्तक मुण्डन करते हैं चीर, अर्थात् जीर्णवस्त्र खण्ड परिधानपूर्वक पूर्वाह्नमें भोजन करते हैं, और वे लोग अनेक लोग मिलकर रहते हैं, यही बौद्ध भिक्षुकोंका मत कहकर प्रसिद्ध है ॥ ४५ ॥

इति सर्वदर्शनसंग्रहे बौद्धदर्शनं समाप्तम् ॥

अथ आर्हतदर्शनम्।

तदित्थं मुक्तकच्छानां मतमसहमाना विवसनाः कथञ्चित् स्थायित्वमास्थाय क्षणिकत्वपक्षं प्रतिक्षिपन्ति। यद्यात्मा कश्चिन्नास्थीयेत स्थायी तथापीह लौकिकफलसाधनसम्पादनं विफलं भवेत्। न ह्येतत् सम्भविष्यति, अन्यः करोत्यन्यो भुङ्क्ते इति। तस्माद्योऽहं प्राक् कर्माकरवं सोऽहं सम्प्रति तत्फलं भुञ्जे इति पूर्वापर कालानुयायिनः स्थायिनस्तस्य स्पष्टप्रमाणावसिततया पूर्वापर भागविकलकालकलावस्थितिलक्षणक्षणिकता परीक्षकैरर्हद्भिर्न परिग्रहार्हा। अथ मन्येथाः "प्रमाणवत्त्वादायातः प्रवाहः केन वार्य्यत" इति न्यायेन यत् सत् तत् क्षणिकमित्यादिना प्रमाणेन क्षणिकतायाः प्रमिततया तदनुसारेण समानवर्तिनामेव प्राचीनः प्रत्ययः कर्मकर्त्ता उत्तरः प्रत्ययः फलभोक्ता ॥ १ ॥

मुक्तकच्छ बौद्धोंके मतको नहीं सहकर और विवसही जैन शिष्यगण आत्माके स्थापनार्थ क्षणिक मतका खण्डन करते हैं। यदि आत्मा स्थायी न होगा, तो लौकिक फलसाधन विफल हो जावेगा। लोकव्यवहारमें भी ऐसी प्रतीति सदा होती है जो अन्य व्यक्ति कार्य्य करता है एवं उसका भोग अपर व्यक्ति करता है। और मैंने तो पूर्व

कर्म्म किया था इससमय उसका फल भोग करता हूं । यदि आत्माका स्थायित्व स्वीकार नही करते हो तो उक्तप्रकार पूर्वापर काल व्यवहार नही होसकता । जब आत्माका पूर्व्वापरकालवर्त्तित्व देखाजाताहै, तब उसका स्थायित्व स्पष्ट प्रमाण ही देखा जाता है। सुतरां जैनशिष्यगण क्षणिकत्वमत ग्रहण नहीं करसकते, ये उन्होंने सविशेष परीक्षा कर क्षणिकत्वका खण्डन किया है । और यहभी अनायासही समझा जासकता है जो प्रमाण परिप्राप्त, उसको कौन वारण करसकता ? न्यायद्वारा जो सत्य प्रतीत होता है, उसको क्षणिक सिद्ध करना सम्भव नही, समानसन्तानवर्त्ति लोगोंके मतमें प्राचीन प्रत्यय कर्म्म करता एवं उत्तर काल प्रत्यय फलभोक्ता होता है ॥ १ ॥

न चातिप्रसङ्गः कार्य्यकारणभावस्य नियामकत्वात् । यथा मधुररसभावितानामाम्रबीजानां परिकर्षितायां भूमावुप्तानामङ्कुरकाण्डस्कन्धशाखापल्लवादिषु तद्द्वारा परम्परया फले माधुर्य्यनियमः, यथा वा लाक्षारसावसिक्तानां कार्पासबीजादीनामङ्कुरादिपारम्पर्य्येण कार्पासादौ रक्तिमनियमः । यथोक्तम्—

यस्मिन्नेव हि सन्ताने आहिता कर्मवासना ।
फलं तत्रैव बध्नाति कार्पासे रक्तता यथा ॥
कुसुमे बीजपूरादेर्यल्लाक्षाद्युपसिच्यते ।
शक्तिराधीयते तत्र काचित्तां किं न पश्यसीति ॥

तदपि काशकुशावलम्बनकल्पं विकल्पासहत्वात् ॥ २ ॥

और कार्य्य कारणभावकी सत्ता हेतु अति प्रसङ्ग निवारित होता है जिस प्रकार आम्रबीज सब मीठे रसमें वासकर उसको मिट्टीमें गाड रखनेसे उसमेंसे प्रथम अङ्कुर उसके अनन्तर काण्ड स्कन्ध शाख पल्लवादि जन्मनेपर उसके द्वारा परम्परासे फलमें माधुर्य्य नियम होता है एवं जिस प्रकार कपास बीज लाक्षारसद्वारा अभिषिक्तकर उसको जोती हुई भूमिमें रोपनेसे उस बीजसे अंकुरादि जन्मकर परम्परासे कार्पासादिमें लालिमा नियम होता है. शास्त्रान्तरमें कहाहै जो जिससन्तानमें कर्म्मवासना स्थापित कियी जा सके, कार्पासकी रक्तताकी नाई उसीहीमें फलबन्धन करते हैं। और बीजपूरादिके फूलमें लाक्षारसादि सिंचन करनेपर उसमें जो शक्तिका आधार होताहै, उसको क्या देखते नही ? जिसकारण इसमें भी काशकुशावलम्बनकी नाई इसका विकल्प है ॥ २ ॥

जलधरादौ दृष्टान्ते क्षणिकत्वमनेन प्रमाणेन प्रमितं प्रमाणान्तरेण वा । नाद्यः भवदभिमतस्य क्षणिकत्वस्य क्वचिदप्यदृष्टचर-

त्वेन दृष्टान्तासिद्धावस्यानुमानस्यानुत्थानात् । न द्वितीयः तेनैव न्यायेन सर्वत्र क्षणिकत्वसिद्धौ सत्त्वानुमानवैफल्यापत्तेः अर्थक्रियाकारित्वं सत्त्वमित्यङ्गीकारे मिथ्यासर्पदंशादेरपि अर्थक्रियाकारित्वेन सत्त्वापाताच्च । अतएवोक्तम्—उत्पादव्ययध्रौव्ययुक्तं सदिति ॥ ३ ॥

पूर्व्वमें मेघादि दृष्टान्त प्रदर्शनकर जो क्षणिकत्व साधित हुआ है, वह क्या उक्तप्रकार प्रमाणद्वारा प्रतिपन्न है ? अथवा प्रमाणान्तरसाध्य है ? उक्त प्रमाणद्वारा प्रतिपन्न यह कहा नहीं जासकता, कारण यह है जो तुम लोगोंके अभिमत क्षणिकत्व कभी देखा नही जाता; सुतरां दृष्टान्तासिद्धिसे उक्तप्रकार अनुमान् नहीं होसकता, और प्रमाणान्तरसाध्यहै यह भी नहीं कहाजासकता, कारण यह है जो वैसा होनेपर उसीकी नाई सर्वत्र क्षणिकत्वके सिद्धिसत्त्वमें सत्वानुमानकी वैफल्यापत्ति होती है । अर्थक्रियाकारित्व सत्व, उसीप्रकार स्वीकार करनेपर मिथ्यासर्पदंशनादिका अर्थक्रियाकारित्वप्रयुक्तसत्वापात होसकताहै । अतएव कहा गया है, जो जो उत्पत्ति, विनाश और स्थिरतायुक्त है, वह वह सत् है ॥ ३ ॥

अथोच्येत सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्माध्यासात् तत्सिद्धिरिति तदसाधु, स्याद्वादिनामनैकान्ततावादस्येष्टतया विरोधासिद्धेः यदुक्तं कार्पासादिदृष्टान्त इति तदुक्तिमात्रं युक्तेरनुक्तेः तत्रापि निरन्वयनाशस्यानङ्गीकाराच्च । न च सन्तानिव्यतिरेकेण सन्तानः प्रमाणपदवीमुपारोढुमर्हति । तदुक्तम्—

सजातीयाः क्रमोत्पन्नाः प्रत्यासन्नाः परस्परम् ।
व्यक्तयस्तासु सन्तानः स चैक इति गीयत इति ॥ ४ ॥

अनन्तर कहते हैं जो सामर्थ्य और असामर्थ्यरूप विरुद्ध धर्म्माध्यासही उसकी सिद्धि है इसप्रकार जो कहा है, यह असाधुमत प्रतीत होता है, जिसकारण वादियोंके अनेकान्तवादकी इष्टता प्रयुक्त विरोधकी असिद्धि होती है । और जो कार्पासका दृष्टान्त कहागया है उसको भी कथनमात्र जानना । जिसकारण उसमें युक्तिका उल्लेख नहीं करते । विशेषतः उसमें निरन्वयनाशका अनङ्गीकार है । और सन्तानिके विना कभी सन्तानप्रमाण पदवीपर आरोहण नहीं करसकता यही युक्त है. शास्त्रान्तरमें कहाहै जो लोग समानजातीय हैं, वे लोग क्रमोत्क्रम एवं परस्पर प्रत्यासन्न हैं, उन सबके जो व्यक्ति सकल वेही उनका सन्तान है, किन्तु सन्तान एक कहकर गिनाजाता है ॥ ४ ॥

न च कार्य्यकारणभावानियमोऽतिप्रसङ्गं भङ्क्तुमर्हति । तथाहि उपाध्यायबुद्ध्यनुभूतस्य शिष्यबुद्धिः स्मरेत तदुपचितकर्मफलमनुभवेद्वा तथा च कृतप्रणाशाकृताभ्यागमप्रसङ्गः । तदुक्तं सिद्धसेनवाक्यकारेण—

" कृतप्रणाशाकृतकर्मभाग-
भवप्रमोक्षस्मृतिभङ्गदोषान् ।
उपेक्ष्य साक्षात् क्षणभङ्गमिच्छ-
न्नहो महासाहसिकः परोऽसाविति"

किञ्च क्षणिकत्वपक्षे ज्ञानकाले ज्ञेयस्यासत्त्वेन ज्ञेयकाले ज्ञानस्यासत्त्वेन च ग्राह्यग्राहकभावानुपपत्तौ सकललोकयात्रास्तमियात् । न च समसमयवर्त्तिता शङ्कनीया सव्येतरविषाणवत् । कार्य्यकारणभावासम्भवेनाग्राह्यस्यालम्बनप्रत्ययानुपपत्तेः।अथ भिन्नकालस्यापि तस्याकारार्पकत्वेन ग्राह्यत्वं, तदप्यपेशलं क्षणिकस्य ज्ञानस्याकारार्पकताश्रयताया दुर्वचत्वेन साकारज्ञानवादे प्रत्यादेशेन निराकारज्ञानवादेऽपि योग्यतावशेन प्रतिकर्मव्यवस्थायाः स्थितत्वात् ॥ ९ ॥

पूर्व्वमें कार्य्य कारण भावनियम दिखलाकर अति प्रसङ्ग दोषका निवारण किया है, वह सुसङ्गत नहीं, कारण यह है, जो कार्य्य कारण भाव नियम कभी अतिप्रसङ्ग दोषको रोक नहीं सकता । इस समय देखा जाता है जो जो उपाध्यायके बुद्धि अनुभूत उसीको शिष्य बुद्धि स्मरण करती है अथवा उपाध्याय बुद्धि उपस्थित कर्म्मफल अनुभव करती है, सुतरां जो किया गया है, उसको विनाशकर अकृत पदार्थकी आगामी नाई होता है । सिद्धसेन वाक्यकारने कहा है जो जो लोग कृतपदार्थका नाश कर अकृत कर्म्मके फलभोगकी आशा करते हैं एवं साक्षात् वर्त्तमान पदार्थको क्षणभंगुर जानते हैं, वे महासाहसिक हैं । और देखो क्षणिकत्व वादीके मतमें ज्ञानकालमें ज्ञेयपदार्थके असत्ता हेतु एवं ज्ञेय समयमें ज्ञानकी अवर्त्तमानता प्रयुक्त ग्राह्य ग्राहक भावकी अनुपपत्ति होती है. और ऐसा होनेसे सम्पूर्ण लोकयात्राकी असिद्धि हुई जाती है और इस प्रकार समान समय वर्तिता शङ्काभी नहीं हो सकती है । कारण यह है जो, कार्य्यकारण भावकी असत्ता हेतु अग्राह्य पदार्थका आलम्बन प्रत्ययकी अनुपपत्ति

है यदि भिन्नकालके आकार आर्पकत्व हेतु उसका ग्राह्यत्व मानो वहभी युक्तियुक्त उसका नहीं होता जिस कारण क्षणिक ज्ञानकी आकारार्पकता कहीनहीं जाती सुतरां साकार ज्ञान वादका प्रत्यख्यादेशवशतः निराकार वादमें भी योग्यता प्रयुक्त प्रतिकर्म्मव्यवस्थ ही स्थित होती है ॥ ५ ॥

तथाहि प्रत्यक्षेण विषयाकाररहितमेव ज्ञानं प्रतिपुरुषमहमिकया घटादिज्ञानमनुभूयते न तु दर्पणादिवत् प्रतिबिम्बक्रान्तम्। विषयाकारधारितत्वे न च ज्ञानस्यार्थे दूरनिकटादिव्यवहाराय जलाञ्जलिर्वितीर्य्येत। न चेदमिष्टापादनमेष्टव्यं दवीयान् महीधरो नेदीयान् दीर्घो बहुरिति व्यवहारस्य निराबाधं जागरूकत्वात्। न चाकाराधायकस्य तस्य दवीयस्त्वादिशालितया तथा व्यवहार इति कथनीयं दर्पणादौ तथानुपलम्भात्। किञ्चार्थादुपजायमानं ज्ञानं यथा तस्य नीलाकारतामनुकरोति तथा यदि जडतामपि तर्ह्यर्थवत् तदपि जडं स्यात्। तथा च वृद्धिमिष्टवतो मूलमपि तवेष्टं स्यादिति महत्कष्टमापन्नम् ॥ ६ ॥

इस समय यही जाना जाता है जो प्रत्यक्षप्रमाणानुसार विषयाकार रहित ज्ञान होता है एवं प्रति पुरुषमें अहङ्कारद्वारा ही घनादि अनुभूत होते है। दर्पणादि गत प्रतिबिम्बकी नाई नहीं होता वस्तुतः उक्त ज्ञान विषयाकार धारण करता है उस ज्ञानके निमित्तभी दूर निकटादि व्यवहार नहीं होसकता। दूरत्ववर्त्ती पर्व्वत निकटस्थ इस प्रकार व्यवहार सर्व्वथा असिद्ध और यह भी नही कहा जाता जो आकारधारी पर्व्वतकी दूरवर्त्तिता प्रयुक्त उक्त व्यवहार होसके जिसकारण दर्पणादिमें उक्तरूप उपलब्धि नही होती। पक्षान्तरमें कहते है अर्थोपपत्तिहीमे ज्ञान उत्पन्न होता है। जिसप्रकार वही ज्ञान नीलाकारताका अनुकरण करता है उसी प्रकार यदि जड़ताका भी अनुकरण करसकते हैं ऐसा होनेपर अर्थवान् मात्रही जड़ मे करसकते सुतरां महादोष उपस्थित हुआ ॥ ६ ॥

अथैतद्दोषपरिजिहीर्षया ज्ञानं जडतां नानुकरोतीति ब्रूषे हन्त तर्हि तस्याग्रहणं न स्यादित्येकमनुसन्धित्सतोऽपरं प्रच्यवत इति न्यायापातः। ननु माभूत् जडताया ग्रहणं किं न च्छिन्नं तदग्रहणेऽपि नीलाकारग्रहणे तयोर्भेदो नैकान्तो वा भवेत्। नीलाकारग्रहणे चागृहीता जडता कथं तस्यानुरूपं स्यात्

अन्यथा गृहीतस्य स्तम्भस्यागृहीतं त्रैलोक्यमपि रूपं भवेत् । तदेतत् प्रमेयजातं प्रतापचन्द्रप्रभृतिभिरर्हन्मतानुसारिभिः प्रमेयकमलमार्त्तण्डादौ प्रबन्धे प्रपञ्चितमिति ग्रन्थभूयस्त्वभयान्नोपन्यस्तम्—तस्मात् पुरुषार्थाभिलाषुकैः पुरुषैः सौगती गतिर्नानुगन्तव्या अपित्वार्हत्येवार्हणीया । अर्हत्स्वरूपञ्च चन्द्रसूरिभिराप्तनिश्चयालङ्कारे निरटङ्कि—

सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः ।
यथास्थितार्थवादी च देवोऽर्हन् परमेश्वर इति ॥ ७ ॥

यदि उक्तदोषके परिहार वासनामें ज्ञान जड़ नहीं, यह कहो तो उसका ग्रहण नहीं होसकता, सुतरां एकके अनुसन्धान करने गया अन्य उसीमे हुआ । तथापि यदि कहो जडताका ग्रहण नहीं हो तो तुम्हारा क्या छिन्न नहीं हुआ ? नीलाकारके ग्रहण होनेसे उनसबका भेद नहीं होता परन्तु नीलाकारके ग्रहण और अगृहीत जड़ता किस प्रकार उसका अनुरूप हो सकती है, अन्यथा त्रैलोक्यमेंही गृहीतस्तम्भका अगृहीतरूप होता है । अतएव आर्हत मतानुसारी प्रतापचन्द्र प्रभृति लोगोंने प्रमेय कमल मार्तण्डादि प्रबन्धमें उक्त प्रकार विस्तार किया है । इस स्थानमें ग्रन्थ बाहुल्य भयसे वह उपन्यस्त नहीं हुआ अत एव जो लोग धर्म्मार्थ काम मोक्ष इन्हीं पुरुषार्थ चतुष्टयका अभिलाष करते हैं, वे लोग बुद्धमत स्वीकार नहीं करते, उन लोगोंका आर्हत मतका अनुसरण करना कर्त्तव्य है । चन्द्रसूरि प्रभृति आप्तव्यक्ति लोगोने निश्चयालङ्कारमें यह आर्हत मत निःशंक कहकर स्वीकारकर उन लोगोंने कहा है । आर्हत देव सर्वज्ञएवं व रागादि दोषसमूहको जीता है, त्रिभुवनमें उनकी अर्चना करता है वे यथार्थ स्थितार्थ वादी एव मोक्ष साक्षात् परमेश्वर ॥ ७ ॥

ननु न कश्चित् पुरुषविशेषः सर्वज्ञपदवेदनीयः प्रमाणपद्धतिमध्यास्ते सद्भावग्राहकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भात् । तथा चोक्तं तौतातितैः ।

सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः ।
दृष्टो न चैकदेशोऽस्ति लिंगं वा योऽनुमापयेत् ॥ ८ ॥

इससमय कहते हैं जो कौन एक पुरुष जो सर्वज्ञपद प्रतिपाद्य ऐसा कोई प्रमाण नहीं
इसकारण जो प्रमाण पञ्चकका सद्भावमें ज्ञान होता है, उन्हीं पांच प्रमाणोंमेंभी किसी
पुरुष विशेषका सर्व्वज्ञपद प्रतिपाद्यत्व उपलाभ नहीं होता । इस विषयमें शास्त्रान्तरमें कहा
है जो हम लोग इससमय किसीको सर्व्वज्ञ नहीं देखते एवं कभी एक देशमात्र नहीं दीख-
पड़ता, परन्तु ऐसा कोई कारणभी नहीं है जो, उसकेद्वारा अनुमान किया जासके ॥ ८ ॥

न चागमविधिः कश्चिन्नित्यसर्वज्ञबोधकः ।
न च तत्रार्थवादानां तात्पर्य्यमपि कल्पते ॥ ९ ॥

और सर्व्वज्ञ बोधक कोई आगमविधि भी नहीं है, अर्थात् कोई आगमद्वारा भी प्रमा-
णीकृत नहीं होता, किस पुरुष विशेषको सर्व्वज्ञ कहा जासके, परन्तु उसमें अर्थवादका भी
तात्पर्य्य परिकल्पना नहीं होसकता ॥ ९ ॥

न चान्यार्थप्रधानैस्तैस्तदस्तित्वं विधीयते ।
न चानुवदितुं शक्यः पूर्वमन्यैरबोधितः ॥ १० ॥

जो लोग अन्वर्थ स्वीकार करते हैं, वे लोग भी सर्व्वज्ञका अस्तित्व विधान नहीं
करते एवं पहिले किसी व्यक्तिने प्रतिपादन नहीं किया है, ऐसी बात भी कोई नहीं
कहसकता ॥ १० ॥

अनादेरागमस्यार्थो न च सर्वज्ञ आदिमान् ।
कृत्रिमेण त्वसत्येन स कथं प्रतिपाद्यते ॥ ११ ॥

अनादि आगमहीका अर्थ होजाता है एवं सर्व्वज्ञ आदिमान नहीं है, सुतरां किसीप्रकार
। कृत्रिम सत्यपरिमाणसे वह सर्व्वज्ञ प्रतिपादित नहीं होसकता ॥ ११ ॥

अथ तद्वचनेनैव सर्वज्ञोऽन्यैः प्रतीयते ।
प्रकल्प्येत कथं सिद्धिरन्योन्याश्रययोस्तयोः ॥ १२ ॥

यदि उसवाक्यमात्रहीसे अन्यान्य व्यक्तिगण सर्व्वज्ञ जानसकें, तो किसप्रकार वह पर-
स्पर दोनों आश्रयीकी सिद्धिकल्पना कियीजासके ॥ १२ ॥

सर्वज्ञोक्ततया वाक्यं सत्यं तेन तदस्तिता ।
कथं तदुभयं सिध्येत्सिद्धमूलान्तरादृते ॥ १३ ॥

सर्व्वज्ञका उक्तवाक्य ही सत्य इसीप्रमाणसे सर्व्वज्ञकी अस्तिता जानीजाती है, परन्तु
सिद्धमूलान्तर व्यतिरेक किसप्रकार दोनोंकी सिद्धि होजाती है ॥ १३ ॥

असर्वज्ञप्रणीतात्तु वचनान्मूलवर्जितात् ।
सर्वज्ञमवगच्छन्तस्तद्वाक्योक्तं न जानते ॥ १४ ॥

और जो लोग सर्व्वज्ञ प्रणीतमूल वर्जितवचनमें सर्वज्ञ स्वीकार करते हैं, वे भी उस वाक्यके कहनेका अभिप्राय नही जानते अर्थात् जिसवाक्यका कोई मूल नही, उसवाक्यमें सर्व्वज्ञ स्वीकृत नही होसक्ता ॥ १४ ॥

सर्वज्ञसदृशं किञ्चिद् यदि पश्येम सम्प्रति ।
उपमानेन सर्वज्ञं जानीयाम ततो वयम् ॥ १५ ॥

यदि सम्प्रति कोई पदार्थभी सर्वज्ञके तुल्यदेखे तो हमलोग उपमान प्रमाणानुसार सर्व्वज्ञको जानसके, अर्थात् यदि इसवस्तुके सदृश, यह रूप देखते तो सर्वज्ञ हमलोगोको दृष्टवस्तुके सदृश इसप्रकार ज्ञानमें उसको जानसकते ॥ १५ ॥

उपदेशोऽपि बुद्धस्य धर्माधर्मादिगोचरः ।
अन्यथा नोपपद्येत सार्वज्ञ्यं यदि नाभवदित्यादि ॥ १६ ॥

यदि सर्व्वज्ञत्वही नही पायाजाता तो अन्य किसीप्रकार भी धर्म्माधर्म्मादि गोचर बुद्धको उपदेश उपपन्न नही होसकता सर्व्वज्ञ भिन्न अन्य व्यक्ति धर्म्माधर्म्मके उपदेश करनेमें समर्थ होसकता ? ॥ १६ ॥

अत्र प्रतिविधीयते यदभ्यधायि सद्भावग्राहकस्य प्रमाणपञ्चकस्य तत्रानुपसन्नादिति तदयुक्तं तत्सद्भावादेकस्यानुमानादेः सद्भावात्। तथाहि कश्चिदात्मा सकलपदार्थसाक्षात्कारी तदग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययत्वाद् यद्यद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्ध्यप्रत्ययं तत्तत्साक्षात्कारि । यथा अपगततिमिरादिप्रतिबन्धं लोचनविज्ञानं रूपसाक्षात्कारि । तदग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययश्च कश्चिदात्मा तस्मात् सकलपदार्थसाक्षात्कारीति ॥ १७ ॥

पूर्वोक्त प्रस्तावका प्रतिविधान होता है । पूर्वही कहा गया है सद्भाव ग्राहक प्रमाण पञ्चकका अनुपलब्धिके कारण कोई विशेष पुरुष भी सर्व [illegible] निश्चय नहीं हो सकता ? सो युक्त नहीं, कारण यह है जो एक अनुमान प्रमाणही वह [illegible] सकता है इस समय इस प्रकार अनुमान होता है जो कोई एक आत्माही सब प[illegible] साक्षात्कार करसकता है, जिस कारण आत्माको समस्त पदार्थ ग्रहण करनेका सामर्थ्य है सब उसका

प्रतिबन्धक (रुकावटे) नाश पाये हैं, अर्थात् आत्माका किसी प्रकार प्रतिबन्धक नहीं और इसमें इस प्रकार व्याप्ति स्थिर है जो जो पदार्थ ग्रहण स्वभावशाली होकर क्षीण प्रतिबंध होता है उसी उसी पदार्थको साक्षात्कार करसकते हैं । जिसप्रकार अकारादि प्रति बन्ध हट जानेसे चक्षुरूपका साक्षात्कार करता है । कोई आत्माभी वस्तु साक्षात्कार स्वभावशाली होकर प्रतिबन्ध विहीन होसकता है, अतएव वही आत्मा सकलपदार्थका साक्षात्कारी है ॥ १७ ॥

तावदशेषार्थग्रहणस्वभावत्वमात्मनोऽसिद्धं चोदनाबलान्निखिलार्थज्ञानात् नान्यथानुपपत्त्या सर्वमनैकान्तात्मकं, सत्त्वादिति व्याप्तिज्ञानोत्पत्तेश्च । चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्म व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थमवगमयतीत्येवंजातीयकै रध्वरमीमांसागुरुभिर्विधिप्रतिषेधविचारणानिबन्धनं सकलार्थविषयज्ञानं प्रतिपद्यमानैः सकलार्थग्रहणस्वभावकत्वमात्मनाऽभ्युपगतम् । न चाखिलार्थप्रतिबन्धकावरणप्रक्षयानुपपत्तिः सम्यग्दर्शनादित्रयलक्षणस्यावरणप्रक्षयहेतुभूतस्य सामग्रीविशेषस्य प्रतीतत्वात् अनया मुद्रयापि क्षुद्रोपद्रवा विद्राव्याः ॥१८॥

वास्तविक आत्माका अशेषार्थ ग्रहणका स्वभाव असिद्ध नही है, जिसकारण चोदनाके बलसे निखिलार्थ ज्ञान प्रयुक्त अन्य किसीप्रकार भी उपपत्ति नहीं । आत्माकी चोदना ही अतीत व वर्त्तमान भविष्यत् विषय सब एवं सूक्ष्म, व्यवहित और विप्रकृष्ट प्रभृति पदार्थका, ज्ञान उत्पन्नकरता है । अत एव जो लोग अध्वर मीमांसाके गुरु एवं विधि और प्रतिषेध विचार निबन्धन सकलार्थ ज्ञान निबन्धन करते हैं, वे ही लोग आत्माके सकलार्थ ग्रहण स्वीकार करते हैं । आत्मा जो सकलार्थ ग्रहण कर सकता है, उसमें प्रतिबन्धकस्वरूप आवरण क्षयकीभी अनुपपत्ति नही, जिसकारण सम्यक् दर्शनादि लक्षण एवं आवरण क्षयको हेतुभूत सामग्री विशेषकी प्रतीति है ॥ १८ ॥

नन्वावरणप्रक्षयवशादशेषविषयं विज्ञानं विशदं मुख्यप्रत्यक्ष प्रभवतीत्युक्तं तदयुक्तं तस्य सर्वज्ञस्यानादिमुक्तत्वेनावरणस्यैवासम्भवादिति चेत्तन्न अनादिमुक्तत्वस्यैवासिद्धेर्न सर्वज्ञोऽनादिमुक्तः मुक्तत्वादितरमुक्तवत् बद्धापेक्षया च मुक्तव्यपदेशः तद्रहिते चास्याप्यभावः स्यादाकाशवत् । नन्वनादेः क्षित्यादिकार्य

परम्परायाः कर्तृत्वेन तत्सिद्धिः । तथाहि क्षित्यादिकं सकर्तृकं कार्य्यत्वाद् घटवदिति तदप्यसमीचीनं कार्य्यत्वस्यैवासिद्धेः । न च सावयवत्वेन तत्साधनमित्यभिधातव्यं यस्मादिदं विकल्पजालमवतरति ॥ १९ ॥

और आवरण क्षयवशतः सब विषयही प्रत्यक्षीभूत होजाता है, यह कहातो गया है. किन्तु वह युक्तियुक्त नहीं. कारण यह है जो सर्व्वज्ञ आत्मा अनादि और अनन्त, उसका किसीप्रकार आवरण सम्भव नहीं । यहभी नहीं कहा जासकता, जिसकारण अनादिका भी मुक्तत्व असिद्ध है । इतर मुक्तकी नाई सर्व्वज्ञअनादिभी मुक्त नहीं है, जिस बद्धापेक्षामेंही मुक्तका व्यपदेश होता है जिसका बन्धन नहीं उसको मुक्त नहीं कहा जाता, इससमय यदि कहो जो. सर्व्वज्ञ अनादि होनेपरभी क्षित्यादि कार्य्य पदार्थसमूहका कर्तृत्वप्रयुक्त उसकी मुक्तत्वसिद्धि है, क्षित्यादिपदार्थ सब सकर्तृक हैं जिसकारण वे सब घटादिकी नाई कार्य्य हैं, यहभी समीचीन मत नहीं है. जिसकारण कार्यत्वकी असिद्धि है, यहभी नहीं कहा जाता, जिसकारण वे इस विकल्पज्ञानसे उत्तीर्ण है ॥ १९ ॥

सावयवत्वे किमवयवसंयोगित्वम्, अवयवसमवायित्वम्, अवयवजन्यत्वम्, समवेतद्रव्यत्वं, सावयवबुद्धिविषयत्वं वा । न प्रथमः आकाशादावनैकान्त्यात् । न द्वितीयः सामान्यादौ व्यभिचारात् । न तृतीयः साध्याविशिष्टत्वात् । न चतुर्थः विकल्पयुगलार्गलग्रहगलत्वात् समवायसम्बन्धमात्रवद्द्रव्यत्वं समवेतद्रव्यत्वम् अन्यत्र समवेतद्रव्यत्वं वा विवक्षितं हेतुक्रियते । आद्ये गगनादौ व्यभिचारः, तस्यापि गुणादिसमवाय त्त्व द्रव्यत्वयोः संभवात् । द्वितीये साध्याविशिष्टता अन्यशब्दार्थेषु समवायकारणभूतेष्ववयवेषु समवायस्य साधनीयत्वात् । अभ्युपगम्यैतदभाणि वस्तुतस्तु समवाय एव न समस्ति प्रमाणाभावात् । नापि पञ्चमः आत्मादिनानैकान्त्यात् तस्य सावयवबुद्धिविषयत्वेऽपि कार्य्यत्वाभावात् । नच निरवयवत्वेऽप्यस्य सावयवार्थसम्बन्धेन, सावयवबुद्धिविषयत्वमौपचारिकमित्येष्टव्यं निरवयवत्वे व्यापित्वविरोधात् परमाणुवत् । किञ्च

किमेकः कर्त्ता साध्यते किं वा स्वतन्त्रः ॥ प्रथमे प्रासादादौ व्यभिचारः स्थपत्यादीनां बहूनां पुरुषाणां तत्र कर्तृत्वोपलम्भादनेनैव सकलजगज्जननोत्पत्तावितरवैयर्थ्यञ्च ॥ २० ॥ २१ ॥

इस समय आशङ्का होती है जो सावयवत्व क्या है ? यह क्या अवयवसंयोगत्व, अवयवसमवायित्व अवयवजन्यत्व अथवा सावयव बुद्धिविषयत्व ? प्रथम अर्थात अवयवसंयोगित्व हो नहीं सकता। क्योंकि, अवयवसंयोगित्व होनेसे आकाशादिमें अनैकान्तत्व घटता है। अर्थात् आकाश नित्यपदार्थ है वह किसप्रकार कार्य्य होसकता है ? द्वितीय अर्थात् अवयवसमवायित्व भी हो नहीं सकता। क्योंकि, ऐसा होनेसे जाति प्रभृतिमें व्यभिचार घटता है अर्थात् जातिप्रभृति भी नित्य पदार्थह सुतरां वह भी किस प्रकार कार्य्य होसकता है ? तृतीय अर्थात् जन्यत्व भी नहीं होसकता अर्थात् ईश्वर निरवयव है। उसे और अवयवी पदार्थका किस प्रकार आविर्भाव होसकता ? चतुर्थ अर्थात् समवेतद्रव्यत्व भी नहीं होसकता। क्योंकि,समवेत द्रव्यत्व कहनेसे दो सन्देह रूप अर्गल ग्रह होजाताहै, प्रथम समवाय सम्बन्ध मात्रवत् द्रव्यत्व ही क्या समवेत द्रव्यत्व, न अन्यत्र समवेत द्रव्यत्व कोही समवेत द्रव्यत्य कहा है, इस प्रकार हेतु उपन्यस्त होसकता है आद्य अर्थात् समवाय सम्बन्ध मात्रवत् द्रव्यत्व कहनेसे आकाशादिमें व्यभिचार घटता है। क्योंकि आकाशका गुणादि समवायत्व और द्रव्यत्व दोनोंही हैं। द्वितीय कहनेसे साध्यकी अविशिष्टना होतीहै। क्योंकि, समवायका कारणभूत अवयव समूहमें समवायका साधनीयत्व होजाताहै ये सब मान कर कहा है,वस्तुतः समवाय ही नही है। क्योंकि,इसके अस्तित्व सम्बन्धमें कोई प्रमाण नहीं है, पञ्चम अर्थात् सावयव बुद्धि विषयत्व भी नही होसकता। क्योंकि ऐसा होनेसे आत्मादिके साथ अनैकान्तत्व दोष घटता है। पक्षान्तरमें, आत्माको सावयव बुद्धि विषय कहकर स्वीकार करनेपरभी वे कभी कार्य्य नहीं होसकते ॥ २० ॥ २१ ॥

तदुक्तं वीतरागस्तुतौ--
कर्त्तास्ति नित्यो जगतः स चैकः
न सर्वगः सन् स्ववशः स सत्यः।
इमाः कुहेयाः कुविडम्बनाः स्यु-
स्तेषां न येषामनुशासकस्त्वमिति ॥ २२ ॥

वीतराग स्तुतिमे वह कहा गया है। जैसे—जगत्का जो कर्त्ता है वह नित्य और एक है एवं वह सर्वज्ञ है, स्ववशहै, और सत्य स्वरूप है इसप्रकार यदि माना जावे तो अन्यान्य जो सब कर्त्ताका अनुशासकत्व नहीं, उन सबकी कुविडम्बना होजाती है ॥ २२ ॥

अन्यत्रापि—

कर्त्ता न तावदिह कोऽपि यथेच्छया वा
दृष्टोऽन्यथा कटकृतावपि तत्प्रसङ्गः ।
कार्य्यं किमत्र भवतापि च तक्षकाद्यै-
राहत्य च त्रिभुवनं पुरुषः करोतीति ॥ २३ ॥

अन्यत्रभी कहा है जो, इस संसारका कोई यथेच्छासे कर्त्ता नहीं है, क्योंकि, कुम्भकार के कार्य्यमें उसप्रसंगका अन्यथाभाव दीखपडता है । और पुरुषने क्या तुमको और सूत्रधरादिको एकत्र समवेत करके इस त्रिभुवनकी सृष्टिकरलियी है ? ॥ २३ ॥

तस्मात् प्रागुक्तकारणत्रितयबलादावरणक्षये सार्वज्ञ्यं युक्तम् । न चास्योपदेष्टृन्तराभावात् सम्यग्दर्शनादित्रितयानुपपत्तिरिति भणनीयं पूर्वसर्वज्ञप्रणीतागमप्रभवत्वादमुष्यशेषार्थज्ञानस्य । न चान्योन्याश्रयतादिदोषः आगमसर्वज्ञपरम्पराया बीजाङ्कुरवदनादित्वाङ्गीकारादित्यलम् ॥ २४ ॥


अत्रापेक्षाविहीनानां जडानां कारणत्वं दूष्यतीत्यपरितुष्यन्तो मतान्तरमन्विष्यन्तः परमेश्वरेच्छावशादेव जगन्निर्माणं परिघुष्यन्तःस्वसंवेदनोपपत्त्यागमसिद्धप्रत्यगात्मतादात्म्ये नानाविधमानमेयादिभेदाभेदशालिपरमेश्वरोऽनन्यमुखप्रेक्षित्वलक्षणस्वातन्त्र्यभाक् स्वात्मदर्पणे भावान् प्रतिबिम्बवदभासयादिति भणन्तो बाह्याभ्यन्तरचर्य्याप्राणायामादिक्लेशप्रयासकलावैधुर्य्येण सर्वसुलभमभिनवं प्रत्यभिज्ञामात्रं परापरसिद्ध्युपायमभ्युपगच्छन्तःपरे माहेश्वराः प्रत्यभिज्ञाशास्त्रमभ्यस्यन्ति। तस्येयत्तापि न्यरूपि परीक्षकैः०

सूत्रं वृत्तिर्विवृतिर्लघवी बृहतीत्युभे विमर्शिन्यौ।
प्रकरणविवरणपञ्चकमिति शास्त्रं प्रत्यभिज्ञायाः॥

तत्रेदं प्रथमं सूत्रम्—

कथञ्चिदासाद्य महेश्वरः स्या-
दास्यं जनस्याप्युपकारमिच्छन्।
समस्तसम्पत्समवाप्तिहेतुं
तत्प्रत्यभिज्ञामुपपादयामीति ॥ १ ॥

प्रत्यभिज्ञा शास्त्रका अभ्यास करते हैं। परीक्षकलोगोंने उसका होनेसे निरूपण किया है। जैसे,-सूत्र, वृत्ति, लघु, और बृहद् भेदसे दो प्रकारकी विवृति, प्रकरण और विवरण, ये पांच विषय लेकर, प्रत्यभिज्ञाशास्त्रका संकलन हुआ है-उनमें, प्रथमसूत्र यह है,-किसी प्रकार महेश्वरका दासत्व पाना और लोगोंकी उपकारकामना कर, सम्पूर्ण सम्पत्प्राप्तिके लिये यह प्रत्यभिज्ञा उपपादित करता हूं ॥ १ ॥

कथञ्चिदिति परमेश्वराभिन्नगुरुचरणारविन्दयुगलसमाराधनेन परमेश्वरघटितेनैवेत्यर्थः। आसाद्येति आ समन्तात् परिपूर्णतया सादयित्वा स्वात्मोपभोग्यतां निरर्गलां गमयित्वा तदनेन विदितवेद्यत्वेन परार्थशास्त्रकरणेऽधिकारो दर्शितः ॥ २ ॥

यहां किसीप्रकार महेश्वरसे अभिन्न गुरुके चरणारविन्द युगल अच्छीप्रकार आराधनाद्वारा यह आराधना उस परमेश्वरके प्रसाद घटित समझना होगा। आसादन-शब्दसे सर्व्वथा वा शून्य और परिपूर्णरूपसे स्वकीय उपभोग योग्य करलेना। इसकेद्वाराभी विदित वेद्यत्व वशात् पदार्थशास्त्रकरनेमें जो अधिकारमें है, सो दिखलाया गया। अर्थात् मैं जब महेश्वर ही की कृपासे गुरुकी करुणासे उस महेश्वरका पूर्ण दासत्व लाभ करनेमें समर्थ हुआ हूं तो जो कुछ जानना है वह सब मुझे विदित होगया है। उसीके प्रभावसे परके शास्त्रप्रणयन करनेमें मुझे सम्पूर्ण अधिकार हुए है। क्योंकि, शास्त्रप्रणयन इसप्रकार सर्व्वज्ञता सापेक्ष यही इसस्थानका भावार्थहै ॥ २ ॥

अन्यथा प्रतारणमेव प्रसज्येत। मायोत्तीर्णा अपि महामायाधिकृता विष्णुविरिञ्चाद्या यदीयैश्वर्य्यलेशेनेश्वरीभूताः स भगवाननवच्छिन्नप्रकाशानन्दस्वातन्त्र्यपरमार्थो महेश्वरः। तस्य दास्यं दीयतेऽस्मै स्वामिना सर्वं यथाभिलषितमिति दासः परमेश्वरस्वरूपस्वातन्त्र्यपात्रमित्यर्थः ॥ ३ ॥

पुनः विदितवेद्य न होनेसे, प्रतारणाकी अवतरणा होती। कहनेमें क्या, जो मायाको पार करनेपरभी माहामायाके अधिकृतहै, वह विष्णु और ब्रह्मामभृति अमर प्रधान वर्ग जिसके ऐश्वर्यका कणमात्र पानेसे भी सबका ईश्वर होजाते हैं; सो वही भगवान् महेश्वर हैं। वह सर्वदेश, सब काल, सब अवस्थामें प्रकटहैं। उसके आनन्दका नामनहीं है। उसका स्वातन्त्र्य और परमार्थही अनवच्छिन्नहै। उसीका दासत्व। स्वामिकर्तृक सबप्रकार अभिलषित जिसको दियाजाता है उसका नाम दास। सुतरां यहां महेश्वरका दास कहनेसे उसीका स्वरूप स्वातन्त्र्यपात्र समझना चाहिये ॥ ३ ॥

जनशब्देनाधिकारिविषयनियमाभावः आदर्शि । यस्य यस्य हीदं स्वरूपकथनं तस्य तस्य महाफलं भवति प्रधानस्यैव परमार्थफलत्वात् ॥ ४ ॥

पुनः यहां लोकशब्द प्रयोगकर, अधिकारी विषयक नियमाभाव प्रदर्शित हुआ है। अर्थात् जिस २ व्यक्तिके निकट इसप्रकार स्वरूप कहा जाता है, उन २ लोगोंका बड़ा फल होता है। इसविषयमें व्यक्तिभेद नहीं है। तो, प्रधानहीका परमार्थ फललाभ होता है ॥४॥

तथोपदिष्टं शिवदृष्टौ परमगुरुभिर्भगवत्सोमानन्दनाथपादैः—

एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः ।
ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना ॥
करणेन नास्ति कृत्यं क्वापि भावनया सकृत् ।
ज्ञाते सुवर्णे करणं भावनां वा परित्यजेदिति ॥ ५ ॥

सोमानन्दनाथने शिवदृष्टिमें कहाहै कि, शास्त्रसे वा गुरुमुखसे एकबार प्रमाण और प्रतिपत्ति सहकारसे दृढ़रूपसे सर्व्वव्यापी शिवस्वरूप जाननेपर और करणद्वारा किसीप्रकार कार्य्यकरना नही होता, कहीं किसी प्रकारकी भावनाभी नहीं रहती। सुवर्णपरिज्ञान होनेपर करण और भावना दोनों ही त्याग करना चाहिये ॥ ५ ॥

अपिशब्देन स्वात्मनस्तदभिन्नतामाविष्कुर्वता पूर्णत्वेन स्वात्मनि परार्थसम्पत्त्यतिरिक्तप्रयोजनान्तरावकाशश्च पराकृतः। परार्थश्च प्रयोजनं भवत्येव तल्लक्षणयोगात् न ह्ययं देवशापः स्वार्थ एव प्रयोजनं न परार्थ इति। अत एवोक्तमक्षपादेन—

यमर्थमधिकृत्य प्रवर्त्तते तत प्रयोजनमिति ॥ ६ ॥

पाकर, सर्व्वथा पूर्णकाम हुआ हूं । इसकारण इससमय दूसरेका उपकार करना भिन्न, मे निजका और कोई स्वार्थ वा प्रयोजन नही । यह भी शब्द प्रयोगका भावार्थ है उसी प्रकार परार्थ ही प्रयोजन होजाताहै, इस प्रकार लक्षणनिर्देश किया है । स्वार्थ साक्षात् देवशाप है सुतरां वह प्रयोजन नही हो सकता । परार्थ ही प्रयोजन होता है । इसी कारण अक्षपाद कहा है, जिस अर्थका अधिकार कर, प्रवृत्त होता है वही प्रयोजन है ॥ ६ ॥

उपशब्दः सामीप्यार्थः । तेन जनस्य परमेश्वरसमीपताकरणमात्रं फलम् । अतएवाह समस्तेति, परमेश्वरतालाभे हि सर्वाः सम्पदस्तन्निष्यन्दमय्यः सम्पन्ना एव रोहणाचललाभे रत्नसम्पद इव । एवं परमेश्वरतालाभे किमन्यत् प्रार्थनीयम् ।

तदुक्तमुत्पलाचार्य्यैः—

भक्तिलक्ष्मीसमृद्धानां किमन्यदुपयाचितम् ।

एतया वा दरिद्राणां किमन्यदुपयाचितमिति ॥ ७ ॥

उपकारका अर्थ यह है जो, उप शब्दसे सामीप्य, उसके द्वारा लोगोंका परमेश्वर समीपत करणमात्रही फल । इसी लिये कहा है, सम्पूर्ण सम्पत् पानेके लिये इत्यादि । इसका भावा यह है जो, परमेश्वरत्व मिलनेपर, सम्पूर्ण सम्पत् उसकी प्रसन्नतासे मिल जातीहै । क्योंकि सम्पत् सब उसीसे उत्पन्न होती है । इसकारण रोहणाचल मिलनेपर, जिसप्रकार रत्नसम्प मिलती है, उसी प्रकार उसको प्राप्त होता है, उस २ सम्पतका अधिकारी होजाता है इसप्रकार परमेश्वरत्व मिलनेपर और क्या मांगना पडेगा? उत्पलाचार्यनेभी कहा है,—ज लोग भक्तिरूप लक्ष्मीही मे परमधनी है, उनको और क्या चाहना पडेगा ? उसी प्रकार ज लोग इसविषयमें दरिद्र उन लोगोंहीको या और क्या अपयाचितहै? इसका भावार्थ यह है जो लोग भक्त ईश्वर उन लोगोंकी सब मनोकामना पूर्ण करते है और जो लोग अभक्तहैं, उ सबको चिरकालहीसे अभाव है । इसकारण उन लोगोंको चिरकालसे आशा और वास प्रभृतिका दुर्व्वहदासत्व वनकर, पद २ मेही अवसन्न, (वेहोश) विपन्न, और नगण रोना पडता है ॥ ७ ॥

इत्थं षष्ठीसमासपक्षे प्रयोजनं निर्दिष्टम् । बहुव्रीहिपक्षेतूपायः समस्तस्य बाह्याभ्यन्तरस्य नित्यसुखादेर्या सम्पत्सिद्धिः तथात्वप्रकाशः तस्याः सम्यगवाप्तिर्यस्याः प्रत्यभिज्ञाया हेतुः सा तथोक्ता तस्य महेश्वरस्य प्रत्याभिज्ञा प्रतिमाभिमुख्येन ज्ञानम् ।

लोके हि स एवायं चैत्र इति प्रतिसन्धानेनाभिमुखीभूते वस्तुनि ज्ञानं प्रत्यभिज्ञेति व्यवह्रियते । इहापि प्रसिद्धपुराणसिद्धागमानुमानादिज्ञातपरिपूर्णशक्तिके परमेश्वरे सति स्वात्मन्यभिमुखीभूते तच्छक्तिप्रतिसन्धानेन ज्ञानमुदेति नूनं स एवेश्वरोहमिति । तामेतां प्रत्यभिज्ञामुपपादयामि । उपपत्तिः सम्भवः सम्भवतीति तत्समर्थाचरणेन प्रयोजनव्यापारेण सम्पादयामीत्यर्थः । यदीश्वरस्वभाव एवात्मा प्रकाशते तर्हि किमनेन प्रत्यभिज्ञाप्रदर्शनप्रयासेनेति चेत् तत्रायं समाधिः स्वप्रकाशतया सततमवभासमानेऽप्यात्मनि मायावशाद्भागेन प्रकाशने पूर्णतावभाससिद्धये दृक्क्रियात्मकशक्त्याविष्करणेन प्रत्यभिज्ञा प्रदर्श्यते । तथा च प्रयोगः अयमात्मा परमेश्वरो भवितुमर्हति ज्ञानक्रिया शक्तिमत्त्वात् यो यावति ज्ञाता कर्त्ता च स तावतीश्वरः प्रसिद्धेश्वरवत् राजवद्वा आत्मा च विश्वज्ञाता कर्त्ता च तस्मादीश्वरोऽयमिति अवयवपञ्चकस्याश्रयणं मायावादेन नैयायिकमतस्य कक्षीकारात् ॥ ८ ॥

जो हो; इसप्रकार षष्ठीसमास करनेपर पक्षमें प्रयोजन निर्दिष्ट होनेपर, अधुना बहुव्रीहि समास पक्षमें प्रयोजन निर्दिष्ट होता है । जैसे, समस्त सम्पत् पानेके लिये, । उसका बहुव्रीहिसमासमें अर्थ यह हुआ जो, सम्पूर्ण सम्पत् पानाही जिसका हेतु, तादृशी [illegible] भिज्ञा । यहां सम्पूर्णबाह्य और आभ्यन्तर भेदमें जो कुछ नित्यसुखादि उसकी । सम्पत् सिद्धि है अर्थात् उसके स्वरूपमें प्रकाश है, उसीकी सम्यक् प्राप्ति है, यही प्रत्यभिज्ञाका हेतु है वह प्रत्यभिज्ञा इसवाक्यके अन्तर्गत तत शब्दसे महेश्वर उसीकी प्रत्यभिज्ञा समझनी चाहिये । प्रत्यभिज्ञा शब्दसे प्रतिमाभिमुख्यज्ञान सो यह चैत्र, इत्यादि । प्रतिसन्धान द्वारा अभिमुखीभूत वस्तुमें जो ज्ञान, उसीका नाम लोकव्यवहारमें प्रत्यभिज्ञा है । यहां भी प्रसिद्ध पुराण और सिद्ध आगम एवं अनुमानादिद्वारा जिसकी परिपूर्णशक्ति परिज्ञात होजाती है, वही परमेश्वर स्वात्मामें अभिमुख होनेपर, उसकी शक्तिके सन्धानद्वारा इसप्रकार ज्ञानका उदय होता है, मैं निश्चय ही वही ईश्वर हूं । वह इस प्रत्यभिज्ञाको उपपादित करती है उपपत्ति शब्दसे सम्भव होता है, कहनेसे, उसके समर्थका आचरण प्रयोजन व्यापा-

रकी सहायतासे सम्पादन करती है । यही उपपादितका अर्थ है । यदि कहो कि, ईश्वर स्वभावही आत्मा प्रकाशित होता है । सुतरां प्रत्यभिज्ञा दिख लानेरूप परिश्रम करनेसे प्रयोजन क्या ? इसका समाधान यह है । जो, आत्मा स्वतः सिद्ध प्रकाश सम्पन्न है । सुतरां, सतत प्रकट होनेपरभी मायावशात् भागशः प्रकाशित होता है, पूर्णता प्रकट नहीं होसकता । उसी पूर्णताका अभावसे सिद्धिही दृक् क्रियात्मक शक्तिका आविष्करणसे प्रत्यभिज्ञा प्रदर्शन किया जाता है । उसी प्रकार इसका प्रयोग यह है जो यह आत्मा ज्ञान क्रिया शक्तिसम्पन्न कहनेसे ईश्वर हो सकता है । इसके दृष्टान्त प्रसिद्ध ईश्वर या राजा है । आत्मा विश्वका ज्ञाता और कर्त्ता है सुतरां यहां ईश्वर है । इत्यादि मायावादसे नैयायिक मत स्वीकार करनेपर अनुरूप अवयवपञ्चकका आश्रय होता है । इस प्रकार एक आत्मा मायावशात् पांच प्रकारके आकार परिग्रह करनेपर प्रत्यभिज्ञाके विना उसका स्वरूप निर्देशको साध्यक्या ? इसीकारण प्रत्यभिज्ञाप्रदर्शन करें आयास माननेका प्रयोजन है ॥ ८ ॥

तदुक्तमुदयकरसूनुना—

कर्त्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे ।

अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः ॥ ९ ॥

उदयकरण सूनुनेभी कहा है—जो कर्त्ता, ज्ञाता, स्वात्मा और अनादि सिद्ध उस महेश्वरमें कौन बुद्धिमान व्यक्ति विधि वा निषेध आरोप करसकताहै ॥ ९ ॥

किन्तु मोहवशादस्मिन्दृष्टेऽप्यनुपलक्षिते ।

शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते ॥ १० ॥

किन्तु मोहवशसे इसको देखकर भी देखा नहीं जाता । इसीकारण शक्तिका आविष्करण पूर्वक यह प्रत्यभिज्ञा उपदर्शित होती है ॥ १० ॥

तथाहि—

सर्वेषामिह भूतानां प्रतिष्ठा जीवदाश्रया ।

ज्ञानं क्रिया च भूतनां जीवतां जीवनं मतम् ॥ ११ ॥

उसी प्रकार समुदाय भूतगणकी प्रतिष्ठाही आश्रय एवं साक्षात् जीवनदायिनी । ज्ञान और क्रियाही जीवितभूतगणका जीवन कहकर परिगणित होता है ॥ ११ ॥

तत्र ज्ञानं स्वतःसिद्धं क्रिया कर्त्राश्रिता सती ।

परैरप्युपलक्ष्येत तयान्यज्ज्ञानमुच्यत इति ॥ १२ ॥

इनमें ज्ञान स्वतःसिद्ध और क्रिया इसके आश्रित है ॥ १२ ॥

या चैषां प्रतिभा तत्तत्पदार्थक्रमरूषिता ।
अक्रमानन्दचिद्रूपः प्रमाता स महेश्वर इति च ॥ १३ ॥

इनसबकी प्रतिभा उस २ पदार्थके क्रमरूपसे आविर्भूत होता है । किन्तु महेश्वर प्रमाता एवं सर्व्वप्रकार क्रमरहित, आनन्दस्वरूप साक्षात् चिद्रूप है ॥ १३ ॥

सोमानन्दनाथपादैरपि—
सदा शिवात्मना वेत्ति सदा वेत्ति सदात्मना इत्यादि ॥१४॥

सोमानन्दनाथपादनेभी कहा है,—सर्व्वदा शिवात्मद्वारा अवगत होता है एवं सर्व्वदा सदात्मकद्वारा विदित होता है अर्थात् लोकमे शिवस्वरूप और साक्षात् महेश्वर स्वरूप होनेपर भी, सदा सब विषय परिज्ञात होता है ॥ १४ ॥

ज्ञानाधिकारपरिसमाप्तावपि ।
तदैक्येन विना नास्ति संविदां लोकपद्धतिः ।
प्रकाशैक्यात्तदेकत्वं मातैकः स इति स्थितः ॥ १५ ॥

ज्ञानाधिकार परिसमाप्तिमें भी कहाहै, उस महेश्वरके साथ एकत्व न घटनेपर, संवित् कभी स्वप्रकाश मात्र वा प्रस्फुरित होकर अपने विषयग्रहणमें समर्थ नहीं होता । वही महेश्वरही एकमात्र प्रमाता है । प्रकाशकी एकता होनेपर उसका एकत्व घटता है ॥ १५ ॥

स एवार्थभृशत्वेन नियतेन महेश्वरः ।
विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यत इति ॥ १६ ॥

वही महेश्वर नियत सर्व्वार्थमय है । सर्व्वथा शुद्धस्वरूप ज्ञान और क्रिया उसीका विमर्शस्वरूप है ॥ १६ ॥

विवृतं चाभिनवगुप्ताचार्य्यैः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुत्या प्रकाशचिद्रूपमहिमा सर्वस्य भावजातस्य भासकत्वमभ्युपेयते । ततश्च विषयप्रकाशस्य नीलप्रकाशः पीतप्रकाश इति विषयोपरागभेदाद्भेदः । वस्तुतस्तु देशकालाकारसङ्कोचवैकल्यादभेद एव स एव चैतन्यरूपः प्रकाशः प्रमातेत्युच्यते ॥ १७ ॥

शभाव पाया है, इत्यादिवाक्यानुसार, प्रकाशचिद्रूप महिमाकी सहायतासे सब सृष्टि उत्पन्न पदार्थका भासकत्व अभ्युपेत होता है। अर्थात्, वह प्रकाश स्वरूप, और चिद्रूप। उसीसे सम्पूर्ण संसारकी प्रकाशकता सम्पन्न होती है, यह स्पष्टही जानाजाता है। पुनः, उसीसे-नीलप्रकाश और पीतप्रकाश इत्यादि विषयोपरागभेदसे भिन्न २ प्रकारका विषय प्रकाश संघटित होता है। वस्तुतः, देश, काल, आकार, इन सबके संकोचकी वैकल्पतासे उसमें कोई प्रकार भेद वा द्वैतभाव नही। वही साक्षात् चैतन्य, साक्षात् प्रकाश और साक्षात् प्रमाता कहकर परिगणित होता है ॥ १७ ॥

तथा च पठितं शिवसूत्रेषु "चैतन्यमात्मेति"। तस्य चिद्रूपत्व मनवच्छिन्नविमर्शत्वमनन्योन्मुखत्वमानन्दैकघनत्वं माहेश्वर्य्यमिति पर्य्यायः स एव ह्ययं भावात्मा विमर्शः शुद्धे पारमार्थिक्यौ ज्ञानक्रिये। तत्र प्रकाशरूपता ज्ञानं स्वतो जगन्निर्मातृत्वं क्रिया। तच्च निरूपितं क्रियाविकारे—

एष चानन्दशक्तित्वादेवमाभासयत्यमून्।
भावानिच्छावशादेषा क्रियानिर्मातृताऽस्य सेति ॥ १८ ॥

शिवसूत्रमें कहाहै, जो आत्मा चैतन्यस्वरूप है, यहां आत्मा शब्दसे महेश्वर चिद्रूपत्व, अनवच्छिन्न विमर्शत्व, अनन्योन्मुखत्व एवं आनन्दैकघनत्वही महेश्वरत्व है। वही भावात्मा, अर्थात् सम्पूर्ण सृष्टपदार्थका स्वरूप है। वही विमर्श स्वरूपहै। वही परम निर्म्मल और पारमार्थिक ज्ञान और क्रिया इन दो प्रकारका स्वरूप है। उनमें ज्ञानशब्दसे प्रकाशरूपता एवं क्रियाशब्दसे अन्यदीय सहाय निरपेक्ष होकर, संसार निर्म्माण कर्तृत्व है। क्रियाधिकारमें भी निरूपण कियाहै,—वह आनन्द शक्तिस्वरूप है। उसके प्रभावसे इच्छाक्रमसे भुवनादि समुदाय भावजात अवभासित करता है। यही उसकी निर्म्मातृ क्रिया है ॥ १८ ॥

उपसंहारेऽपि—

इत्थं तथा घटपटाद्याकारजगदात्मना।
तिष्ठासोरेवमिच्छैव हेतुकर्तृकृता क्रियेति ॥ १९ ॥

उपसंहारमें कहाहै जो, इस प्रकार सुप्रसिद्ध घटपटादिके आकारविशिष्ट जगत् स्वरूपसे अवस्थिति करनेके लिये उसकी इच्छा होती है। यही हेतुकर्तृता क्रियाहै ॥ १९ ॥

तस्मिन् सतीदमस्तीति कार्य्यकारणतापि या।
सा व्यपेक्षाविहीनानां जडानां नोपपद्यते ॥ २० ॥

वही सत्स्वरूप महेश्वरमें इसप्रकार जो कार्य्य करणता विद्यमान है, वह अपेक्षा विहीन जड़गणमें कभी उपपादित नहीं होती ॥ २० ॥

इति न्यायेन यतो जडस्य कारणता न वा अनीश्वरस्य चेतनस्यापि तस्मात्तेन तेन जगद्गतजन्मस्थित्यादिभावविकारतत्तद्भेदक्रियासहस्ररूपेण स्थातुमिच्छोः स्वतन्त्रस्य भगवतो महेश्वरस्येच्छैवोत्तरोत्तरमुच्चस्वभावा क्रिया विश्वकर्तृत्वं वोच्यत इति । इच्छामात्रेण जगन्निर्माणमित्यत्र दृष्टान्तोऽपि स्पष्टं निर्दिष्टः ।

योगिनामपि मृद्बीजे विनैवेच्छावशेन यत् ।
घटादि जायते तत्तत् स्थिरस्वार्थक्रियाकरमिति ॥ २१ ॥

इत्यादि न्यायानुसार, जिसकारण; जड़गणका और अनीश्वरचेतनका जिसप्रकार कारणता-नहीं, उसीकारण, स्वतन्त्रस्वरूप भगवान्महेश्वर उस उस जगद्गत जन्म स्थिति प्रभृतिभाव-विकारका उस २ भेदक्रियामें हजारों प्रकारसे अवस्थिति करनेके लिये इच्छुक होनेपरभी, उसकी उस इच्छाको उत्तरोत्तर उच्चस्वभाव क्रिया या विश्वकर्तृत्व कहते हैं इच्छामात्रसे इस-प्रकार जो जगत्का निर्माण होजाताहै, उसका दृष्टान्तभी स्पष्ट निर्दिष्ट हुआ है:-योगियोंकी इच्छावशसे मृत्तिका और बीज विना घटादि उत्पन्न होजाताहै । इसीका नाम इच्छानुगामिणी-क्रियाशक्ति है ॥ २१ ॥

यदि घटादिकं प्रति मृदाद्येव परमार्थतः कारणं स्यात् तर्हि कथं योगीच्छामात्रेण घटादिजन्म स्यात् । अथोच्यते अन्य एव मृद्बीजादिजन्मा घटाङ्कुरादयो योगेच्छाजन्यास्त्वन्या एवेति । तत्रापि बोध्यसे सामग्रीभेदात्तावत् कार्य्यभेद इति सर्वजन-प्रसिद्धम् । ये तु वर्णयन्ति नोपादानं विना घटाद्युत्पत्तिरिति ॥ योगी त्विच्छया परमाणून् व्यापारयन् सङ्घटयतीति तेऽपि बोधनीयाः । यदि परिदृष्टकार्य्यकारणभावविपर्य्ययो न लभ्येत तर्हि घटमृद्दण्डचक्रादिदेह स्त्रीपुरुषसंयोगादिसर्वमपेक्षेत तथा च योगीच्छासमनन्तरसञ्जातघटदेहादिसम्भवो दुःसमर्थ एव स्यात् चेतन एव तु तथा भाति भगवान् भूरिभगो महा-

देवो नियत्यनुवर्त्तनोल्लङ्घनतरस्वान्तन्त्र्य इति पक्षे न काचिदनुपपात्तिः । अत एवोक्तं वसुगुप्ताचार्य्यैः–

निरुपादानसम्भारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कालाश्लाघ्याय शूलिन इति ॥ २२ ॥

यदि घटादिके उत्पत्तिमतिमृत्तिकादि परमार्थतः कारणहोता है, तो किसप्रकार योगीकी इच्छामात्रसे घटादिकी उत्पत्ति होजासकती ? यदि कहोकि मृत्तिका और बीजादिजनितघट और अंकुरादि, योगीकी इच्छाजनित है उस २ घटादिसे सम्पूर्ण भिन्नपदार्थ ऐसे होनेपरभी बुझना होगा कि सामग्री भेदसे कार्य्यमभेदहोजाता है; यह सर्व्वजनप्रसिद्ध है । पुनः जो लोग कहते हैं जो, उपादानके बिना घटादिकी उत्पत्ति नहीं होती । योगीकी इच्छावशतः परमाणुसबको व्यापारितकर संघटितकरते हैं, उनकी यह बात बुझना उचित है, यदि दृश्यमान कार्य्यकारणभाव विपर्य्यय नहीं होता, तो घट और मृद्दण्डचक्रादि देहमें सबप्रकारका व्यापारअपेक्षित होता है । और योगीकी इच्छामात्रसे समुद्भूतघटादि सम्भव दुःसमर्थ होजाता है । इसप्रकार चैतन्यस्वरूप भगवान् भूरिभगमहादेव नियतिका अनुवर्त्तन अतिक्रमकरके, निरवच्छिन्न स्वातन्त्र्यसहकारसे विहार करते हैं इसविषयमें किसीप्रकार अनुपपत्ति नहीं । इसी कारण वसुगुप्ताचार्य्यनें कहा है–जो किसीप्रकार उपादान सम्भार ग्रहण न करके अभित्तिहीमें यह जगद्रूपचित्र अङ्कित करते हैं, उस भगवान्महादेवको नमस्कार करताहूं ॥ २२ ॥

ननु प्रत्यगात्मनः परमेश्वराभिन्नत्वे संसारसम्बन्धः कथं भवेदिति चेत्तत्रोक्तमागमाधिकारे–

एष प्रमाता मायान्धः संसारी कर्मबन्धनः ।
विद्यादिज्ञापितैश्वर्यश्चिद्घनो मुक्त उच्यत इति ॥ २३ ॥

यदि कहो कि प्रत्यगात्मा परमेश्वरसे अभिन्न है तो उसका संसारबन्ध किसप्रकारहोताहै? आगमाधिकारमें इसविषयका समाधान किया है--यही प्रमाता मायावशसे मोहाच्छन्न होनेहीसे, कर्म्मबन्धनग्रस्त और उसका निर्बन्धनसंसारीहोते हैं । और जब विद्यादि सहायतासे ऐश्वर्य्यपरिज्ञात और निरवच्छिन्न चित्तसत्तामे आविष्ट होते हैं. तब मुक्त होजाते हैं ॥ २३ ॥

ननु प्रमेयस्य प्रमातृभिन्नत्वे बन्धमुक्तयोः प्रमेयं प्रति को विशेषः अत्राप्युत्तरमुक्तं तत्त्वार्थसंग्रहाधिकारे–

मेयं साधारणं मुक्तः स्वात्माभेदेन मन्यते ।
महेश्वरो यथा बद्धः पुनरत्यन्तभेदवादिति ॥ २४ ॥

यदि कहोकि, प्रमेय प्रमातासे अभिन्न है । सुतरां, प्रमेयके प्रतिबन्धमुक्तिका विशेष क्या? तत्त्वार्थसंग्रहाधिकारमें इसविषयमें भी उत्तरदियाहै:—आत्मा और मुक्तस्वरूप महेश्वर साधारण प्रमेयको अभेदसे ज्ञानकरता है । किन्तु जब उक्तरूपसे बद्धहोते हैं, तब पुनः अत्यन्त भेद तुल्य करते हैं ॥ २४ ॥

नन्वात्मनः परमेश्वरत्वं स्वाभाविकं चेन्मार्थः प्रत्यभिज्ञाप्रार्थनया न हि बीजमप्रत्यभिज्ञातं सति सहकारिसाकल्ये अङ्कुरं नोत्पादयति । तस्मात् कस्माद्धात्मप्रत्यभिज्ञाने निर्बन्ध इति चेदुच्यते । शृणु तावदिदं रहस्यं, द्विविधा ह्यर्थक्रिया बाह्याङ्कुरादिका प्रमातृविश्रान्तिचमत्कारसारा प्रीत्यादिरूपा च । तत्राद्या प्रत्यभिज्ञानं नापेक्षते, द्वितीया तु तदपेक्षत एव । इहाप्यहमीश्वर इत्येवम्भूतचमत्कारसारा परापरसिद्धिलक्षणजीवात्मैकत्वशक्तिविभूतिरूपार्थक्रियेति स्वरूपप्रत्यभिज्ञानमपेक्षणीयम् ॥२५॥

यदि कहो कि; आत्माका परमेश्वरत्व स्वभाव सिद्ध है । सुतरां प्रत्यभिज्ञा प्रार्थनाका प्रयोजन नहीं है, अप्रत्यभिज्ञातबीज क्या सहकारी सबको समवायसे अंकुर उत्पादन नहीं करता? अतएव किसलिये आत्मप्रत्यभिज्ञानमें निर्बन्ध? यह बात सत्यतो है । किन्तु इससम्बन्धमें रहस्य है । सो सुनो । अर्थ क्रिया दोप्रकारकी है प्रथम, बाह्यांकुरादिका और द्वितीय, प्रमातृ विश्रान्ति चमत्कार सारा और प्रीत्यादिरूपा है । उनमें प्रथम, प्रत्यभिज्ञानकी किसप्रकार अपेक्षा नहीं रखती । किन्तु द्वितीय, सर्व्वथा उसकी अपेक्षा करती । मैं भी वही ईश्वर इत्याकारमें एवं भूत जो चमत्कार सारा अर्थक्रिया परापर सिद्धरूप जीव और आत्मा दोनोंकी ऐक्यशक्ति विभूतिस्वरूप, उसमे प्रत्यभिज्ञान सर्व्वथा अपेक्षणीय होता है ॥ २५ ॥

ननु प्रमातृविश्रान्तिसारार्थक्रिया प्रत्यभिज्ञानेन विना दृष्टा सती तस्मिन् दृष्टेति क्व दृष्टम् । अत्रोच्यते, नायकगुणगणसंश्रवणप्रवृद्धानुरागा काचन कामिनी मदनविह्वला विरहक्लेशमसहमाना मदनलेखावलम्बं ननु स्वावस्थानिवेदनानि विधत्ते तथा वेगात् तन्निकटमटत्यपि तस्मिन्नवलोकितेऽपि तदवलोकनं तदीयगुण परामर्शाभावे जनसाधारणत्वं प्राप्ते हृदयङ्गमभावं न लभते । यदा तु मूर्त्तिवचनात् तदीयगुणपरामर्शं करोति तदा तत्क्षणमेव पूर्णभावमत्येति । एवं स्वात्मनि विश्वेश्वरात्मना भासमानेऽपि

तन्निर्भासनं तदीयगुणपरामर्शविरहसमयं पूर्णं भावं न सम्पादयति यदा तु गुरुवचनादिना सर्वज्ञत्वसर्वकर्तृत्वादिलक्षणपरमेश्वरोत्कर्षपरामर्शो जायते तदा तत्क्षणमेव पूर्णात्मतालाभः। तदुक्तं चतुर्थे विमर्शे-

तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके
कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा।
लोकस्यैष तथानपेक्षितगुणः स्वात्मापि विश्वेश्वरो
नैवायं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता इति ॥२६॥

यदि कहोकि, प्रमातृ विश्रान्तिसारा अर्थ क्रिया प्रत्यभिज्ञान विना नही दीखता यह कहां देखा और कैसे जाना? इसका उत्तर यह है जो नायकके गुणागुण सविशेष सुनकर अनुराग अत्यन्त बढकर कोई कामिनी मदन विह्वलाहो विरहक्लेश न सहनकर मदनलेखन अवलम्बन कर, अपनी अवस्थाका निवेदन करती है। एव वह नायक दृष्टिविषयमे उपस्थित होकर, मनके वेगसे उसके निकटमें भी भ्रमणकरताहै। किन्तु यदि नायकके गुणश्रवणका अभाव होता है, तो उसका अवलोकन जनसाधारणत्व प्राप्त होजाताहै, उसकामिनीका हृदयङ्गमभाव नही पासकता है। इसप्रकार स्वात्मा विश्वेश्वरात्मद्वारा भासमान होनेपरभी वह निर्भासन, उल्लिखित विश्वेश्वरात्माका गुणपरामर्श विरहसमयमे पूर्णभावसे परिणतनही होताहै। किन्तु जिससमय गुरुवचनादिद्वारा परमेश्वरका सर्व्वज्ञत्वभी सर्व्वकर्तृत्वादि स्वरूपउत्कर्ष परामृष्ट होताहै उससमय तत्क्षण पूर्णात्मताप्राप्त होती है। चतुर्थविमर्शमे यह विषय कहाहै:-नायकका गुण यदि जाना न जावे तो, सो साधारणलोकमें गण्य होजानेसे उस २उपयाचितद्वारा उपनीत और निकटमें अवस्थित होनेसे भी, कामिनीके मनोरञ्जनमें समर्थ नही होता, इसप्रकार महेश्वर स्वात्मस्वरूप होनेपरभी गुणपरामर्श विरहसे लोकके निकट निजवैभवप्रकाशपूर्वक उसका हृदयाकर्षण नहीं करता। इसीकारण प्रत्यभिज्ञाकी अवतारणा हुई है ॥ २६ ॥

अभिनवगुप्तादिभिराचार्य्यैर्विहितप्रतानोऽपि अयमर्थः संग्रहमुपक्रममाणैरस्माभिर्विस्तरभिया न प्रतानित इति सर्वं शिवम् ॥२७॥

इति सर्वदर्शनसंग्रहे प्रत्यभिज्ञादर्शनं समाप्तम् ॥ ८ ॥

अभिनवगुप्तादि आचार्यगणने इसविषयमें सविस्तार वर्णनकिया है। हमलोग केवल संग्रहमें प्रवृत्त हैं। इसकारण विस्तारभयसे इसविषयको अधिक न बढाकर यहीं समाप्त किया ॥२७॥

इति सर्वदर्शनसंग्रहमें प्रत्यभिज्ञादर्शन समाप्त हुआ ॥ ८ ॥

अथ रसेश्वरदर्शनम् ॥ ९ ॥

अपरे माहेश्वराः परमेश्वरतादात्म्यवादिनोऽपि पिण्डस्थैर्य्ये सर्वाभिमता जीवन्मुक्तिः सेत्स्यतीत्यास्थाय पिंडस्थैर्य्योपायं पारदादिपदवेदनीयं रसमेव सङ्गिरन्ते । रसस्य पारदत्वं संसारपरपारप्रमाणहेतुत्वेन । तदुक्तम्—

संसारस्य परं पारं दत्तेऽसौ पारदः स्मृत इति ॥ १ ॥

कोई २ माहेश्वरसम्प्रदायवाले परमेश्वरके तादात्म्यको मानकरभी, पिण्डस्थैर्यमें अर्थात् इसदेहको यदि किसीप्रकार अविकृत अवस्थामें रक्खाजाता, तो सब लोगोंके अभिमत जीवन्मुक्ति मिलसकती है, इस सहारेसे, पारदआदि शब्दवेद्य रसकोही पिण्डस्थैर्यका उपाय कहकर निर्देश करते हैं। क्योंकि, रस संसारका परपारप्राप्तिका कारण है। इसकारण उसका नाम पारद हुआ है उसीप्रकार कहा है:—संसारका परपार प्रदानकरता है, इसकारण पारद कहते हैं ॥ १ ॥

रसार्णवेऽपि—

पारदो गदितो यस्मात्परार्थं साधकोत्तमैः ।
सुप्तोऽयं मत्समो देवि मम प्रत्यङ्गसम्भवः ॥ २ ॥

रसार्णवमें कहा है:-- देवि ! यह मेरे समान एवं मेरेप्रत्यङ्गसे समुद्भूत हुआ है । इसलिये साधक श्रेष्ठ सुप्तस्वभाव इसको पारद कहते हैं ॥ २ ॥

मम देहरसो यस्माद्रसस्तेनायमुच्यते इति ॥ ३ ॥

अधिक क्या, यहमेरे देहका रसहै । इसी कारण इसको रसभी कहते हैं ॥ ३ ॥

प्रकारान्तरेणापि जीवन्मुक्तिरुक्ता नेयं वाच्या युक्तिर्मुक्तिमतीति चेन्न षट्स्वपि दर्शनेषु देहपातानन्तरं मुक्तेरुक्ततया तत्र विश्वासानुपपत्त्या निर्विचिकित्सप्रवृत्तेरनुपपत्तेः । तदप्युक्तं तत्रैव—

षड्दर्शनेऽपि मुक्तिस्तु दर्शिता पिण्डपातने ।
करामलकवत्सापि प्रत्यक्षा नोपलभ्यते ।
तस्मात्तं रक्षयेत्पिण्डं रसैश्चैव रसायनैरिति ॥ ४ ॥

यदि कहो कि, अन्यप्रकारसे [illegible] मुक्ति [illegible], यह [illegible]
होसकती । [illegible] षड्दर्शनोंमें भी देहपात[illegible] मुक्तिकी बात [illegible] है । [illegible]

उसमें अविश्वास होजाता एवं इसीकारण किसीकी उसमें निःसन्देह प्रवृत्तिभी नहीं होसकती है । उसीमें यहभी कहागया है, छः दर्शनोंमें शरीरत्यागके पीछे मुक्तिका होना कहा है । यह मुक्ति हस्तामलककी नाई प्रत्यक्ष होनेपरभी, नहीं प्राप्त होती । इसी लिये रस और रसायनकी सहायतासे पिण्डकी रक्षा करनी ॥ ४ ॥

गोविन्दभगवत्पादाचार्य्यैरपि–

इति धनशरीरभोगान्मत्वा नित्यान्सदैव यतनीयम् ।
मुक्तौ सा च ज्ञानात्तच्चाभ्यासात्स च स्थिरे देहे इति ॥ ५ ॥

गोविन्दभगवत्पादाचार्य्येने भी कहाहै इसप्रकार धन, शरीर, भोग, सब नित्य जानकर सदा ही मुक्तिके लिये यत्न करना चाहिये ॥ यह मुक्ति ज्ञानद्वारा प्राप्त कियी जाती है । ज्ञान अभ्याससे मिलता है । देह स्थिरभाव मिलनेही पर यह, अभ्याससंग्रह होता है ॥ ५ ॥

ननु विनश्वरतया दृश्यमानस्य देहस्य कथं नित्यत्वमनुमीयतइति चेन्नैवं मंस्थाः षाट्कौशिकस्य शरीरस्यानित्यत्वे रसाभ्रकपदाभिलप्यहरगौरीसृष्टिजातस्य नित्यत्वोपपत्तेः । तथा च रसहृदये–

ये चात्यक्तशरीरा हरगौरीसृष्टिजान्तरं प्राप्ताः ।
वन्द्यास्ते रससिद्धा मन्त्रगणः किङ्करो येषामिति ॥ ६ ॥

यदि कहो कि, सम्पूर्ण संसारही विनश्वर है । तो ऐसा कहनेसे यह दृश्यमान देह नित्य-करकर, किस प्रकार मानाजावे ! ऐसा कभी नहीं समझना । षट्कौशिक इसदेहके अनित्य होनेपर भी, रसाभ्रकपदवाच्य हरगौरी सृष्टिजातका नित्यत्व उपपन्न होता है । और इसी प्रकार रसहृदयमें कहा है,–जिन लोगोंने इस शरीरसे हरगौरीका सृष्टि जान्तर पाया है वे ही लोग रससिद्ध है । एवं इसीकारण सब लोगोंको वन्दनीय है । सबही मंत्र उनके किंकर है ॥ ६ ॥

तस्माज्जीवन्मुक्तिं समीहमानेन योगिना प्रथमं दिव्यतनुर्विधेया हरगौरीसृष्टिसंयोगजनितत्वञ्च रसस्य हरजत्वेनाभ्रकस्य गौरीसम्भवत्वेन तत्तदात्मकत्वमुक्तम् ।

अभ्रकस्तव बीजन्तु मम बीजन्तु पारदः ।
अनयोर्मेलनं देवि मृत्युदारिद्र्यनाशनमिति ॥ ७ ॥

इसकारण जीवन्मुक्तके अभीलाषी योगीपुरुष दिव्य देह विधान करेंगे । हरसे रस उत्पन्न और गौरीसे अभ्रक उत्पन्न हुआ है। इसीकारण दोनोंको हरगौरीके सृष्टिके संयोगसे उत्पन्न और उसको निबन्धन तदात्मक कहकर निर्दिष्ट हुआ है, जैसे-- हे देवि ! अभ्रक तुम्हारा रज और पारद मेरा बीज है । इन दोनोंका मिलन मृत्यु और दरिद्रताको दूर करता है ॥ ७ ॥

अत्यल्पमिदमुच्यते देवदैत्यमुनिमानवादिषु वहवो रससामर्थ्याद्दिव्यं देहमाश्रित्य जीवन्मुक्तिमाश्रिताः श्रूयन्ते । रसेश्वरसिद्धान्ते—

देवाः केचिन्महेशाद्या दैत्याः कंसपुरःसराः ।
मुनयो वालखिल्याद्या नृपाः सोमेश्वरादयः ॥ ८ ॥

यह तो सामान्य बात है । देव, दैत्य, मुनि, मनुष्यादिमेंभी अनेक लोगोंने रसके प्रभावसे दिव्यदेह धरकर जीवन्मुक्ति पायी है, रसेश्वर सिद्धान्तमें सुनाजाता है कि, महेशादि कोई २ देवगण, कंसादि दैत्यगण, वालखिल्यादि ऋषिगण, सोमेश्वरादि राजागण ॥ ८ ॥

गोविन्दभगवत्पादाचार्य्यो गोविन्दनायकः ।
चर्वटिः कपिलो व्यालिः कापालिः कन्दलायनः ॥ ९ ॥

गोविन्द भगवत पादाचार्य, गोविन्दनायक, चर्व्वटि, कपिल, व्यालि, कापालि, कन्दलायन ॥ ९ ॥

एतेऽन्ये वहवः सिद्धा जीवन्मुक्ताश्चरन्ति हि ।
तनुं रसमयीमाप्य तदात्मककथाचणा इति ॥ १० ॥

ये लोग एवं अन्यान्य अनेक व्यक्ति सिद्ध और जीवन्मुक्त होकर, रसमय शरीर पाकर विचरण करते हैं ॥ १० ॥

अयमेवास्यार्थः परमेश्वरेण परमेश्वरीं प्रति प्रपञ्चितः ।

कर्मयोगेन देवेशि प्राप्यते पिण्डधारणम् ।
रसश्च पवनश्चेति कर्मयोगो द्विधा स्मृतः ॥ ११ ॥

मूर्च्छितो हरति व्याधीन्मृतो जीवयति स्वयम् ।
बद्धः खेचरतां कुर्य्याद्रसो वायुश्च भैरवीति ॥ १२ ॥

रस और वायु मूर्छित होनेपर व्याधि सब हरण करते हैं, स्वयं मरनेपर, जीवनदान करते हैं, बद्धहोनेसे खेचरत्व सम्पादन करते हैं ॥ १२ ॥

मूर्च्छितस्वरूपमप्युक्तम्–
नानावर्णो भवेत्सूतो विहाय घनचापलम् ।
लक्षणं दृश्यते यस्य मूर्छितं तं वदन्ति हि ॥ १३ ॥

मूर्च्छितका स्वरूपभी कहा है;--जिसका घनत्व और चपलत्व नही, इसप्रकार अनेकवर्णके रसको मूर्छित कहते है ॥ १३ ॥

आर्द्रत्वञ्च घनत्वञ्च तेजो गौरवचापलम् ।
यस्यैतानि न दृश्यन्ते तं विद्यान्मृतसूतकमिति ॥ १४ ॥

आर्द्रत्व और घनत्व और तेज गौरव चपलत्व ये सब जिसमें नही देखाजावे उसका नाम मृतसूतक, जानना ॥ १४ ॥

अन्यत्र बद्धस्वरूपमप्यभ्यधायि–
अक्षतश्च लघुद्रावी तेजस्वी निर्मलो गुरुः ।
स्फोटनं पुनरावृत्तौ बद्धसूतस्य लक्षणमिति ॥ १५ ॥

अन्यत्र बद्धका रूपभी कहा है:, अक्षत, लघुद्रावी, तेजोविशिष्ट, निर्म्मल और गुरु, यही बद्धसूतकका लक्षण है ॥ १५ ॥

ननु हरगौरीसृष्टिसिद्धौ पिण्डस्थैर्य्यमास्थातुं पार्य्यते तत्सिद्धिरेव कथमिति चेन्न अष्टादशसंस्कारवशात्तदुपपत्तेः ।
तदुक्तमाचार्य्यैः–
तस्य हि साधनविधौ सुधियां प्रति कर्म निर्मलाः प्रथमम् ।
अष्टादश संस्कारा विज्ञातव्याः प्रयत्नेनेति ॥ १६ ॥

यदि कहो कि. महादेव और पार्वतीके सृष्टि सिद्धि होनेपर, पिण्डस्थैर्य कियाजासकता । इसपर यह कह सकते है कि. वह सिद्धि किसप्रकार सम्पन्न होसकती है ! इसका उत्तर यह है कि. १८ संस्कार द्वारा: उसकी उत्पत्ति होजाती है । आचार्यगणने सब कहा है-- उसके साधन करनेपर सुधीगण, पहले प्रथम १८ संस्कारको जानें ॥ १६ ॥

ते च संस्कारा निरूपिताः--

स्वेदनमर्दनमूर्च्छनस्थापनपातननिरोधनियमाश्च ।
दीपनगमनग्रासप्रमाणमथ जारणा पिधानम्
गर्भद्रुतिबाह्यद्रुतिक्षारणसरागसारणाश्चैव ।
क्रामणवेधौ भक्षणमष्टादशधेति रसकर्मेति ॥ १७ ॥

उन संस्कारको विषयमें कहाजाता है:--स्वेदन, मर्दन, मूर्च्छन, स्थापन, पातन, निरोधन, दीपन, गमन, ग्रसन, प्रमाण, जारण, पिधान, गर्भद्रुति, बाह्यद्रुति, क्षारण, क्रमण, वेध, भक्षण, ये प्रकार रसकर्म्मके हैं ॥ १७ ॥

तत्प्रपञ्चस्तु गोविन्दभगवत्पादाचार्य्यसर्वज्ञरामेश्वरभट्टारकप्रभृतिभिः प्राचीनैराचार्य्यैर्निरूपित इति ग्रन्थभूयस्त्वभयादुदास्यते॥ न च रसशास्त्रं धातुवादार्थमेवेति मन्तव्यं देहवेधद्वारा मुक्तेरेव परमप्रयोजनत्वात् । तदुक्तं रसार्णवे--

लोहवेधस्त्वया देव यद्दत्तः परमीशितः ।
त्वं देहवेधमाचक्ष्व येन स्यात् खेचरी गतिः ॥ १८ ॥

गोविन्दभगवत्पादाचार्य और सर्व्वज्ञ रामेश्वर भट्टारक प्रभृति प्राचीन आचार्योंने इसका सविस्तर वर्णनकिया है । ग्रन्थविस्तारभयसे यहां अधिक नहीं लिखागया । रसशास्त्रको केवल धातुवादार्थ समझना उचित नहीं क्योंकि इसकेद्वारा देहवेधपूर्वक मुक्तिरूप परमप्रयोजन सिद्धहोता है । रसार्णवमें कहा है;:--हे देव । जिसके द्वारा खेचरीगति सिद्ध होती है, उसी देहवेधका कीर्तन करें ॥ १८ ॥

यथा लोहे तथा देहे कर्त्तव्यः सूतकः सदा ॥ १९ ॥

जिसप्रकार लोहेमें उसीप्रकारदेहमें सूतकप्रयोगकरना साधुलोगोंको कर्तव्य है ॥ १९ ॥

समानं कुरुते देवि प्रत्ययं देहलोहयोः ।
पूर्वं लोहे परीक्षेत पश्चाद्देहे प्रयोजयेदिति ॥ २० ॥

गलितानल्पविकल्पः सर्वाध्वविवक्षितश्चिदानन्दः।
स्फुरितोऽप्यस्फुरिततनोः करोति किं जन्तुवर्गस्येति॥२१॥

यदि कहोकि, सच्चिदानन्दमय परतत्वके विस्फुरणद्वारा, मुक्तिसिद्धहोती है। सुतरां दिव्यशरीर सम्पादनके निमित्त परिश्रमका क्या प्रयोजन? इसका उत्तर यह है जो, यह वर्तमानदेह अवार्त्त अर्थात् मट्टीकीनाई सर्व्वथा स्फूर्तिशून्य है। सुतरां मृत्तिकादिमें सूर्य्यकिरण किसीप्रकार प्रतिफलितनहीं होती, यह जड़देहमेंभी उसीप्रकार चैतन्यज्योतिकी प्रस्फुरण सम्भावना नहीं। रसहृदयमें भी कहाहैः--सर्वविध सम्प्रदायही जो परम अभीष्ट रूपसे उल्लिखित हुआ है। एव जिसमे किसि प्रकार लेशमात्र विकल्पभी नहीं, वही चिदानन्द स्फुरित होनेपरभी अस्फुरित देहविशिष्ट जन्तुगणका क्या करसकता? ॥ २१ ॥

यं जरया जर्जरितं काशश्वासादिदुःखविशदश्च।
योग्यं तं न समाधौ प्रतिहतबुद्धीन्द्रियप्रसरम्॥२२॥

विशेषतः, जो व्यक्ति बुढाया कारण एकमात्र जर्जरित, कासश्वासादि दुःखसे अवसादित उसके कारणसे समाधिसाधनमें सर्व्वथा अनुपयुक्त, एवं सर्व्वथा बुद्धि और इन्द्रिय प्रसार विवर्जित हुआहै, चिदानन्द उसका क्या करसकते? ॥ २२ ॥

बालः षोडशवर्षो विषयरसास्वादलम्पटः परतः।
यातविवेको वृद्धो मर्त्यः कथमाप्नुयान्मुक्तिमिति च॥२३॥

बालक. अथवा विषय रसास्वादमें नितान्त कामुकचित्त १६ वर्षका युवा या विवेक बहिष्कृत वृद्धाही किस प्रकार मुक्ति पावेगा? इसीकारण, दिव्यदेहकी आवश्यकताहै, ॥२३॥

ननु जीवत्वं नाम संसारित्वं तद्विपरीतत्वं मुक्तत्वं तथाच परस्परविरुद्धयोः कथमेकायतनत्वमुपपन्नं स्यादिति चेत्तदनुपपन्नं विकल्पानुपपत्तेः। मुक्तिस्तावत् सर्वतीर्थकरसम्मता। सा किं ज्ञेयपदे निविशते न वा चरमे शशविषाणकल्पा स्यात् प्रथमे न जीवनंवर्जनीयमजीवतो ज्ञातृत्वानुपपत्तेः। तदुक्तं। रसेश्वरसिद्धान्ते–

रसाङ्गमेयमार्गोक्तो जीवमोक्षोऽस्त्यधोमनाः।
प्रमाणान्तरवादेषु युक्तिभेदावलम्बिषु॥

ज्ञानज्ञेयमिदं विद्धि सर्वमन्त्रेषु सम्मतम् ।
न जीवन् ज्ञास्यति ज्ञेयं यदतोऽस्त्येव जीवनमिति ॥ २४ ॥

यदि कहो कि, जीवशब्दसे संसारी; और मुक्तशब्दसे उसके विपरीत । अतएव परस्पर विरुद्ध दो पदार्थ किस प्रकार एकस्थानमें रहसकते हैं ? इसका उत्तर यह है जो, मुक्ति जब शास्त्रमें और सब सम्प्रदायमें एकवाक्यसे मानाहै, तो सन्देहके अभाव वशात, इसप्रकार पूर्वपक्षभी नहीं हो सकता । इस समय पूछना यही है, जो वह मुक्ति क्या ज्ञेयपदमें विनिविष्ट या चरममें शशविषाण अर्थात् खरहेके सींगकी नाईं सर्व्वथा कल्पनामात्र होता है । ज्ञेय पदमें विनिविष्ट होनेसे, जीवन छोडना उचित नहीं क्योंकि, अजीवितका ज्ञातृत्व सर्वथा असम्भवहै । रसेश्वर सिद्धान्तमें कहा है-- भिन्न २ प्रमाणवाद भिन्न २ युक्तिसम्पन्न सब प्रकारके तन्त्रही उसप्रकार ज्ञात ज्ञेय प्रतिपादित हुआ है । इसमें किसीका मतभेद नहीं । फलता जीवित न रहनेसे, ज्ञेय विषय विदित नहीं होता इसीकारणजीवनका प्रयोजन है ॥ २४ ॥

न चेदमदृष्टचरमिति ॥ मन्तव्यं विष्णुस्वामिमतानुसारिभिः नृपञ्चास्य शरीरस्य नित्यत्वोपपादनात् । तदुक्तं साकारसिद्धौ—

सच्चिन्नित्यनिजाचिन्त्यपूर्णानन्दैकविग्रहम् ।
नृपञ्चास्यमहं वन्दे श्रीविष्णुस्वामिसम्मतमिति ॥ २५ ॥

इसप्रकार जीवन्मुक्तित्व अदृष्टचरहोनेपरभी मन्तव्य नहीं । विष्णुस्वामीके मतानुसार गणनेहारे शरीरके नित्यत्व उपपादित किया है साकारसिद्धिमें कहा है जो सत्स्वरूप, चित्स्वरूप, नित्यस्वरूप, एवं नित्य अचिन्त्यपूर्ण आनन्दही जिसका एकमात्र विग्रह श्रीविष्णुस्वामि सम्मत इसीपर देखना और उसके रूपकी वन्दना करता हूं ॥ २५ ॥

नन्वेतत् सावयवं रूपद्वयभासमानं नृकण्ठीरवाङ्गं सदिति न सङ्गच्छत इत्यादिनाक्षेपपुरःसरं सनकादिप्रत्यक्षं सहस्रशीर्षा पुरुष इत्यादिश्रुतिः, तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शंख-गदाद्युदायुधमित्यादिपुराणलक्षणेन प्रमाणत्रयेण सिद्धं नृपञ्चा-ननाङ्गं कथमसत् स्यादिति । सदादीनि विशेषणानि सर्वश्री-कान्तमिश्रैः विष्णुस्वामिचरणपरिणतान्तःकरणैः प्रतिपादि-तानि । तस्मादस्मदिष्टदेहनित्यत्वमनन्तत्वादेवं न भवतीति पुरु-षार्थकामुकैः पुरुषैर्हृद्यम् ।

अतएवोक्तम्—

आयतनं विद्यानां मूलं धर्मार्थकाममोक्षाणाम् ।
श्रेयः परं किमन्यच्छरीरमजरामरं विहायैकमिति ॥ २६ ॥

सहस्रशीर्षापुरुष इत्यादि श्रुति अनुसार स्पष्टही जाना जासकता है कि, सनकने उसको प्रत्यक्ष किया था पुराणमेंभी कहा है, वह शंख गदा आदि आयुध भूषित; चतुर्भुज विशिष्ट कमललोचन, अद्भुताकृतिबालकको इत्यादि इन सब प्रमाणोंसे उक्तवाक्य किसप्रकार मिथ्या होसकता है ? विष्णुस्वामीके चरणपारिणतान्तःकरणगर्भ श्रीकान्तमिश्रने उल्लिखित सच्चित-प्रभृति विशेषण सब प्रतिपादित किया है । इन कारणोंसे हमारा अभीष्ट देह नित्यत्व अत्यन्त अदृष्ट नही है । अतएव, पुरुषार्थ प्रार्थी पुरुष वर्ग इसकी अवश्य कामना और सन्धानादि करेंगे । इसीलिये कहा है कि,-- एकमात्र अजरामर शरीरको त्यागकर, अन्य और ऐसा क्या है. जो सब विद्याओंका घर, धर्म्म अर्थ काम और मोक्षका मूल एवं परमश्रेयस्वरूप हो सकता है ॥ २६ ॥

अजरामरीकरणसमर्थश्च रसेन्द्र एव । तदाह—
एकोऽसौ रसराजः शरीरमजरामरं कुरुत इति ॥ २७ ॥

रसेन्द्रही केवल इसप्रकार अजरामर करनेमें समर्थ है । उन्होंने भी कहा है:-- एकमात्र यह रसराजही शरीरको अजर और अमर करता है ॥ २७ ॥

किं वर्ण्यते रसस्य माहात्म्यं दर्शनस्पर्शनादिनापि महत्फलं भवति ।

तदुक्तं रसार्णवे—

दर्शनात् स्पर्शनात्तस्य भक्षणात् स्मरणादपि ।
पूजनाद्रसदानाच्च दृश्यते षड्विधं फलम् ॥ २८ ॥

इसका माहात्म्य और क्या कहा जावेगा ? इसका दर्शन और स्पर्शनादिद्वारा महाफल हो सकता है । रसार्णवमेंभी कहा है,— रसका स्पर्शन; दर्शन, भक्षण और स्मरण एवं पूजन और रस दान करनेपरभी छ. प्रकार फल लाभ होता है ॥ २८ ॥

केदारादीनि लिङ्गानि पृथिव्यां यानि कानिचित् ।
तानि दृष्ट्वा तु यत्पुण्यं तत्पुण्यं रसदर्शनादित्यादिना ॥२९॥

पृथिवीमें केदारादि जो सब लिङ्ग हैं उनके दर्शनसेभी रसदर्शनकाफल अधिक है [illegible] ॥ २९ ॥

अन्यत्रापि--

काश्यादिसर्वलिङ्गेभ्यो रसलिंगार्चनं शिवम् ।
प्राप्यते येन तल्लिङ्गं भोगारोग्यामृतामरमिति ॥ ३० ॥

अन्यत्र कहा भी है,--केदार आदि सबप्रकारलिङ्ग अपेक्षा रसलिङ्गका अर्चनकरनाही परममङ्गल कारकहै। यहलिङ्ग मिलनेपर, भोग, आरोग्य, अमृत और अमरत्व लाभ होता है ॥ ३० ॥

रसनिन्दायाः प्रत्यवायोऽपि दर्शितः ।

प्रमादाद्रसनिन्दायाः श्रुतावेनं स्मरेत् सुधीः ।
द्राक् त्यजेन्निन्दकं नित्यं निन्दया पूरितोशुभमिति ॥ ३१ ॥

रसकी निन्दा करनेपर पाप होता है । वहभी दिखलाया है:,--प्रमादवशतः रसकी निन्दा सुननेसे, पण्डित लोग इसका स्मरण और उसीक्षण निन्दकको त्याग करना चाहिये । ऐसी निन्दासे निंदक अशुभ परम्परासे पूर्ण होजाता है ॥ ३१ ॥

तस्मादस्मदुक्तया रीत्या दिव्यं देहं सम्पाद्य योगाभ्यासवशात् परतत्त्वे दृष्टे पुरुषार्थप्राप्तिर्भवति । तदा--

भ्रूयुगमध्यगतं यत् शिखिविद्युत्सूर्य्यवज्जगद्भासि ।
केषाञ्चित् पुण्यदृशामुन्मीलति चिन्मयं ज्योतिः ॥ ३२ ॥

इसलिये हमारी कही हुई रीत्यनुसारणपूर्वक दिव्यदेह सम्पादनकर, योगाभ्याससे पर तत्वके दर्शन होनेसे, पुरुषार्थकी प्राप्ति होती है । तब--जो दोनों भौंहोंके बीच रहकर, अग्नि-बिजुली, और सूर्यकी नाईं सम्पूर्ण जगत, आभासित करता है, कोई २ महात्मा पुण्यात्मा आदिके दृष्टि गोचर चिन्मय ज्योति उन्मीलित होती है ॥ ३२ ॥

परमानन्दैकरसं परमं ज्योतिः स्वभावमविकल्पम् ।
विगलितसकलक्लेशं ज्ञेयं शान्तं स्वसंवेद्यम् ॥ ३३ ॥

इन परमज्योतिमें परमानन्द एकमात्र रसरूपसे विराजते हैं । वह स्वभावतः निर्विकल्प है उसके प्रभावसे सबही क्लेश विगलित होजाता है वह स्वसंवेद्य और शान्तरूप [illegible] अवश्य जानने योग्य है ॥ ३३ ॥

तस्मिन्नाधाय मनः स्फुरदखिलं चिन्मयं जगत् पश्यन् ।
उत्सन्नकर्मबन्धो ब्रह्मत्वमिहैव चाप्नोतीति ॥ ३४ ॥

उसमें मन लगाकर, स्फुरदखिल विशिष्ट, और इस चिन्मय जगत [illegible] कर्मबन्धन उच्छेदनपूर्वक इस देहमें ब्रह्मत्व [illegible] ॥ ३४ ॥

श्रुतिश्च–

रसो वै सः रसं ह्येवायं लब्ध्वानन्दो भवतीति ॥ ३५ ॥

श्रुतिमें कहाहै, वह रसस्वरूप है । यह रसलाभ करनेपर, आनन्दी होजाता है ॥३५॥

तदित्थं भवेदन्यदुःखभरतरणोपायो रस एवेति सिद्धम् ।

तथा च रसस्य परब्रह्मणा साम्यमिति प्रतिपादकः श्लोकः ।

यः स्यात् प्रावरणाविमोचनधियां साध्यः प्रकृत्या पुनः
सम्पन्नो सहते न दीप्यति परं वैश्वानरे जाग्रति ।
जातो यद्यपरं न वेदयति च स्वस्मात् स्वयं द्योतते
यो ब्रह्मैव स दैन्यसंसृतिभयात् पायादसौ पारद इति ॥३६॥

इति सर्वदर्शनसंग्रहे रसेश्वरदर्शनं समाप्तम् ॥ ९ ॥

इसप्रकार रस जो दुःखभारपरिहार विषयका उपाय है, सो सिद्ध हुआ । और परब्रह्मके, साथ रसका साम्य प्रतिपादनकर श्लोकभी लिखा है–यह पारा वा पारद साक्षात ब्रह्म है । दैन्य और संसृति भयसे रक्षा करता । यह ब्रह्मकी नाईं स्वयंही विद्योतित है । स्थूलदेहरूपी आवरणको हटानेकी अभिलाषा करनेवाले लोग ब्रह्मकी नाईं इसकी साधना करें । फिर, यह ब्रह्मकी नाईं प्रकृतिसम्पन्न होता है । वैश्वानरकी जाग्रत् अवस्थामें उसकेसाथ ब्रह्मकी नाईं क्रीडा करता है ॥ ३६ ॥

इति सर्वदर्शनसंग्रहमें रसेश्वरदर्शन समाप्त हुआ ॥ ९ ॥

अथौलुक्यदर्शनम् ॥ १० ॥

इह खलु निखिलप्रज्ञावन्निसर्गप्रतिकूलवेदनीयतया निखिलात्मसंवेदनसिद्धं दुःखं जिहासुस्तद्धानोपायं जिज्ञासुः परमेश्वरसाक्षात्कारमुपायमाकलयति ।

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।

परमेश्वर साक्षात्कारकोही वह उपाय कहकर वर्णन किया है । जैसे--मनुष्यगण आकाशको, चामकी नाई वेष्टनकर शिवज्ञानशून्य होनेपर, उन लोगोंको दुःखका नाश न होगा ॥ १ ॥

इत्यादिवचननिचयप्रामाण्यात् परमेश्वरसाक्षात्कारश्च श्रवणमननभावनाभिर्भावनीयः । यदाह—

आगमेनानुमानेन ध्यानाभ्यासबलेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममिति ॥ २ ॥

आगम, अनुमान, और ध्यानके अभ्यासके बलसे, इन तीन उपायोंसे प्रज्ञा प्रकल्पित करसकनेहीसे, उत्कृष्टयोग होता है ॥ २ ॥

तत्र मननमनुमानाधीनं, अनुमानञ्च व्याप्तिज्ञानाधीनं, व्याप्तिज्ञानञ्च पदार्थविवेकसापेक्षम्—

अतः पदार्थषट्कम् । अथातो धर्मं व्याख्यास्याम इत्यादिकायां दशलक्षण्यां कणभक्षेण भगवता व्यवस्थापि । तत्राह्निकद्वयात्मके प्रथमेऽध्याये समवेताशेषपदार्थकथनमकारि । तत्रापि प्रथमाह्निके जातिमन्निरूपणं, द्वितीयाह्निके जातिविशिष्टयोर्निरूपणम्, आह्निकद्वययुक्ते द्वितीयेऽध्याये द्रव्यनिरूपणम् । तत्रापि प्रथमाह्निके भूतविशेषणलक्षणं, द्वितीये दिक्कालप्रतिपादनम् । आह्निकद्वययुक्ते तृतीये आत्मान्तःकरणलक्षणम् । तत्राप्यात्मलक्षणं प्रथमे द्वितीये अन्तःकरणलक्षणम्, आह्निकद्वययुक्ते चतुर्थे शरीरतदुपयोगिविवेचनम् । तत्रापि प्रथमे तदुपयोगिविवेचनं, द्वितीये शरीरविवेचनम् । आह्निकद्वयवति पञ्चमे कर्मप्रतिपादनम् । तत्रापि प्रथमे शरीरसम्बन्धिकर्मचिन्तनं, द्वितीये मानसकर्मचिन्तनम् । आह्निकद्वयशालिनि षष्ठे श्रौतधर्मनिरूपणम् । तत्रापि प्रथमे दानप्रतिग्रहधर्मविवेकः, द्वितीये चातुराश्रम्योचितधर्मनिरूपणम् । तथाविधे सप्तमे गुणसमवायप्रतिपादनम् । तत्रापि प्रथमे बुद्धिनिरपेक्षगुणप्रतिपादनं, द्वितीये तत्सापेक्षगुणप्रतिपादनं, समवायप्रतिपादनञ्च । अष्टमे निर्वि-

कल्पकसविकल्पकप्रत्यक्षप्रमाणचिन्तनम् । नवमे बुद्धिविशेषप्रतिपादनम् । दशमे अनुमानभेदप्रतिपादनम् ॥ ३ ॥

उनमें मनन अनुमानके आधीन, अनुमान व्याप्तिज्ञानके आयत्त एवं व्याप्तिज्ञानपदार्थ विवेकके सापेक्षहै इसीकारण भगवान् कणादने, अनन्तर इसकारण धर्म्मव्याख्या करूंगा, इत्यादि कहकर'-द्गलक्षणीमे छःप्रकार पदार्थोंको व्यवस्थापित किया है। उनमें दो आन्हिकवाले पहिले अध्यायमें सम्पूर्ण समवेत पदार्थोंका कथन कियाहै। इसमें पहिले आन्हिकमें जातिनिरूपण और द्वितीय आन्हिकमें जाति और विशेष दोनोंका निरूपण कियाहै। दो आन्हिकवाले द्वितीय अध्यायमें सब द्रव्योंका निरूपण उसमें पहिले आन्हिकमें भूतविशेषलक्षण, द्वितीयमें दिशाकालका प्रतिपादन कियाहै। आन्हिकवाले तृतीय अध्यायमें आत्मा और अन्तःकरणका लक्षण उनमें प्रथम आन्हिकमे आत्माके लक्षण और द्वितीयमें अन्तःकरणका लक्षण निरूपित हुआ है। दो आह्निकयुक्त चौथे अध्यायमें शरीर और उसके उपयोगी विवेचन उनमें प्रथम आह्निकमे उसके उपयोगी विवेचन और द्वितीयमें शरीरका विवेचन किया है। दो आह्निकयुक्त पञ्चम अध्यायमें कर्म्म प्रतिपादन, उनमें प्रथम आन्हिकमें शरीरसम्बन्धी चिन्तन और द्वितीय आह्निकमे मनः सम्बन्धी कर्म चिन्तन किया है। आन्हिकद्वययुक्त छठा अध्यायमें श्रौतधर्म्म निरूपण उनमें प्रथम अध्यायमें दान और प्रतिग्रह धर्म्मविवेक, द्वितीय अध्यायमें चार आश्रमोंका विहित धर्म्मनिरूपण, इसप्रकार आन्हिकद्वययुक्त सप्तम अध्यायमें गुणसमवायप्रतिपादन उनमें प्रथम अध्यायमें बुद्धि निरपेक्ष गुणप्रतिपादन और द्वितीय अध्यायमें बुद्धिसापेक्ष गुणप्रतिपादन और समवाय प्रतिपादन किया है। अष्टम अध्यायमें निर्विकल्प और प्रत्यक्षप्रमाण चिन्तन नवम अध्यायमें बुद्धिविशेषप्रतिपादन और दशम अध्यायमें अनुमानभेद प्रतिपादन कहा है ॥ ३ ॥

तत्र उद्देशो लक्षणं परीक्षा चेति त्रिविधास्य शास्त्रस्य प्रवृत्तिः । ननु विभागापेक्षया चातुर्विध्ये वक्तव्ये कथं त्रैविध्यमुक्तमिति चेन्नैवं संस्थाः विभागस्य विशेषोद्देश एवान्तर्भावात् । तत्र द्रव्यगुणकर्मसामान्यविशेषसमवाया भावा इति षडेव ते पदार्था इत्युद्देशः ॥ ४ ॥

किमत्र क्रमनियमे कारणम् उच्यते समस्तपदार्थायतनत्वेन प्रधानस्य द्रव्यस्य प्रथममुद्देशः । अनन्तरं गुणत्वोपाधिना सकलद्रव्यवृत्तेर्गुणस्य तदनु सामान्यवत्त्वसाम्यात् कर्मणः पश्चात्त्रितयाश्रितस्य सामान्यस्य तदनन्तरं समवायाधिकरणस्य विशेषस्य अन्ते अवशिष्टस्य समवायस्येति क्रमनियमः ॥ ५ ॥

यहां क्रमनियमका कारण क्या?वह कहाजाता है । द्रव्य, सब पदार्थोंका आयतन होनेसे प्रधान है । इसकारण प्रथमही उसका उद्देशकर, अनन्तर सब द्रव्यवृत्तिका गुणत्व उपाधि है इसीकारण गुणका उद्देश्य किया है । इसके पीछे सामान्यवत्व साम्यवशतः कर्मका, पीछे उक्त तीनके आश्रित सामान्यका, तदनन्तर समवायाधिकरण विशेष अन्तमें अवशिष्ट समवायका उद्देश किया गया । यही क्रमनियमका कारण है ॥ ५ ॥

ननु षडेव पदार्थाः इति कथं कथ्यते अभावस्यापि सद्भावादिति चेन्मैवं वोचः नञर्थानुल्लिखितधीविषयतया भावरूपतया षडेवेति विवक्षितत्वात् । तथापि कथं षडेवेति नियम उपपद्यते विकल्पानुपपत्तेः । तथाहि नियमव्यवच्छेद्यं प्रमितं न वा प्रमितत्वे कथं निषेधः अप्रमितत्वे कथन्तरां, न हि कश्चित् प्रेक्षावान् मूषिकाविषाणं प्रतिषेद्धुं यतते । ततश्चानुपपत्तेर्नो नियम इति चेन्मैवं संपीप्टाः सप्तमतया प्रमिते अन्धकारादौ भावत्वस्य भावतया प्रमिते शक्तिसंख्यादौ सप्तमत्यस्य च निषेधादिति कृतं विस्तरेण ॥ ६ ॥

येही छः पदार्थ हैं, यह किसप्रकार कहा जासकता क्योंकि, अभावकाभी सद्भाव है। किन्तु ऐसा नही कहसकते । इसका कारण यह है जो नञ्अर्थसे अनुल्लिखित बुद्धिविषयतामें छःही इत्यादिविवक्षित हुआ है । अर्थात् इन सबकी बुद्धिविषयताका अभाव नहीं । लोकमें सहजही बुझसकते हो, इसकारण विशेषरूपसे निर्धारण किया गयाह । तथापि, किसप्रकार छःही इसप्रकार नियम किया जासकता । ऐसे करनेपर, सन्देहही और उत्पत्ति नहीं । इसीप्रकार, जिस नियमके विषयीभूत, उसक प्रमित क्या, अप्रमित ? प्रमित होनेपर किसप्रकार निषेध होसकता ? और अप्रमित हो नेहीपर किसप्रकार निषेध सम्भवपर होता ?

कौन बुद्धिमान् पुरुष मूषिकके विषाण (सींग) को प्रतिषेध करनेके लिये यत्न करता ? इसकारण अनुपपत्तिवशात् नियम नहीं किया जासकता । किन्तु ऐसा नहीं कहसकते । उसका कारण यह है जो सप्तम कहकर परिगणित अन्धकारादिमें भावत्वका भावत्व है । उसकेद्वारा प्रमित शक्तिसंख्यादिमे सप्तमत्वका निषेध होता है । विस्तारसे प्रयोजन नहीं॥ ६॥

तत्र द्रव्यादित्रितयस्य द्रव्यत्वादिजातिर्लक्षणम् । द्रव्यत्वं नाम गगनारविन्दसमवेतत्वे सति नित्यगन्धासमवेतम् । गुणत्वं नाम समवायिकारणासमवायिकारणभिन्नसमवेतसत्तासाक्षाद्व्याप्यजातिः । कर्मत्वं नाम नित्यसमवेतत्वसहितसत्तासाक्षाद्व्याप्यजातिः । सामान्यन्तु प्रध्वंसप्रतियोगित्वरहितमनेकसमवेतम् । विशेषो नामान्योन्याभावविरोधिसामान्यरहितः समवेतः । समवायस्तु समवायरहितः सम्बन्ध इति षण्णां लक्षणानि व्यवस्थितानि ॥ ७ ॥

द्रव्यत्वादि जाति उल्लिखित द्रव्यादि त्रितयका लक्षण अर्थात् जिसमें द्रव्यत्व है, उसका नाम द्रव्य है जिसमें गुणत्व है, उसका नाम गुण एवं जिसमें कर्म्मत्व है, उसका नाम कर्म्म है, द्रव्यत्वशब्दसे आकाश और पद्मका समवेतत्व है। नित्यगन्धमें सो नहीं । अर्थात् अनित्य पदार्थही सुतरां पद्मका गन्ध कहनेसे पद्मका द्रव्यत्व नहीं समझना । इसप्रकार समवायिकारण. असमवायिकारण भिन्न समवेत सत्ताद्वारा जो साक्षात् सम्बन्धमें व्याप्त है, उसका नाम गुण है । कर्म्मत्व कहनेसे. यही समझना चाहिये, नित्यसमवेतत्व सत्ता साक्षात्व्याप्यजाति है । जिसमें प्रध्वंसकी प्रतियोगिता नहीं इसप्रकार अनेक समवेतत्वका नाम सामान्य है । विशेषशब्दसे परस्परका अभावहीन सामान्य विहीन समवेत समवाय शब्दसे जिसमे समवाय नहीं इसप्रकार सम्बन्ध इसप्रकार छः पदार्थका लक्षण व्यवस्थित हुआ है ॥ ७ ॥

द्रव्यं नवविधं पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसीति । तत्र पृथिव्यादिचतुष्टयस्य पृथिवीत्वादिजातिर्लक्षणम् । पृथिवीत्वं नाम पाकजरूपसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिः । अप्त्वं नाम सरित्सागरसमवेतत्वे सति सलिलसमवेतं सामान्यम् तेजस्त्वं नाम चन्द्रचामीकरसमवेतत्वे सति ज्वलनसमवेतं सामान्यम् । वायुत्वं नाम [illegible]

द्रव्याप्यजातिः । आकाशकालदिशामेकैकत्वादपरजात्यभावे पारिभाषिक्यस्तिस्रः संज्ञा भवन्ति, आकाशः कालो दिगिति । संयोगाजन्यजन्यविशेषगुणसमानाधिकरणविशेषाधिकरणमाकाशम् । विभुत्वे सति दिगसमवेतपरत्वासमवायिकारणाधिकरणः कालः । अकालत्वे सत्यविशेषगुणा महती दिक् । आत्ममनसोरात्मत्वमनस्त्वे । आत्मत्वं नाम अमूर्त्तसमवेतद्रव्यत्वापरजातिः । मनस्त्वं नाम द्रव्यसमवायिकारणत्वरहिताणुसमवेतद्रव्यत्वापरजातिः ॥ ८ ॥

द्रव्य नव ९ प्रकारका है, पृथिवी, जल, तेज, वायु, आकाश, काल, दिक्, आत्मा, और मन । उनमें पृथिवीत्वादि जाति पृथिवी प्रभृति चतुष्टयका लक्षण अर्थात, जिसमे पृथिवीत्व है, उसका नाम पृथिवी है पृथिवीत्व शब्दसे पाकजरूप समानाधिकरण द्रव्यत्वद्वारा साक्षात् सम्बन्धमें व्याप्यजाति समझना चाहिये पाकज शब्दसे हांड़ी प्रभृति ॥ जो सरित सागरादिमें सलिलरूपसे समवेत हुआ है, उसका नाम आप्त्व है । इस प्रकार तेजत्व कहनेसे, यह समझना चाहिये जो चन्द्रमा और स्वर्णादितेजः पदार्थोमें ज्वलनाकारसे समवेत हुआ है ॥ वायुत्व शब्दसे त्वक् इन्द्रियके द्वारा अनुभूत होता है, इसप्रकार द्रव्यव्याप्य जाति है आकाश काल और दिशा इनका एकत्ववशात अपरजाति नही । सुतरां, इनकी पारिभाषिक संज्ञा तीन प्रकारकी होती है । जैसे, आकाश, काल और दिशा । उनमे जिस किसी प्रकार पदार्थके संयोगसे उत्पन्न नहो, इसप्रकार जन्यविशेष एव जिसमें गुणसमानाधिकरण और विशेषाधिकरण है, उसका नाम आकाश है । जो विभुत्व सम्पन्न जो राव दिशाओंमें समवेत नही एवं जिसमें असमवायिकारणका अधिकरण हो उसका नाम काल है । जिसका कालत्व नही और विशेषगुणभी नही उसका नाम दिशा है । जिसका आत्मत्व है, उसका नाम आत्मा एवं जिसका मनस्त्व है, उसका नाम मन है । उनमें आत्मत्व शब्दसे अमूर्त समवेत द्रव्यत्व नहीं, अर्थात् जो मूर्त्तिहीन है, वही आत्मा है इसप्रकार जिसमें द्रव्यत्व समवायिकारणत्व नहीं, इसप्रकार अणुसमवेत द्रव्यत्व अर्थात मन कहनेसे यह समझना चाहिये, समवायिकारणत्व विरहित अणुरूप पदार्थकोही मन कहते है ॥ ८ ॥

रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्च कण्ठोक्ताः सप्तदश च शब्दसमुच्चिताः गुरुत्वद्रव्यत्वस्नेहसंस्कारादृष्टशब्दाः सप्तेवेत्येवं चतुर्वि-

शादिर्गुणाः । तत्र रूपादिशब्दान्तानां रूपत्वादिजातिर्लक्षणम् । रूपत्वं नाम नीलसमवेतगुणत्वापरजातिः । अनया दिशा शिष्टानां लक्षणानि द्रष्टव्यानि ॥ ९ ॥

उनमे रूप, रस, गन्ध, स्पर्श, संख्या, परिमाण, पृथक्त्व, संयोग, विभाग, परत्व अपरत्व, बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, गुरुत्व, द्रव्यत्व, स्नेह, संस्कार, अदृष्ट, शब्द येही २४ गुण पदार्थ है ॥ उनमे रूपसे शब्द पर्य्यन्त पदार्थका रूपत्वादि जाति ही लक्षण है अर्थात् जिसका रूपत्व है उसका नाम रूप । इसप्रकार रसत्व है उसका नाम रस इत्यादि उनमें रूपशब्दसे नील समवेत गुणत्वापरजाति । इसका भावार्थ यह है कि नील पीतादि वर्णसे जो समवेत है, जो न रहनसे उस २ वर्णकी प्रतिमा नही होती, उसका नाम रूपत्व है । इसी प्रकार इत्यादि अन्यान्य पदार्थोंका लक्षण करलेना ॥ ९ ॥

कर्म पञ्चविधम् उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनभेदात् । भ्रमणरेचनादीनां गमन एवान्तर्भावः । उत्क्षेपणादीनामुत्क्षेपणत्वादिजातिर्लक्षणम् । तत्र उत्क्षेपणं नाम ऊर्द्ध्वदेशसंयोगासमवायिकारणप्रमेयसमवेतकर्मत्वापरजातिः । एवमवक्षेपणादीनां लक्षणं कर्त्तव्यम् ॥ १० ॥

कर्म्म पांचप्रकारके हैं, जैसे उत्क्षेपण, अवक्षेपण, आकुञ्चन, प्रसारण, गमन, भ्रमण और रेचनादि व्यापार सब गमनके अन्तर्भूत हैं । इसकारण उन सबका भिन्न २ उल्लेख नही हुआ उनमें जिसमें उत्क्षेपणत्व है । उसका नाम उत्क्षेपण है । उत्क्षेपणत्व कहनेसे यह समझना चाहिये जो ऊर्द्ध्वदेशसंयोग । वह असमवायि कारणद्वारा प्रमित होता है । इसप्रकार अवक्षेपणादि लक्षण करना चाहिये ॥ १० ॥

सामान्यं द्विविधं परमपरञ्च । परं सत्ता द्रव्यगुणसमवेता गुणकर्मसमवेता वा, अपरं द्रव्यत्वादितल्लक्षणं प्रागेवोक्तम् । विशेषाणामनन्तत्वात् समवायस्य चैकत्वाद्विभागो न सम्भवति । तल्लक्षणञ्च प्रागेवावादि ॥ ११ ॥

सामान्य दो प्रकारका पर और अपर । उनमें जो द्रव्यगुणसे समवेत या जो गुणकर्म्मसे समवेत होते हैं, इसीप्रकारका नाम पर है । एवं अपरशब्दसे द्रव्यत्वादि । उसका लक्षण पूर्वही कहा गया है । विशेष सबका अन्त नही । एवं समवायका भी द्वितीयत्व नही । वह एकमात्र स्वरूप । इसीकारण इन दोनोंका विभागसम्भव नही । इनका लक्षण पहिले कहागया ॥ ११ ॥

द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे ।
यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदुरिति ॥ १२ ॥

द्वित्व, पाकजोत्पत्ति, विभागजविभाग, इन सबमें जिसकी बुद्धि स्खलित नहीं होती, उसीको वैशेषिक कहते हैं ॥ १२ ॥

अभाणकस्य सद्भावात् द्वित्वाद्युत्पत्तिप्रकारः प्रदर्श्यते । तत्र प्रथममिन्द्रियार्थसन्निकर्षस्तस्मादेकत्वसामान्यज्ञानं, ततोऽपेक्षाबुद्धिः, ततो द्वित्वोत्पत्तिस्ततो द्वित्वसामान्यज्ञानं तस्माद्द्वित्वगुणज्ञानं ततः संस्कारः ॥ १३ ॥

द्वित्वप्रभृतिका उत्पत्तिका प्रकार दिखलाया जाता है । उनमें पहिले इन्द्रियविषयका सन्निकर्ष, उससे एकत्वसामान्यका ज्ञान, अनन्तर अपेक्षाबुद्धि पीछे द्वित्वोत्पत्ति, उसके अनन्तर द्वित्वसामान्यज्ञान उससे द्वित्वगुणज्ञान अनन्तर संस्कार उत्पन्नहोता है ॥ १३ ॥

तदाह—

आदाविन्द्रियसन्निकर्षघटनादेकत्वसामान्यधी-
रेकत्वोभयगोचरा मतिरतो द्वित्वं ततो जायते ।
द्वित्वत्वप्रमितिस्ततोऽनुपरतो द्वित्वप्रमानन्तरं
द्वे द्रव्ये इति धीरियं निगदिता द्वित्वोदयप्रक्रियेति ॥ १४ ॥

उसीप्रकार कहा भी है,—आदिमें इन्द्रियसन्निकर्षघटनासे एकत्व सामान्य बुद्धिकी घटनाका उदय होता है । उसके परकालमें एकत्वका उभयगोचर ज्ञान उत्पन्न होता है । उससे द्वित्वकी उत्पत्ति होती है । अनन्तर द्वित्वत्व प्रमिति, पश्चात् द्वित्वप्रमा अनन्तर, दो पदार्थ, इसप्रकार बुद्धिका उदय होता है । इसीका नाम द्वित्वोदय प्रक्रिया है ॥ १४ ॥

द्वित्वादेरपेक्षाबुद्धिजन्यत्वे किं प्रमाणम् । अत्राहुराचार्य्याः— अपेक्षाबुद्धिर्द्वित्वादेरुत्पादिका भवितुमर्हति व्यञ्जकत्वानुपपत्तेः । तेनानुविधीयमानत्वात् शब्दं प्रति संयोगवदिति ॥ १५ ॥

द्वित्वादि जो अपेक्षा बुद्धिजनित है, इसविषयका प्रमाण क्या ? इसके उत्तरमें आचार्योंने कहा है कि, अपेक्षा बुद्धिही द्वित्वादिकी उत्पादिकाहै इसका कारण यह है जो उसमें व्यञ्जकत्व की उत्पत्ति है । शब्द जिसप्रकार दो वस्तुओंके संयोगसे उत्पन्न होता उसीप्रकार द्वित्वादि अपेक्षा बुद्धिके संयोगसे समुद्भूत होता है । हमारे मतमें अनेकाश्रित गुणत्वनतः मि

पार्थक्यादिका प्रकाश होता है अर्थात् पृथक् कहनेहीसे जैसे अनेकके आश्रित रहकर प्रतीति उत्पन्न होती है । उसी प्रकार दो कहनेसे, दो एकका ज्ञान होता है । यह ज्ञान नित्य है । अर्थात् चिरकालही दो एकसे दो होता है, इसप्रकार बुद्धिका उदय होता है ॥ १५ ॥

वयन्तु ब्रूमः द्वित्वादिकमेकत्वद्वयविषयानित्यबुद्धिव्यङ्ग्यं न भवति अनेकाश्रितगुणत्वात् पृथक्त्वादिवादिति ।

निवृत्तिक्रमो निरूप्यते । अपेक्षाबुद्धित एकत्वसामान्यज्ञानस्य द्वित्वोत्पत्तिसमकालं निवृत्तिः अपेक्षाबुद्धेर्द्वित्वसामान्यज्ञानात् द्वित्वगुणबुद्धिसमसमयं द्वित्वस्यापेक्षाबुद्धिनिवृत्तेर्द्रव्यबुद्धिसमकालं गुणबुद्धेः द्रव्यबुद्धितः संस्कारोत्पत्तिसमकालं द्रव्यबुद्धेस्तदनन्तरं संस्कारादिति तथा च संग्रहश्लोकाः ।

आदावपेक्षाबुद्ध्या हि नश्येदेकत्वजातिधीः ।
द्वित्वोदयसमं पश्चात् सा च तज्जातिबुद्धितः ॥ १६ ॥

इससमय निवृत्तिका क्रम निरूपित होता है । अपेक्षाबुद्धिसे द्वित्वोत्पत्तिका समकालमें ही सामान्यतः एकत्व ज्ञानकी उत्पत्ति होती है । उसीप्रकार सामान्यतः द्वित्वज्ञान उत्पन्न होनेसे द्वित्वगुण बुद्धिकी समानकालहीमें अपेक्षाबुद्धि निवृत्त हो जाती है । अपेक्षा बुद्धि निवृत्त होनेपर, ज्योंही द्रव्यबुद्धिका उदय होता है, उसके तुल्यही कालमें द्वित्वका लय होता है । द्रव्यबुद्धिसे संस्कारोत्पत्तिके समकालमें गुणबुद्धिकी निवृत्ति होती है संग्रहश्लोकमें यों कहाहै, जैसे आदिमें अपेक्षाबुद्धिसे एकत्व जातिबुद्धिका विनाश होता है । पश्चात् द्वित्वोदयके सम समयमें तज्जातिबुद्धिसे अपेक्षाबुद्धिका लय होताहै ॥ १६ ॥

द्वित्वाख्यगुणधीकाले ततो द्वित्वं निवर्त्तते ।
अपेक्षाबुद्धिनाशेन द्रव्यधीजन्मकालतः ॥ १७ ॥

द्वित्वाख्य गुणबुद्धिके उदयकालमें द्वित्वकी निवृत्ति होती है । द्रव्यबुद्धिके जन्म समयमें अपेक्षाबुद्धिका नाश होनेपर ऐसा संघटित होता है ॥ १७ ॥

गुणबुद्धिर्द्रव्यबुद्ध्या संस्कारोत्पत्तिकालतः ॥
द्रव्यबुद्धिश्च संस्कारादिति नाशक्रमो मत इति ॥ १८ ॥

द्रव्यबुद्धिसे संस्कारोत्पत्तिके समकालमें गुणबुद्धिका विनाश होता है । अनन्तर संस्कारसे द्रव्यबुद्धिकी निवृत्ति होजाती है । यही निवृत्तिका क्रम है ॥ १८ ॥

बुद्धेर्बुद्ध्यन्तरविनाश्यत्वे संस्कारविनाश्यत्वे च प्रमाणं विवादाध्यासितानि ज्ञानानि उत्तरोत्तरकार्य्यविनाश्यानि क्षणिकविभुविशेषगुणत्वात् शब्दवत् । द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मसमकालमेकत्वसामान्याचिन्तया आश्रयनिवृत्तेरेव द्वित्वनिवृत्तिः कर्मसमकालमपेक्षाबुद्धिचिन्तनादुभाभ्यामिति संक्षेपः ।

अपेक्षाबुद्धिर्नाम विनाशकविनाशप्रतियोगिनी बुद्धिरिति बोद्धव्यम् ॥ १९ ॥

अपरबुद्धिको हृदय और संस्कारके आविर्भावसे जो बुद्धिका विनाश होता है, उसविषयमें परस्पर विरुद्धज्ञान सबहीप्रमाणहै। वह२ज्ञान उत्तरोत्तर कार्य्यद्वारा विनष्ट होताहै । इसविषयमें शब्दही दृष्टान्तहै शब्दही आकाशका गुण विशेषहै । वह क्षणिकहै । क्योंकि, एकशब्दके परे और एकशब्दकी उत्पत्ति होनेहीसे, प्रथमोत्पन्न शब्दका विनाश होताहै । उसप्रकार एकविषयके ज्ञानके परे अपरविषयके ज्ञान होनेपर प्रथम ज्ञानका नाश होता है । विभागजनक कर्म्ममात्रही द्रव्यारम्भक संयोगका प्रतिद्वन्द्वी है । इसकर्म्मके समकालमें एकत्वसामान्य चिन्ताद्वारा आश्रयका विनाश एवं अपेक्षाबुद्धिकी चिन्ता इन दोनोंप्रकारके कारणोंसे द्वित्वकी विनिवृत्ति होती है । संक्षेपमें इसीप्रकार कहा जाता है । विनाशक और विनाश्य इन दोनोंकी प्रतियोगिनी बुद्धिका नाम अपेक्षा बुद्धिहै । अर्थात् जिस बुद्धिसे विनाशक और विनाश्य दोनोंका पृथक् आकारसे ज्ञान हो उसीको अपेक्षाबुद्धि कहते हैं ॥ १९ ॥

वेद अध्ययनकर स्नान करना चाहिये, इत्यादिशास्त्र गुरुकुलनिवृत्तिपर । व्यवधानप्रतिबन्धक वरन् बाधित होता है इसप्रकार नहीं माना जाता । क्योंकि, स्नानकर भोजन करता है, इत्यादिके तुल्य पूर्वापरीभाव समानकर्तृत्वमात्रकी प्रतिपत्तिद्वारा अध्ययन और समावर्तन होनेका नैरन्तर्य प्रतिपन्न होता है । अतएव विधिसामर्थ्यवशात् अधिकरण सहस्रयुक्त

पूर्व्वमीमांसाशास्त्र आरम्भणीय । यह अधिकरण, उपोद्घातत्ववशात् सहित सर्व्वथा सम्बन्ध है ॥ २१ ॥

तदाह-

चिन्तां प्रकृतसिद्धार्थामुपोद्घातं प्रचक्षत इति ॥ २२ ॥

उसीप्रकार कहा है, प्रकृतिसिद्ध्यर्थ चिन्ताका नाम उपोद्घात है ॥ २२ ॥

इदमेवाधिकरणं गुरुमतमनुसृत्योपन्यस्यते । अष्टवर्षं ब्राह्मण-मुपनयीत तमध्यापयीतेत्यत्राध्यापनं नियोगविषयः प्रतिभासते। नियोगश्च नियोज्यमपेक्षते । कश्चात्र नियोज्य इति चेदाचार्य्य-ककाम एव सम्मानेनेत्यादिना पाणिन्यनुशासनेनाचार्य्यकरणे ष्यमाणे नयतेर्धातोरात्मनेपदस्य विधानात् उपनयने यो नियो-ज्यः स एवाध्यापनेपि तयोरेकप्रयोगत्वात् ॥ २३ ॥ २४ ॥

यही अधिकरण गुरुमतानुसरणपूर्वक उपन्यस्त होता है । आठवर्षके ब्राह्मणके लडकेका उपनयन समाधान और उसको पढ़ाना चाहिये । यहां अध्यापन नियोगविषय कहकर प्रति-भात होता है । नियोगनियोज्यकी अपेक्षा करता है । इसस्थानम नियोज्य कौन है इसप्रश्न-के उत्तरमें पाणिनिके अनुशासन अनुसार आचार्य्यप्राप्त होनेपर, नी धातुके उत्तरआत्मने पद विधानकर जो व्यक्ति उपनयनमें नियोज्य होता है वही अध्यापनमेभी नियोज्य होता है । क्योंकि, दोनोंका एकत्र प्रयोग हुआ है ॥ २३ ॥ २४ ॥

अत एवोक्तं मनुना मुनिना-

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।

सांगञ्च सरहस्यञ्च तमाचार्य्यं प्रचक्षत इति ॥ २५ ॥

इसीकारण मनुमुनिने कहा है जो द्विज शिष्यको उपनीतकर सांग और सरहस्य वेद अध्ययन करावे उसको आचार्य कहते हैं ॥ २५ ॥

ततश्चाचार्य्यकर्तृकमध्यापनं माणवककर्तृकेणाध्ययनेन विना न सिद्ध्यतीत्यध्यापनविधिप्रयुक्त्यैवाध्ययनानुष्ठानं सेत्स्यति प्रयो-ज्यकव्यापारमन्तरेण प्रयोजकव्यापारस्यानिर्वाहात् ॥ २६ ॥

इसकारण आचार्य्यकर्तृक अध्यापन माणवककर्तृक अध्ययनविना सिद्ध नहीं होता, उसप्रकार अध्यापन विधिका प्रयोगद्वाराही अध्ययनानुष्ठान सिद्ध होताहै । जिसकारण, प्रयोज्यव्यापारके विना प्रयोजक व्यापारका निर्व्वाह नहीं होता ॥ २६ ॥

तर्ह्यध्येतव्य इत्यस्य विधित्वं न सिध्यतीति चेन्मासैत्सीत् का नो हानिः पृथगध्ययनविधेरभ्युपगमे प्रयोजनाभावाद्विधित्वस्य नित्यानुवादत्वेनाप्युपपत्तेः । तस्मादध्ययनविधिमुपजीव्य पूर्वमुपन्यस्तौ पूर्वोत्तरपक्षौ प्रकारान्तरेण प्रदर्शनीयौ विचारशास्त्रमवैधत्वेनानारब्धव्यमिति पूर्वपक्षः वैधत्वेनारब्धव्यमिति राद्धान्तः ॥ २७ ॥

इसप्रकार होनेसे अध्येतव्य, इसवाक्यका विधित्व सिद्ध नहीं होसकता । न हो, उससे हमारी हानि क्या ? पृथक् अध्ययन विधिका अभ्युपगम होनेसे प्रयोजनके अभाववशात्, नित्यानुवादत्वद्वाराभी विधित्वकी उपपत्ति होती है । इसकारण, अध्ययनविधिको आश्रयकर, पहिले जिनका निर्देश किया गयाहै, वही पूर्वपक्ष और उत्तरपक्ष, प्रकारान्तरसे प्रदर्शन किये गये हैं । उनमें विचारशास्त्र अवैधत्वद्वारा अनारम्भणीय, यह पूर्व्वपक्ष एवं वैधत्वद्वारा वह आरम्भणीय, यही उत्तर पक्ष है ॥ २७ ॥

तत्र वैधत्वं वदता वदितव्यं किमध्यापनविधिर्माणवकस्यार्थावबोधमपि प्रयुङ्क्ते किं वा पाठमात्रम् । नाद्यः विनाप्यर्थावबोधेनाध्यापनसिद्धेः । न द्वितीयः पाठमात्रे विचारस्य विषयप्रयोजनयोरसम्भवादापाततः प्रतिभातः सन्दिग्धोऽर्थो विचारशास्त्रविषयो भवति । तथा सति यत्रार्थावगतिरेव नास्ति तत्र सन्देहस्य का कथा विचारफलस्य निर्णयस्य प्रत्याशा दूरत एव ॥ २८ ॥

इसमें वैधत्वनिर्देश रूपसे कहना चाहिये, अध्यापन विधिद्वारा माणवकका अर्थावबोध प्रयोजित किंवा पाठमात्रका प्रयोग होता है ? पहिला नहीं । क्योंकि, अर्थावबोधके बिना; अध्यापन सिद्ध होजाता है । द्वितीयभी नहीं । क्योंकि पाठमात्रसे विचारका विषय और प्रयोजन सम्भव नहीं । आपाततः प्रतिभात सन्दिग्ध अर्थ विचारशास्त्रका विषय होजाता है । ऐसा होनेसे जिसस्थलमें अर्थबोध नहीं होता. वहां सन्देहकी बात क्या विचार निर्णयकी प्रत्याशाभी दूर होजाती है ॥ २८ ॥

तथा च यदसन्दिग्धं प्रयोजनं तत्प्रेक्षावत्प्रतिपित्सागोचरं यथा ननन्तरेन्द्रियसन्निकृष्टः स्पष्टालोकमध्यमध्यासीनो वट

इति न्यायेन विषयप्रयोजनयोरसम्भवेन विचारशास्त्रमनारभ्य-मिति पूर्वः पक्षः अध्यापनविधिनार्थावबोधो मा प्रयोजि तथापि सांगवेदाध्यायिनो गृहीतपदपदार्थसंगतिकस्य पुरुषस्य पौरुषेये-ष्विव प्रबन्धेषु आम्नायेऽप्यर्थावबोधः प्राप्नोत्येव ॥ ३९ ॥

और इसी प्रकार, जो असन्दिग्ध प्रयोजन, वह विद्वान् स्वर्गके प्रतिपादनकी इच्छाका विषयभूत, मनसहित इन्द्रियगणके सन्निकर्षसे अधिष्ठित एवं स्पष्ट आलोकमें अवस्थित घट स्वरूप, इसप्रकार न्यायानुसार, विषय और प्रयोजनकी सम्भावनावशात् विचारशास्त्र आरम्भणीय नहीं, यही पूर्वपक्ष। अध्यापनविधिद्वारा अर्थावबोध प्रयोजित न हो; तथापि, साङ्गवेदके अध्ययनमें प्रवृत्त होकर, पद पदार्थ सङ्गतिका ज्ञान होनेसे, पौरुषेय प्रबन्धकी नाईं। आम्नायका अर्थावबोध होजाता है ॥ ३९ ॥

ननु यथा विषं भुङ्क्ष्वेत्यत्र प्रतीयमानोऽप्यर्थो न विवक्ष्यते मास्य गृहे भुङ्क्था इति भोजनप्रतिषेधस्य मातृवाक्यविषयत्वात् तथा-म्नायार्थस्याविवक्षायां विषयाद्यभावदोषः प्राचीनः प्रादुःष्या-दिति चेन्मैवं वोचः दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यसम्भवात् । विषभोजनवाक्यस्याप्तप्रणीतत्वेन मुख्यार्थपरिग्रहे बाधःस्यादिति विवक्षा नाश्रीयते । अपौरुषेये तु वेदे प्रतीयमानार्थः कुतो न विवक्ष्यते । विवक्षिते च वेदार्थे यत्र यत्र पुरुषस्य सन्देहः स सर्वोऽपि विचारशास्त्रस्य विषयो भविष्यति तन्निर्णयस्य प्रयोजनं तस्मादध्यापनविधिप्रयुक्तेनाध्ययनेनावगम्यमानस्यार्थस्य वि-चारार्हत्वाद्विचारशास्त्रस्य वैधत्वेन विचारशास्त्रमारम्भणीयमिति राद्धान्तसंग्रहः ॥ ४० ॥

जैसे, विष खाओ, इसस्थलमें, इसके घरमें नहीं खाना, इसप्रकार भोजनप्रतिषेध मातृ वाक्यका विषयीभूत कहकर, प्रतीयमान अर्थ विवक्षित नहीं होता, उसी प्रकार वेदार्थ की अविवक्षा घटनेसे, विषयादिका अभावदोष प्रादुर्भाव होता है, यह बात नहीं कह सकते, क्योंकि, दृष्टान्त और दार्ष्टान्तिक दोनोंका वैषम्यसम्भव एवं विषभोजन वाक्य आप्त प्रणीत, इसकारण मुख्यार्थ परिग्रहमें बाध घटता है, इसप्रकार विवक्षा प्रादुर्भूत नहीं हो सकती। वेद अपौरुषेय है। इसमें प्रतीयमान अर्थ किसकारण विवक्षित नहीं होगा? विव-क्षित अवस्थामें वेदार्थके जिस २ स्थलमें पुरुषका सन्देह उत्पन्न होता है, वह सम्पूर्ण विचार

शास्त्रका विषय होगा उसका निर्णय प्रयोजन । इसीकारण अध्ययनविधिकी सहायतासे प्रयोजित अध्ययनद्वारा जो अर्थ अवगत होता है, वह सर्व्वथा विचारके योग्य कहकर, विचारशास्त्रका वैधत्व और उसका निबन्धन विचारशास्त्र आरम्भणीय होता है, यही उत्तरपक्ष ॥ ४० ॥

स्यादेतत् वेदस्य कथमपौरुषेयत्वमभिधीयते तत्प्रतिपादकप्रमाणाभावात्, कथं मन्येथाः अपौरुषेयाः वेदाः सम्प्रदायाविच्छेदे सत्यस्मर्य्यमाणकर्तृकत्वादात्मवदिति, तदेतन्मंदं विशेषणासिद्धेः पौरुषेयवेदवादिभिः प्रलयसम्प्रदायविच्छेदस्य कक्षीकरणात् ॥ ४१ ॥

अच्छा, यह माना गया । किन्तु वेद जो अपौरुषेय, सो किसप्रकार कहा जा सकता ? क्योंकि, उसका प्रतिपादक प्रमाण नहीं, सम्प्रदायके अविच्छेद होनेसे, अस्मर्यमाण कर्त्तृकत्ववशात् आत्माकी नाई वेद सब अपौरुषेय, यह कैसे समझते हो ? विशेषणकी असिद्धि वशात् यह कथन सङ्गत नहीं होसकता, विशेषतः पौरुषेय वेदवादी लोग प्रलयसमयमें सम्प्रदाय विच्छेद स्वीकार करलेते हैं ॥ ४१ ॥

किञ्च किमिदमस्मर्य्यमाणकर्तृकत्वं नाम अप्रतीयमानकर्तृकत्वमस्मरणगोचरकर्तृकत्वं वा । न प्रथमः कल्पः परमेश्वरस्य कर्त्तुः प्रमितेरभ्युपगमात् । न द्वितीयः विकल्पासहत्वात् । तथा हि किमेकेनास्मरणमभिप्रेयते सर्वैर्वा । नाद्यः यो धर्मशीलो जितमानरोप इत्यादिषु मुक्तकोक्तिषु व्यभिचारात् । न द्वितीयः सर्वास्मरणस्य असर्वज्ञदुर्ज्ञानत्वात् पौरुषेयत्वे प्रमाणसम्भवाच्च वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् कालिदासादिवाक्यवत् । वेदवाक्यान्याप्तप्रणीतानि प्रमाणत्वे सति वाक्यत्वात् मन्वादिवाक्यवदिति । ॥ ४२ ॥

मुक्तिवादमें व्यभिचार घटता है, द्वितीयभी नहीं होसकता । इसका कारण यह है, जो व्यक्ति सर्वज्ञ नहीं, वह कभी सबका असमरण अनुभव नहीं करसकता । विशेषतः वेद जो पौरुषेय, उसका प्रमाण है । कालिदासादिके वाक्यकी नाई, वाक्यत्ववशात् वेदवाक्य सब पौरुषेय हैं । एवं प्रमाण रहनेसे, मन्वादि वाक्यकी नाई, वाक्यत्ववशात् वेदवाक्य सम्पूर्ण आप्तप्रणीत ॥ ४२ ॥

ननु,–

वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनसामान्यादधुनाध्ययनं यथा ॥ ४३ ॥

यदि कहो कि, गुरुमुखसे सुनकर, वेदका अध्ययन होता है । जैसे तदनुसारही इस समय अध्ययन प्रचलित हुआहै ॥ ४३ ॥

इत्यनुमानं प्रति साधनं प्रगल्भत इति चेत्तदपि न प्रमाणकोटिं प्रवेष्टुमीष्टे ।

भारताध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
भारताध्ययनत्वेन साम्प्रताध्ययनं यथेति ॥ ४४ ॥

इत्यादि अनुमान प्रतिकूलमें बलवत् साधनस्वरूप है । किन्तु यह चूडान्त प्रमाण हो नहीं सकता । क्योंकि, लोकमें सचराचर कहा जाता है कि, गुरुके निकट अध्ययन करही कर, भारत अध्ययन करना होता है । जैसे इदानीं उसके अनुसार अध्ययन सम्पन्न होता है ॥ ४४ ॥

आभाससमानयोगक्षेमत्वात् । ननु तत्र व्यासः कर्त्तेति स्मर्य्यते ।
को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत् ॥ ४५ ॥

इत्यादि वाक्यके सहित उक्तवाक्यकी सामान्यता प्रतिपत्ति होती है । यदि कहो, व्यास उक्त भारतका कर्त्ता है किन्तु पुण्डरीकाक्षके विना और कौन महाभारतकी रचना करसकता है ॥ ४५ ॥

इत्यादाविति चेत्तदसारम् ।
ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत इति ॥ ४६ ॥

इत्यादि वचनवशात् वह सर्व्वथा असार होजाता है । इससमय जन यह है जो, ऋक्‌से सामका जन्म हुआ है । छन्द सब उसी सामसे प्रादुर्भूत एवं उससे यजुः आविर्भूत हुआ है ॥ ४६ ॥

पुरुषसूक्ते वेदस्य सकर्तृकताप्रतिपादनात् । किञ्चानित्यः शब्दः सामान्यवत्वे सति अस्मदादिबाह्येन्द्रियग्राह्यत्वाद्घटवत् ॥ ४७ ॥

इत्यादि पुरुषसूक्तके अनुसार वेदका सकर्तृकत्व प्रतिपादित हुआ है । अधिकन्तु सामान्य वत्ता रहनेसे अनित्य शब्द, घटकी नाईं अस्मदादि बाह्य इन्द्रियका गोचर होताहै ॥ ४७ ॥

नन्विदमनुमानं स एवायं गकार इति प्रत्यभिज्ञाप्रमाणप्रतिहतमिति चेत् तदति फल्गु लूनपुनर्जातकेशदलितकुन्दादाविव प्रत्यभिज्ञायाः सामान्यविषयत्वेन बाधकत्वाभावात् ॥ ४८ ॥

इत्यादि अनुमान, वह यही ग, इसप्रकार प्रत्यभिज्ञा प्रमाणद्वारा प्रतिहत होता है । किन्तु यह बात कभी प्रमाणयुक्त नहीं होसकती, क्योंकि, केश और कुन्दादि छिन्न होनेपर, पुनः उत्पन्न नहीं होता उसमे जैसे प्रत्यभिज्ञाका अवसर नहीं, उसी प्रकार, यहां भी प्रत्यभिज्ञासे सामान्यविषयत्ववशात् बाधकत्वका अभाव घटता है ॥ ४८ ॥

नन्वशरीरस्य परमेश्वरस्य ताल्वादिस्थानाभावेन वर्णोच्चारणासम्भवात् कथं तत्प्रणीतत्वं वेदस्य स्यादिति चेन्न तद्भद्रं स्वभावतोऽशरीरस्यापि तस्य भक्तानुग्रहार्थलीलाविग्रहग्रहणसम्भवात् ॥ ४९ ॥

यदि कहो कि, ईश्वरको शरीर नहीं है सुतरां तालुप्रभृति स्थानके अभावसे वर्णोच्चारण सम्भव नहीं होनेसे वेद प्रणयन कैसे घट सकता है ? यह बात युक्तिसङ्गत नहीं । क्योंकि स्वभावतः शरीरहीन होनेपरभी. वह भक्तोंके प्रति अनुग्रह वितरणार्थ लीलाविग्रह परिग्रह करता है ॥ ४९ ॥

तस्माद्वेदस्यापौरुषेयत्ववाचो युक्तिर्न युक्तेति चेत् तत्र समाधानमभिधीयते । किमिदं पौरुषेयत्वं सिसाधयिषितं पुरुषादुत्पन्नत्वमात्रं. यथा अस्मदादिभिरहरहरुच्चार्य्यमाणस्य वेदस्य प्रमाणान्तरेणाऽनुपलभ्य तत्प्रकाशनाय रचितत्वं वा, यथा अस्मदादिभिरेव निबध्यमानस्य प्रबन्धस्य प्रथमे न विप्रतिपत्तिः, चरमे किमनुमानबलात् तत्साधनमागमबलाद्वा । नाद्यः मालतीमाधवादिवाक्येषु व्यभिचारित्वात् ॥ ५० ॥

इसकारण, वेदका अपौरुषेयत्व वाक्य युक्ति सङ्गत नहीं । इस विषयका समाधान यह है जो इस पौरुषेयत्व शब्दसे पुरुषसे उत्पन्न मात्रत्व । जैसे अस्मदादिकर्तृक प्रतिदिन उच्चार्यमाण वेदकी उत्पत्ति होती है या नहीं ? प्रमाणान्तरद्वारा अर्थ उपलब्धकर, उसके प्रकाशार्थ रचना कियी गयी है; जैसे अस्मदादि प्रबन्धका निबन्धकर, यही क्या पौरुषेयत्व शब्द का अर्थ ? प्रथमकहनेसे, किसीप्रकार विप्रतिपत्ति नही होती द्वितीयपक्ष माननेसे, यह निशास्य है. जो, अनुमानबलात् अथवा आगमबलसे उसका साधन किया गयाहै ? अनुमानबल कहा नहीं जासकता । ऐसा होनेसे मालतीमाधवादि वाक्यमें व्यभिचार घटता है ॥ ५० ॥

अथ प्रमाणत्वे सतीति विशिष्यत इति चेत्तदपि न विपश्चितो मनसि वैषद्यमापद्यते । प्रमाणान्तरागोचरार्थप्रतिपादकं हि वाक्यं वेदवाक्यं, तत्प्रमाणान्तरगोचरार्थप्रतिपादकमिति साध्यमाने मम माता बन्ध्येतिवत् व्याघातापातात् ॥ ५१ ॥

प्रमाण है, कहनेसेभी, पण्डितोंके मनमें वैषद्यप्राप्ति नहीं होगी । क्योंकि, जिसका दूसरा प्रमाण नही, तादृश अर्थप्रतिपादक वाक्यही वेदवाक्य । सुतरां, प्रमाणहै, कहनेसे मेरी माता वंध्या है, इत्यादिवत् व्याघात आपतित होता है ॥ ५१ ॥

किञ्च परमेश्वरस्य लीलाविग्रहपरिग्राहाभ्युपगमेऽप्यतीन्द्रियार्थदर्शनं न सम्भावयतीति देशकालस्वभावविप्रकृष्टार्थहरणोपायाभावात् ॥ ५२ ॥

पुनः, परमेश्वरकी लीलाविग्रह परिग्रह माननेपरभी, अतीन्द्रियार्थ दर्शन नहीं सिद्ध होता। देश, काल और स्वभावका विप्रकृष्ट विषयग्रहणका उपायाभावही इसका हेतु ॥ ५२ ॥

न च तच्चक्षुरादिकमेव तादृक्प्रतीतिजननक्षममिति मन्तव्यं दृष्टानुसारेणैव कल्पनाया आश्रयणीयत्वात् ॥ ५३ ॥

और चक्षुआदिभी उसप्रकारके अर्थकी प्रतीतिसाधनमें सक्षम नहीं । क्योंकि, दृष्टानुसारही कल्पनाका आविष्कार होता है ॥ ५३ ॥

तदुक्तं गुरुभिः सर्वज्ञनिराकरणवेलायाम् ।
यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तितेति ॥ ५४ ॥

गुरुलोगोंने सर्वज्ञनिराकरणवेलामें यह कहा है। जैसे जिस स्थानमें अतिदृष्ट होता है, अर्थात् प्रत्यक्षकी नाई उसकी आदि और अन्तक्रमसे दर्शन किया जाता, उस २ स्थानमें लोक सिद्ध पदार्थका किसीप्रकार व्यभिचार या व्यतिक्रम सम्भवित नही होता इसका दृष्टान्त है। जैसे, दूर और सूक्ष्मादि विषय दृष्टिगोचर होनसे श्रवण इन्द्रियकी वृत्ति उसमें किसीप्रकार प्रयोजित नही होती ॥ ५४ ॥

अत एव नागमबलात्तत्साधनं तेन प्रोक्तमिति पाणिन्यनुशासने जाग्रत्यपि काठककालापतैत्तिरीयमित्यादिसमाख्या अध्ययनसम्प्रदायप्रवर्त्तकविषयत्वेनोपपद्यते तद्वदत्रापि सम्प्रदायप्रवर्त्तकविषयत्वेनाप्युपपद्यते न चानुमानबलाच्छब्दस्यानित्यत्वसिद्धिः प्रत्यभिज्ञाविरोधात् ॥ ५५ ॥

इसकारणसे आगमबलसेभी वेदका पौरुषेयत्व सिद्ध वा प्रतिपन्न होना सम्भव नहीं। क्योंकि, वह एक प्रत्यक्ष सिद्ध घटना उसीप्रकार पाणिनिप्रोक्त, अनुशासनसे तत्कर्तृक प्रोक्त, इत्यादि सूत्रानुसार काठक अर्थात् कटक कर्तृक कथित, कालाप अर्थात् कलापकर्तृक प्रोक एवं तैत्तिरीय अर्थात् तित्तिरिकर्तृक कथित, इत्यादिसमाख्या जागृत है सो सब अध्ययन सम्प्रदाय प्रवर्त्तक विषयत्वद्वारा उपपन्न होता है। उसीप्रकार यह वेदभी अध्ययन सम्प्रदाय प्रवर्त्तक विषयत्वद्वाराभी सिद्ध होसक्ता है। अनुमानबलसे शब्दका अनित्यत्व साधन करनाभी सम्भव नही। क्योंकि, उसमें प्रत्यभिज्ञाका विरोध घटता है ॥ ५५ ॥

न चासत्यप्येकत्वे सामान्यनिबन्धनं तदिति साम्प्रतं सामान्यनिबन्धनत्वमस्य बलवद्बाधकोपनिपातादास्थीयते। क्वचिद्व्यभिचारदर्शनाद्वा तत्र क्वचिद् व्यभिचारदर्शने तदुत्प्रेक्षायामुक्तं स्वतः प्रामाण्यवादिभिः ॥ ५६ ॥

शब्द अनित्य होनेपर गकारादिवर्ण नानाप्रकार हो सकता है। एक गकार विनष्ट होनेपर उसका सजातीय द्वितीय गकार आश्रय कर. सो यह गकार ऐसा, ज्ञान अवश्य होगा [illegible] स्थलमें कुछभी विरोध नही। यह नहीं होसकता। प्रत्याभिज्ञानका इसप्रकार [illegible] होनेसे, आश्रय किया जाता है। यदि किसी स्थानमें [illegible] व्यभिचार दृष्ट होता है तो इसप्रकार सामान्य अवलम्बन किया [illegible]। [illegible] व्यभिचार दीखनेसे, सामान्य वादीगण सामान्य कल्पनाप्रसंगमें [illegible] है ॥ ५६ ॥

उत्प्रेक्षेत हि यो मोहादज्ञातमपि बाधनम्।
स सर्वव्यवहारेषु संशयात्मा विनश्यतीति ॥ ५७ ॥

जो व्यक्ति मोहवशात् अज्ञात बाधनाकीभी कल्पना करता है। सर्वप्रकार विषयही उसका मत सन्दिग्ध होजानेसे उसको विनष्ट होना होता है। अर्थात् उसकेद्वारा किसी विषयका किसीप्रकार निर्णय या मीमांसा नही होता ॥ ५७ ॥

नन्विदं प्रत्यभिज्ञानं गत्वादिजातिविषयं न गादिव्यक्तिविषयं तासां प्रतिपुरुषं भेदोपलम्भादन्यथा सोमशर्माधीते इति विभागो न स्यादिति चेत्तदपि शोभां न बिभर्ति गादिव्यक्तिभेदे प्रमाणाभावेन गत्वादिजातिविषयकल्पनायां प्रमाणाभावात् ॥ ५८ ॥

यदि कहो कि, यह प्रत्यभिज्ञान गत्वादि जातिविषयक नहीं। इसका कारण यह है जो, प्रतिपुरुषमेंही उन सबकी भेद उपलब्धि होती है। सो नहीं होनेसे सोमशर्म्मा अध्ययन करताहै, ऐसा विभाग नहीं होता। इसका उत्तर यह है जो यह बातभी किसी प्रकार शोभा नहीं पाती। क्योंकि, गादि व्यक्तिभेदसे प्रमाण नही। गत्वादि जातिविषय कल्पनामेंभी प्रमाणाभाव लक्षित होता है ॥ ५८ ॥

यथा गत्वमजानत एकमेव भिन्नदेशपरिमाणसंस्थानव्यक्त्युपधानवशात् भिन्नदेशमिवाल्पमिवमहदिव दीर्घमिव वामनमिव प्रथते तथा गव्यक्तिमजानत एकापि व्यञ्जकभेदात् तत्तद्धर्मानुबन्धिनी प्रतिभासते। एतेन विरुद्धधर्माध्यासात् भेदप्रतिभास इति प्रत्युक्तम् ॥ ५९ ॥

जैसे, गत्व न जाननेसे, एक पदार्थकोही भिन्न देश, परिमाण, संस्थान, व्यक्ति और नवशात् भिन्नदेशकी नाई, अल्पकी नाई महत्की नाई, दीर्घकी नाई, वामनकी नाई बोध होता है, उसी प्रकार जैसे व्यक्ति अवगत न होनेसभी, एककाभी व्यञ्जकभेदसे उस२ धर्म्मका अनुबन्धी करके प्रतीति होती है। विरुद्धधर्मके अध्यासवशतः जो भेद भान होता है, उल्लिखित सिद्धान्तद्वारा वह दूर हुआ ॥ ५९ ॥

तत्र किं स्वाभाविको विरुद्धधर्माध्यासो भेदसमधिकत्वेनाभिमतः प्रातीतिको वा। प्रथमे असिद्धिः अपरथा स्वाभाविकभेदाभ्युपगमादशगकारानुदचारयच्चत्र इति प्रतिपत्तिः स्यात न तु दशकृत्वो गकार इति। द्वितीये तु न स्वाभाविकभेदसिद्धिः।

न हि परोपाधिभेदेन स्वाभाविकमैक्यं विहन्यते। मा भून्नभसोऽपि कुम्भाद्युपाधिभेदात् स्वाभाविको भेदस्तत्र व्यावृत्तव्यवहारो नादनिदानः ॥ ६० ॥

इससमय पूछा जासकता है कि, भेदसाधन हेतु कहकर अभिमत विरुद्धधर्म्मका अध्यास या स्वभावसिद्ध, या प्रातीतिक अर्थात् प्रातीतिबलसेही उपलब्ध होता है ? इसका उत्तर यह है जो प्रथम अर्थात् स्वाभाविकभेद नही स्वाभाविक भेद स्वीकार करनेसे, चैत्रने दश गकार उच्चारण किया, इसप्रकार प्रतिपन्न होताहै, दशवार गकार उच्चारण किया, ऐसा प्रतिपन्न नही होता । द्वितीयपक्ष अर्थात् प्रातीतिक कहनेसे, स्वाभाविक भेदसिद्धिका असद्भाव हो उठता है क्योंकि, दूसरेकी उपाधिभेदद्वारा स्वाभाविक एकताकी कभी हानि नहीं हो सकती । कुम्भादिरूप उपाधिभेदसे आकाशका स्वाभाविक भेद सम्भव नही ॥ ६० ॥

तदुक्तमाचार्यैः—

प्रयोजनन्तु यज्जातेस्तद्वर्णादेव लभ्यते ।
व्यक्तिलभ्यन्तु नादेभ्य इति गत्वादिधीर्वृथेति ॥ ६१ ॥

आचार्य्योंने कहा है कि, जातिका जो प्रयोजन है, वह वर्णद्वाराही लभ्य होता है, और नादद्वाराही व्यक्तिलभ्यत्व सिद्ध होता है, इसकारण गत्वादि बुद्धि वृथा होती है ॥ ६१ ॥

या च—प्रत्यभिज्ञा यदा शब्दे जागर्त्ति निरवग्रहा ।
अनित्यत्वानुमानानि सैव सर्वाणि बाधते ॥ ६२ ॥

पुनः कहा है, प्रत्यभिज्ञा सर्व्वदा शब्दमें अव्याघात जागरूक रहती है । उसके द्वाराही सब अनित्यानुमान व्याहत होताहै ॥ ६२ ॥

एतेनेदमपास्तम् । यदवादि वागीश्वरेण मानमनोहरे अनित्यः शब्दः इन्द्रियविशेषगुणत्वाच्चक्षूरुपवदिति । शब्दद्रव्यत्ववादिनां प्रत्यक्षसिद्धेः ध्वन्यंशे सिद्धसाधनत्वाच्च अश्रावणत्वोपाधिबाधितत्वाच्च ॥ ६३ ॥

मानमनोहरमें वागीश्वरने जो कहाहै, इन्द्रियविशेषका गुण कहकर, शब्द, चक्षुरूपकी नाईं अनित्य. इसकेद्वारा वह खण्डित हुआ ॥ ६३ ॥

उदयनस्तु आश्रयाप्रत्यक्षत्वेऽप्यभावस्य प्रत्यक्षतां महता प्रबन्धेन प्रतिपादयन् निवृत्तः कोलाहलः उत्पन्नः शब्द इति व्यवहाराचरणे कारणं प्रत्यक्षं शब्दानित्यत्वे प्रमाणयति स्म ॥ ६४ ॥

उदयनाचार्य्यने प्रतिपादन किया है आश्रय अप्रत्यक्ष होनेपरभी अभाव प्रत्यक्ष होता है। जैसे कोलाहल निवृत्त होनेपर शब्द उत्पन्न होता है। इसप्रकार व्यवहाराचरणसे प्रत्यक्षको शब्दके अनित्यत्वमें उसने सप्रमाणित किया है ॥ ६४ ॥

सोऽपि विरुद्धधर्मसंसर्गस्य औपाधिकत्वोपपादनन्यायेन दत्तरक्तबलिनेव तालः समापोहि। नित्यत्वे सर्वदोपलब्ध्यानुपलब्धिप्रसङ्गो योन्यायभूषणकारोक्तः सोऽपि ध्वनिसंस्कृतस्योपलम्भाभ्युपगमात् प्रतिक्षिप्तः ॥ ६५ ॥

रुधिर बलिप्रदान करनेपर, ताल अर्थात् पिशाचविशेष जिसप्रकार निरस्त होता है। वहभी उसीप्रकार विरुद्धधर्म्मसंसर्गका औपाधिकत्व सम्पादन न्यायानुसार खण्डित होता है। न्यायभूषणकारने कहा है, नित्यत्व अवस्थामें सदा उपलब्धि और अनुपलब्धिकी प्रसक्ति होती है। यह मतवादभी ध्वनिसंस्कृतके उपलब्धि स्वीकारद्वारा प्रतिक्षिप्त होता है ॥ ६५ ॥

यत्तु युगपदिन्द्रियसम्बन्धित्वेन प्रतिनियतसंस्कारकसंस्कार्य्यभावानुमानं तदात्मन्यनैकान्तिकमसति कलकले ततश्च वेदस्यापौरुषेयतया निरस्तसमस्तशंकाकलंकांकुरत्वेन स्वतः सिद्धं धर्मे प्रामाण्यमिति सुस्थितम्।

स्यादेतत्–

प्रमाणत्वाप्रमाणत्वे स्वतः सांख्याः समाश्रिताः।
प्रथमं परतः प्राहुः, प्रामाण्यं वेदवादिनः ॥ ६६ ॥

युगपत् इन्द्रिय सम्बन्धित्वसे प्रतिनियत जो संस्कारक और संस्कारभावका अनुमान होता है वह कोलाहलके असद्भावसे आत्मामें ऐकान्तिकता प्राप्त नहीं होती। इसकारणसे वेदकी अपौरुषेयताद्वारा सब शङ्कारूप कलंकका अंकुर निरस्त होनेसे, धर्म्म जो स्वतः सिद्धप्रामाण्य विशिष्ट सो स्थिर हुआ। अच्छा, यह मानागया, किन्तु सांख्यवादिगण प्रमाणत्व और अप्रमाणत्व आश्रय करते हैं। वेदवादिगण प्रथम और परत प्रामाण्य निर्देश करते हैं ॥ ६६ ॥

नैयायिकास्ते परतः सौगताश्चरमं स्वतः।
प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रमाणतामिति ॥ ६७ ॥

नैयायिकलोग परतः प्रमाण मानते हैं। सौगत लोग स्वतः चरम प्रामाण्य निर्देश करते हैं ॥ ६७ ॥

वादिविवाददर्शनात् कथङ्कारं स्वतःसिद्धं धर्मप्रामाण्यमिति सिद्ध-
वत्त्वस्य स्वीक्रियते । किञ्च किमिदं स्वतः प्रामाण्यं नाम ? किं
स्वत एव प्रामाण्यस्य जन्म ? आहोस्वित् स्वाश्रयज्ञानजन्य-
त्वम् ? किमुत स्वाश्रयज्ञानसामग्रीजन्यत्वम् ? उताहो ज्ञान-
सामग्रीजन्यज्ञानविशेषाश्रितत्वम् ? किंवा ज्ञानसामग्रीमात्र
जन्यज्ञानविशेषाश्रितत्वम् ? तत्राद्यः सावद्यः कार्य्यकारणभाव-
स्य भेदसमानाधिकरणत्वेनैकस्मिन्नसम्भवात्, नापि द्वितीयः
गुणस्य सतो ज्ञानस्य प्रामाण्यं प्रति समवायिकारणतया द्रव्य-
त्वापातात्, नापि तृतीयः प्रामाण्यस्योपाधित्वे जातित्वे वा
जन्मायोगात्, स्मृतित्वानधिकरणस्य ज्ञानस्य बाधात्यन्ता-
भावः प्रामाण्योपाधिः, न च तस्योत्पत्तिसम्भवः अत्यन्ताभाव-
स्य नित्यत्वाभ्युपगमादतएव न जातेरपि जनिर्युज्यते, नापि
चतुर्थः ज्ञानविशेषो ह्यप्रमा विशेषसामग्र्याञ्च सामान्यसामग्री
अनुप्रविशति शिंशपासामग्र्यामिव वृक्षसामग्री अपरथा तस्याक-
स्मिकत्वं प्रसज्जेत् । तस्मात् परतस्त्वेन स्वीकृताप्रामाण्यं
विज्ञानसामग्रीजन्याश्रितमित्यतिव्याप्तिरापद्येत ॥ ६८ ॥

इसप्रकार वादिगणका विवाद देखनेसे किसप्रकार स्वतः सिद्ध धर्म्मप्रामाण्य सिद्धवत् कर माना जासकता है ? और स्वतः प्रामाण्यका अर्थ क्या है ? स्वतःही क्या प्रामाण्यका जन्म होता है ? या स्वाश्रयज्ञान उसका जन्म होता है ? किम्वा स्वाश्रयज्ञान सामग्रीही उसका जन्म स्थान है । अथवा ज्ञानसामग्रीके लिये ज्ञानविशेषही उसका आश्रयस्थान ? किम्वा ज्ञानसामग्री मात्रके लिये ज्ञानविशेषका वह प्रतिष्ठित है । इनमें पहिला पक्ष स्वीकार करनेपर इससे उत्पन्न होता है । क्योंकि कार्य्यकारणभावका भेद समानाधिकरणत्वसे एकमें उसका सम्भव नहीं हो सकता । द्वितीयपक्षभी माना नहीं जासकता । इसका कारण यह ज्ञानका प्रामाण्य प्रति समवायिकारणतावशात् गुणका द्रव्यत्व संघटित होताहै । तृतीयपक्षभी अवलम्बनीय नहीं होसकता। क्योंकि, प्रामाण्यका उपाधित्व अथवा जातित्व किसीपक्षमें जन्मसंयोग नहीं [illegible] स्वीकार नहीं किया जाता जिसकारण प्रामाण्यका उपाधित्व अथवा जातित्व किसीपक्षमें जन्मसंयोग नहीं, स्मृतित्वका अधिकरणज्ञानका बाधात्यन्ताभावकोही प्रामाण्योपाधि

कहतेहैं। उसकी उत्पत्तिसम्भव नहीं, क्योंकि. अत्यन्ताभावका नित्यत्व स्वीकृत होताहै। इसलिये जातिकाभी जनि और जन्म कभी सङ्गत नहीं होसकता। चतुर्थपक्षभी निर्दोष नहीं है क्यों कि, शिंशपा सामग्रीमें वृक्षसामग्रीकी नाईं, विशेषसामग्रीमे सामान्य सामग्री अनुप्रविष्ट होती है। अन्यथा, उसका आकस्मिकत्व दोष होता है। अतएव परतः प्रमाण स्वीकार करनेसे, वह विज्ञानसामग्री जन्याश्रित हो उठता है उसमें अतिव्याप्ति दोष आता है ॥६८॥

पञ्चमविकल्पं विकल्पयामः, किं दोषाभावसहकृतज्ञानसामग्री-जन्यत्वमेव ज्ञानसामग्रीमात्रजन्यत्वं, किं दोषाभावासहकृतज्ञानसामग्रीजन्यत्वम्। नाद्यः दोषाभावासहकृतज्ञानसामग्रीजन्यत्वमेव परतः प्रामाण्यमिति परतःप्रामाण्यवादिभिरुररीकरणात्। नापि द्वितीयः दोषाभावसहकृतत्वेन सामग्र्यां सहकृतत्वे सिद्धे अनन्यथा सिद्धान्वयव्यतिरेकसिद्धतया दोषाभावस्य कारणताया वज्रलेपायमानत्वात्। अभावः कारणमेव न भवतीति चेत्तदा वक्तव्यम् अभावस्य कार्य्यत्वमस्ति न वा, यदि नास्ति तदा पटप्रध्वंसानुपपत्त्या नित्यताप्रसङ्गः, अथास्ति किमपराद्धं कारणत्वेनेति सेयमुभयतः पाशा रज्जुः ॥ ६९ ॥

अधुना, पञ्चम विकल्पकी विकल्पना कियी जाती है। दोषाभाव सहकृत ज्ञानसामग्री जन्यत्वकोही या ज्ञानसामग्रीमात्र जन्यत्व कहते हैं; अथवा क्या दोषाभावसहकृत ज्ञानसामग्री जन्यत्व निर्देश करता है? प्रथमपक्ष नहीं माना जासकता। क्योंकि, परतः प्रामाण्य वादी लोग स्वीकार करते हैं, दोषाभावसहकृत ज्ञानसामग्री जन्यत्वही परतःप्रामाण्य द्वितीयपक्षभी नहीं माना जासकता।इसका कारण यह है जो,दोषाभाव सहकृतत्त्वद्वारा सामग्रीमें सहकृतत्व सिद्ध होने-से,अन्यथा सिद्ध अन्वय और व्यतिरेककी सिद्धि सम्पन्न होती है।तन्निबन्धन दोषाभाव की कारणता साक्षात् वज्रलेप हो उठती है। सुतरां, अभाव कारण नहीं हो सकता। यदि इस प्रकार होता है, तो ऐसा कहा जासकता है, अभावका कार्य्यत्व है अथवा कार्य्यत्व नहीं। यदि कार्य्यत्व नहीं है, तो पट प्रध्वंसकी अनुपपत्तिद्वारा नित्यता दोष होता है। और यदि कार्य्यत्व है, तो कारणत्वने क्या अपराध किया! इसप्रकार यह उभयतः पाशा रज्जु होता है ॥ ६९ ॥

तदुदितमुदयनेन-

भावो यथा तथाभावः कारणं कार्य्यवन्मतामिति ॥ ७० ॥

उदयनने भी कहा है कि, भाव, अभावकी नाईं एवं करण, कार्य्यकी नाईं, परिगणित होता है ॥ ७० ॥

तथाच प्रयोगः विमता प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना कार्य्यत्वे सति तद्विशेषत्वात् अप्रमावत् प्रामाण्यं परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत् । तस्मादुत्पत्तौ ज्ञप्तौ च परतस्त्वे प्रमाणसम्भवात् स्वतः सिद्धं प्रामाण्यमित्येतत् पूतिकुष्माण्डायत इति चेत् तदेतदाकाशमुष्टिहननायते ॥ ७१ ॥

और प्रयोग जैसे, विमता प्रमा ज्ञानहेतुके अतिरिक्त हेतुके अधीन है । कार्य्यत्व अवस्थामें तद्विशेषत्ववशात् अप्रमाकी नाईं, प्रतीत होता है । इसकारण उत्पत्ति और ज्ञप्ति दोनों अवस्थामें परतस्त्व विषयमें प्रमाणसम्भव प्रयुक्त, प्रामाण्य स्वतः सिद्ध होता है । यह बात पूतिकुष्माण्डके तुल्य किसी कामकी नहीं ॥ ७१ ॥

विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वं प्रमायाः स्वतस्त्वमिति निरुक्तिसम्भवात् । अस्ति चात्रानुमानं विमता प्रमा विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तजन्या न भवति अप्रमात्वानधिकरणत्वात् घटादिवत् न चौदयनमनुमानं परतस्त्वसाधकमिति शङ्कनीयं प्रमा दोषव्यतिरिक्तज्ञानहेत्वतिरिक्तजन्या न भवति ज्ञानत्वादप्रमावदिति प्रतिसाधनग्रहग्रस्तत्वात् ज्ञानसामग्रीमात्रादेव प्रमोत्पत्तिसंभवे तदतिरिक्तस्य गुणस्य दोषभावस्य वा कारणत्वकल्पनायां कल्पनागौरवप्रसङ्गाच्च ॥७२॥

विज्ञानसामग्रीजन्यत्व अवस्थामें उसके अतिरिक्त हेतुसे अजन्यत्व प्रमाका स्वतस्त्व, इस प्रकार निरुक्तिसम्भववशात्, ऐसा कहा जाताहै, इसमें इसप्रकार अनुमान किया जासकता है, विमता प्रमा विज्ञानसामग्री जन्यत्वअवस्थामें उसके अतिरिक्त जन्य नहीं होसकती है । क्योंकि. घटादिकी नाईं इसमें अप्रमात्वका अधिकार नहीं और उदयनाचार्यका अनुमान परतस्त्व साधक, इसप्रकार आशङ्का नहीं कियी जासकती । प्रमा कभी दोष व्यतिरिक्त ज्ञानहेतुके अतिरिक्त जन्य नहीं ज्ञानसामग्रीमात्रसे प्रमाकी उत्पत्ति सम्भव होनेसे, उसके अतिरिक्त गुणका अथवा दोषाभावकी कल्पनामें कल्पना गौरवकी प्रसक्ति होती है ॥ ७२ ॥

ननु दोषस्याप्रमाहेतुत्वेन तदभावस्य प्रमां प्रति हेतुत्वं दुर्निवारमिति चेत न दोषाभावस्याप्रमाप्रतिबन्धकत्वेनान्यथा सिद्धत्वात् ॥ ७३ ॥

यदि कहोकि. दोष अप्रमाका हेतु है । ऐसा जानकर, उसका अभाव प्रमाके प्रतिकारण होता है । यह कारणत्व सर्वथा दुर्निवार है । इसका उत्तर यह है जो, अप्रमाका प्रतिबन्धकत्वसे दोषाभावका अन्यथासिद्धत्व सम्भावना नहीं ॥ ७३ ॥

तस्माद् गुणेभ्यो दोषाणामभावस्तदभावतः ।
अप्रामाण्यद्वयासत्त्वं तेनोत्सर्गो नयोदित इति ॥
तथा प्रमाज्ञप्तिरपि ज्ञानज्ञापकसामग्रीत एव जायते ।
न च संशयानुदयप्रसङ्गो बाधक इति युक्तं वक्तुं सत्यपि प्रतिभासपुष्कलकारणे प्रतिबन्धकदोषादिसमवधानात् तदुपपत्तेः ॥ ७४ ॥

प्रमाज्ञप्तिभी ज्ञानज्ञापक सामग्रीहीसे उत्पन्न होती है संशयका अनुदयप्रसंग बाधक होता है, ऐसा वाक्य युक्तियुक्त नहीं । क्योंकि, स्पष्टप्रतीयमान कारण सत्वमेंभी, प्रतिबन्धक दोषादिके समवधानवशतः उसकी उपपत्ति नहीं होती ॥ ७४ ॥

किञ्च तावकमनुमानं स्वतः प्रमाणं न वा । आद्ये अनैकान्तिकता, द्वितीये तस्यापि परतः प्रामाण्यमेवं तस्य तस्यापीत्यनवस्था दुरवस्था स्यात् ॥ ७५ ॥

पुनः, तुम्हारा अनुमान स्वतः प्रमाण होसकता है या नहीं । स्वतः प्रमाण होनेसे अनेकान्तिकता दोष आताहै । और स्वतः प्रमाण न होनेसे उसके परेभी प्रामाण्यहै । इसप्रकार उसके परे और उसके परेभी प्रामाण्य लक्षित होता है ऐसा होनेहीसे अनवस्था दुरवस्था संघटित होती है ॥ ७५ ॥

यदत्र कुसुमाञ्जलावुदयनेन झटिति प्रचुरप्रवृत्तेः प्रामाण्यनिश्चयाधीनत्वाभावमापादयता प्रण्यगादि । प्रवृत्तिर्हीच्छामपेक्षते तत्प्राचुर्य्यं चेच्छाप्राचुर्य्यम्, इच्छा चेष्टसाधनताज्ञानं, तच्चेष्टजातीयत्वलिंगानुभवं, सोऽपीन्द्रियार्थसन्निकर्षं प्रामाण्यग्रहन्तु न क्वचिदुपयुज्यत इति तदपि तस्करस्य पुरस्तात् कक्षे सुवर्णमुपन्य सर्वाङ्गोद्घाटनमिव प्रतिभाति । अतः समीहितसाधनज्ञानमेव प्रमाणतयावगम्यमानमिच्छां जनयतीत्यत्रैव स्फुट एव प्रामाण्यग्रहणस्योपयोगः ॥ ७६ ॥

कुसुमाञ्जलिमें उदयनाचार्य्यने झटिति प्रचुरप्रवृत्तिके प्रामाण्य निश्चयाधीनताका अभाव आपादन करते हुए कहा है, प्रवृत्ति इच्छाकी प्रतीक्षा करती है। उसके प्राचुर्य्यमें इच्छाका प्राचुर्य्य है। इच्छा फिर इष्टसाधनताज्ञानके आधीन है। इष्टसाधनताज्ञान और इष्टजातीयत्व लिंगानुभवसापेक्ष। वह लिंगानुभव फिर इन्द्रियार्थ सन्निकर्षकी अपेक्षा करता है प्रामाण्य ग्रहणकी कहीभी उपयोगिता नहीं। उदयनाचार्य्यका यह मतवाद चोरके सामने सुवर्णलेकर स्वर्णाङ्गादि उद्घाटनकी नाईं प्रतीत होता है अतएव सर्माहित ज्ञानसाधनही प्रमाणताद्वारा अवगम्यमान होकर, इच्छा समुत्पादन करता है, यही इसस्थानमें स्पष्टतः प्रामाण्यग्रहणकी उपयोगिता रूपसे लक्षित होती है ॥ ७६ ॥

किञ्च क्वचिदपि चेन्निर्विचिकित्सा प्रवृत्तिः संशयादुपपद्येत तर्हि सर्वत्र तथाभावसम्भवात् प्रामाण्यनिश्चयो निरर्थकः स्यात् अनिश्चितस्य सत्त्वमेव दुर्लभमिति प्रामाण्यं दत्तजलाञ्जलिकं भवेत्। इत्यलमतिप्रपञ्चेन ॥ ७७ ॥

किञ्च, कहीं भी यदि निर्विचिकित्सा प्रवृत्तिसंशयसे उत्पन्न होती है। ऐसा होनेसे सर्वत्र उसीप्रकार सम्भावित होजानेसे, प्रामाण्यनिश्चय निरर्थक होता है। अनिश्चितका सत्व सर्व्वथा दुर्लभ है। ऐसा होनेसे, प्रामाण्य दत्त जलाञ्जलिक होजाता है। बहुत विस्तारसे और प्रयोजन नहीं ॥ ७७ ॥

यस्मादुक्तं—

तस्मात् सद्बोधकत्वेन प्राप्ता बुद्धेः प्रमाणता।
अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यत इति ॥ ७८ ॥

जिस कारण कहा है, उसी कारण सद्बोधकतावशात् बुद्धिकी प्रमाणता प्राप्ति होती है ॥ ७८ ॥

तस्माद्धर्मे स्वतःसिद्धप्रमाणाभावे ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिविध्यर्थवादमन्त्रनामधेयात्मके वेदे यजेतेत्यत्र तप्रत्ययः प्रकृत्यर्थोपरक्तां भावनामभिधत्त इति सिद्धे व्युत्पत्तिमभ्युपगच्छतामभिहितान्वयवादिनां भट्टाचार्य्याणां सिद्धान्तो यागविषयो नियोग इति कार्य्ये व्युत्पत्तिमनुसरतामन्विताभिधानवादिनां प्रभाकरगुरूणां सिद्धान्त इति सर्वमवदातम् ॥ ७९ ॥

इति सर्वदर्शनसंग्रहे जैमिनीयदर्शनं समाप्तम् ॥ ०२ ॥

अतएव, धर्म्मे स्वतः सिद्ध प्रमाणाभाव होजानेसे, स्वर्ग काम व्यक्ति ज्योतिष्टोमद्वारा यजन करे, इत्यादि विध्यर्थवाद–मन्त्रनामधेयात्मक वेदमें, यजेत (अर्थात् यजन करे) इत्यादि स्थलमें प्रत्यय किया है, उसके द्वारा प्रकृत्यर्थ संयुक्त भावना अभिहित होता है। यह सिद्ध होनेसे, जो लोग व्युत्पत्ति स्वीकार करते हैं, उसप्रकार अभिहितान्वयवादी भट्टाचार्य्योंका सिद्धान्त इत्यादि । कार्य्यमें यागविषय नियोग व्युत्पत्तिका अनुसारी अन्विताभिधानवादी प्रभाकरगुरुगणका सिद्धान्त, यह विषय सर्व्वथा अवदात है ॥ ७९ ॥

इति सर्वदर्शनसंग्रहे जैमिनीयदर्शन समाप्त हुआ ॥ १२ ॥

अथ पाणिनिदर्शनम् ॥ १३ ॥

नन्वयं प्रकृतिभागः अयं प्रत्ययभाग इति प्रकृतिप्रत्ययविभागः कथमवगम्यत इति चेत् पीतपातञ्जलजलानामेतच्चोद्यं चमत्कारं न करोति व्याकरणशास्त्रस्य प्रकृतिप्रत्ययविभागपरतायाः प्रसिद्धत्वात् । तथाहि पतञ्जलेर्भगवतो महाभाष्यकारस्य इदमादिमं वाक्यं अथ शब्दानुशासनमिति ॥ १ ॥

यदि कहो कि यह प्रकृतिभाग, और यह प्रत्ययभाग इसप्रकार प्रकृति प्रत्यय विभाग किसप्रकार जाना जासकता है? इसका उत्तर यह है कि जिनने पातञ्जलजलपान किया है, उनके पक्षमें इसप्रकार परिकल्पना किसीप्रकार चमत्कारकारिणी नहीं हो सकती क्योंकि, यह प्रसिद्धही है कि, एक मात्र प्रकृति प्रत्यय विभाग लेकरही व्याकरण शास्त्रकी जड़ वा भित्ति स्थापित हुई है । उसीप्रकार, महाभाष्यकार पतञ्जलिने अथशब्दानुशासनं, इसप्रकार वाक्य विन्यस्त किया है ॥ १ ॥

अस्यार्थः अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते अधिकारः प्रस्तावः प्रारम्भ इति यावत् शब्दानुशासनशब्देन च पाणिनिप्रणीतं व्याकरणशास्त्रं विवक्ष्यते । शब्दानुशासनमित्येतावत्यभिधीयमाने सन्देहः स्यात् किं शब्दानुशासनं प्रस्तूयते न वेति तथा मा प्रसांक्षीदित्यथशब्दं प्रायुङ्क्त अथ शब्दप्रयोगबलेनार्थान्तरव्युदासेन प्रस्तूयते इत्यस्यार्थस्याभिधीयमानत्वात् । अनेन हि वैदिकाः शब्दाः शन्नोदेवीरभीष्टय इत्यादयः

तदुपकारिणो लौकिकाः शब्दाः गौरश्वः पुरुषो हस्ती शकुनि-रित्यादयश्चानुशिष्यन्ते व्युत्पाद्य संस्क्रियन्ते प्रकृतिप्रत्यय-विभागवत्तया बोध्यन्त इत्यनुशासनशब्दशासनबलात् कर्मण्येषा षष्ठी विधातव्या । तथा च कर्मणि चेति समासप्रतिषेधसम्भवात् शब्दानुशासनशब्दो न प्रमाणपथमवतरतीति ॥ २ ॥

इसका अर्थ यह है जो, यहां अथशब्द अधिकारार्थ है । अर्थात् अधिकार, या नी प्रस्ताव अथवा प्रारम्भ प्रयोजित होता है, अथ शब्दसे इसप्रकार बूझ पड़ता है । शब्दानु-शासनका अर्थ यह है जो, शब्दद्वारा पाणिनि प्रणीत व्याकरणशास्त्र विवक्षित हुआ है । शब्दानुशासन ऐसा कहनेसे सन्देह हो सकता है, शब्दानुशासनही क्या साक्षात् सम्बन्धमें प्रानावित होता है, अथवा, नहीं क्योंकि, अथशब्दके प्रयोगबलसे अर्थान्तर व्युदस्त करके, प्रस्तावित होता है, इसप्रकार अर्थ अभिधीयमान होता है, इसके द्वारा, शन्नोदेवी रभीष्टय इत्यादि वैदिक शब्द समुदाय एवं तदुपकारी लौकिक शब्द सब जिस प्रकार गो, घोटा, पुरुष, हस्ती और शकुनि इत्यादि अनुशासित अर्थात् व्युत्पादनपूर्वक संस्कृत या नी, प्रकृति प्रत्यय विभागवत्ता सहकारसे बोधित होता है, यही अनुशासन शब्द शासनबलसे प्रतीत होता है । यहां, कर्म्ममें षष्ठी विधान करना कर्त्तव्य और, कर्म्मणि चेति, इत्यादि सूत्रानुसार समास प्रतिषेध सम्भवित होनेसे, शब्दानुशासन प्रमाणपथसे अवतरण नहीं करसकते ॥ २ ॥

अत्रायं समाधिरभिधीयते, यस्मिन् कृतप्रत्यये कर्तृकर्मणोरुभयोः प्राप्तिरस्ति तत्र कर्मण्येव षष्ठीविभक्तिर्भवति न कर्त्तरीति बहुव्रीहिविज्ञानबलान्नियम्यते ॥ ३ ॥

प्रस्तावित स्थानमें वक्ष्यमाण विधानसे समाधान किया जासकता है, जहां कृत् प्रत्यय प्रयुक्तमें कर्त्ताकर्म्म दोनोंहीकी प्राप्ति होती है, वहां कर्म्महीमें षष्ठी विभक्ति होती है, कर्त्तामें नहीं बहुव्रीहि विज्ञानबलसे इसप्रकार नियमित होता है ॥ ३ ॥

तद्यथा आश्चर्य्यो गवां दोहोऽशिक्षितेन गोपालकेनेति, कर्तर्य्यपि षष्ठी भवतीति केचिद् ब्रुवते । अतएवोक्तं काशिकावृत्तौ, केचिद-विशेषेणैव विभाषामिच्छन्ति शब्दानामनुशासनमाचार्य्येणा-चार्य्यस्य वेति । शब्दानामनुशासनमित्यत्र तु शब्दानामनुशा-सनं नार्थानामित्येतावतो विवक्षितस्यार्थस्याचार्य्यस्य कर्त्तुरु-

पादानेन विनापि सुप्रतिपादत्वादाचार्य्योपादानमकिञ्चित्करं तस्मादुभयप्राप्तेरभावादुभयप्राप्तौ कर्मणीत्येषा षष्ठी न भवति किन्तु कर्तृकर्मणोः कृतीति कृद्योगे कर्त्तरि कर्मणि च षष्ठीविभक्तिर्भवतीति कृद्योगलक्षणा षष्ठी भविष्यति । तथा चेध्मप्रव्रश्चनपलाशशातनादिवत् समासो भविष्यति अथवा शेषलक्षणेयं षष्ठी तत्र किमपि चोद्यं नावतरत्येव ॥ ४ ॥

इसका दृष्टान्त जैसे शिक्षित गोपालककर्त्तृक विस्मयावह दोहन इत्यादि स्थानमें कर्तामें भी षष्ठी हो जाती है; कोई कोई ऐसा कहते हैं । इसीकारण, काशिकावृत्तिमें कहा है कि कोई कोई किसीप्रकार विशेष न करके विभाषाकी कामना करते हैं । शब्दानामनुशासनमाचार्य्येणाचार्यस्य वा इत्यादि स्थानमें शब्द सबका अनुशासन, इसप्रकार पद जो प्रयोगित हुआ है, उसमें शब्दोंका अनुशासन; अर्थोंका नहीं, इतना अर्थ विवक्षित है । आचार्य्यकर्तृक उपादानके विना भी इसप्रकार विवक्षित अर्थ अनायासही प्रतिपादित होता है सुतरां आचार्योपादान अकिञ्चित्कर हो जाता है । इसकारण दोनों प्राप्तिके अभावमें दोनों प्राप्ति होनेसे, कर्म्मणि, इत्यादि सूत्रानुसार षष्ठी विभक्ति सम्भावित नहीं । इसप्रकार इध्म प्रव्रश्चन और पलाशशातन इत्यादि तुल्य समास होगा । अथवा यह शेष लक्षणा षष्ठी उस विषयमें किसीप्रकारकी परिकल्पनाका अवसरही नहीं ॥ ४ ॥

यद्येवं तर्हि शेषलक्षणायाः षष्ठ्याः सर्वत्र सुवचत्वात् षष्ठीसमासप्रतिषेधसूत्राणामानर्थक्यं प्राप्नुयादिति चेत् सत्यं तेषां स्वरचिन्तायामुपयोगो वाक्यपदीये प्रादर्शि ॥ ५ ॥

यदि इसीप्रकार होता है तो शेष लक्षण षष्ठी सर्वत्र प्रयोजित होनेसे, षष्ठीसमास प्रतिषेध सूत्र सबका आनर्थक्य उपस्थित होता है । यह सत्य तो है, किन्तु स्वरचिन्ताप्रसंगमें वाक्य पदीयमें उनका उपयोग प्रदर्शित हुआ है ॥ ५ ॥

तदाह महोपाध्यायवर्द्धमानः—

लौकिकव्यवहारेषु यथेष्टं चेष्टतां जनः ।
वैदिकेषु तु मार्गेषु विशेषोक्तिः प्रवर्तताम् ॥ ६ ॥

इसीप्रकार महामहोपाध्याय वर्द्धमानने कहा है,—लोकमें लौकिक व्यवहार मार्गमें इच्छानुसार चेष्टा करसकता है, किन्तु वैदिकमार्गमें विशेषोक्ति प्रवर्तित होती है ॥ ६ ॥

इति पाणिनिसूत्राणामर्थमत्राभ्यधाद् यतः ।
जनिकर्त्तुरिति ब्रूते तत्प्रयोजक इत्यपीति ॥ ७ ॥

जिसकारण इसीप्रकार पाणिनिसूत्रोका अर्थ कहा गया है ॥ ७ ॥

तथाच शब्दानुशासनापरनामधेयं व्याकरणशास्त्रमारब्धं वेदितव्यमिति वाक्यार्थः सम्पद्यते ॥ ८ ॥

और जिसका अपर नाम शब्दानुशासन है वही व्याकरणशास्त्र आरब्ध हुआ है, जानना चाहिये । ऐसा वाक्यार्थ प्रतीत होता है ॥ ८ ॥

तस्यार्थस्य झटिति प्रतिपत्तये अथ व्याकरणमित्येवाभिधीयताम् । अथ शब्दानुशासनमित्यधिकाक्षरं मुधाभिधीयत इति नैवं शब्दानुशासनमित्यन्वर्थसमाख्योपादने तदीयवेदांगत्वप्रतिपादकप्रयोजनाख्यानसिद्धेः, अन्यथा प्रयोजनानभिधाने व्याकरणाध्ययने अध्येतॄणां प्रवृत्तिरेव न प्रसज्जेत् ॥ ९ ॥

यदि कहो उस अर्थका झटिति प्रतिपादनार्थ, अथ व्याकरण, इसप्रकार निर्देश करो, अथ शब्दानुशासन इत्यादि अधिकाक्षर वृथा निर्देश क्यों करते हो ? इसका उत्तर यह है जो, ऐसा नहीं कह सकते हो क्योंकि, शब्दानुशासन, ऐसा कहनेसे, अन्वर्थ समाख्याक उपपादनद्वारा उसका वेदांगत्व प्रतिपादक प्रयोजनाख्यान सिद्ध होता है । अन्यथा, प्रयोजनके अनभिधानसे व्याकरण अध्ययनमें अध्येतृगणकी प्रवृत्तिकी प्रसक्ति होन सम्भव नहीं ॥ ९ ॥

ननु निष्कारणो धर्मः षडंगो वेदोऽध्येतव्य इति अध्येतव्यविधानादेव प्रवृत्तिः सेत्स्यतीति चेन्नैवं तथा विधानेऽपि तदीयवेदांगत्वप्रतिपादकप्रयोजनानभिधाने तेषां प्रवृत्तेरनुपपत्तेः ।

तथाहि—

वेदान्नो वैदिकाः शब्दाः सिद्धाः लोकाच्च लौकिकाः ॥ ११ ॥

वेदोंसेही हमारे वैदिक शब्द सब सिद्ध हुए हैं । उसीप्रकार, लोकसेही लौकिक शब्द समूह सिद्ध हुए हैं ॥ ११ ॥

तस्मादनर्थकं व्याकरणमिति तस्माद्वेदांगत्वं मन्यमानास्तदध्ययने प्रवृत्तिमकार्षुः । ततश्चेदानीन्तनानामपि तत्र प्रवृत्तिर्न सिध्येत् । सा मा प्रसांक्षीदिति तदीयवेदांगत्वप्रतिपादकं प्रयोजनमन्वाख्येयमेव ॥ १२ ॥

ऐसा होनेपर व्याकरण अनर्थक हुआ जाता है । इसकारण, वेदांगत्व जानकर, उसके अध्ययनमें प्रवृत्ति कर सकते । तो इदानी जनलोगोंका उसमें प्रवृत्ति होना सम्भव नहीं । इसकारण, उसका वेदांगत्व प्रतिपादक प्रयोजन अन्वाख्यान करना कर्तव्य है ॥ १२ ॥

यद्यन्वाख्यातेऽपि प्रयोजने न प्रवर्त्तेरन् तर्हि लौकिकशब्दसंस्कारज्ञानरहितास्ते यज्ञ कर्मणि प्रत्यवायभाजो भवेयुः । धर्माद्धीयेरन् अतएव याज्ञिकाः पठन्ति, आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति, अतस्तदीयवेदांगत्वप्रतिपादकप्रयोजनान्वाख्यानार्थमथशब्दानुशासनमित्येव कथ्यते नाथव्याकरणमिति ॥ १३ ॥

प्रयोजन अन्वाख्यात होनेसे भी, यदि प्रवृत्ति न हो, जो, लौकिक शब्द संस्कार ज्ञान तिरोहित होजानेसे वे यज्ञकार्यमें प्रत्यवायभागी होना है । एवं धर्म्महीन होजाता है । इसकारण याज्ञिक लोग कहा करते हैं कि, आहिताग्नि ब्राह्मण अपशब्द प्रयोगकर, प्रायश्चित्त स्वरूप सारस्वती नामक इष्टि निर्व्वपण करें । इसीकारण उसका वेदाङ्गत्व प्रतिपादक प्रयोजनका अन्वाख्यानार्थ है । अथ शब्दानुशासन, इसप्रकार कहा गया है. अथ व्याकरण; इसप्रकार कहा नहीं जाता ॥ १३ ॥

भवति च व्याकरणशास्त्रस्य प्रयोजनं (तस्य तदुद्देशेन प्रवृत्तेः प्रयोजनं) यथास्वर्गोद्देशेन प्रवृत्तस्य यागस्य स्वर्गः प्रयोजनं तस्मात् शब्दानुशिष्टिः संस्कारपदवेदनीया शब्दानुशासनस्य प्रयोजनम् । नन्वेवमप्यभिमतं प्रयोजनं न लभ्यते तदुपायाभावात् । अथ प्रतिपदपाठ एवाभ्युपाय इति मन्येथाः तर्हि

स ह्यनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठो भवेत् । शब्दापशब्दभेदेनानंत्याच्छब्दानाम्, एवं हि समाम्नायते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदपाठविहितानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम ॥ १४ ॥

स्वर्गही जिसप्रकार स्वर्गोद्देशमें अनुष्ठित यज्ञका प्रयोजन, संस्कार पदवाच्य शब्दानुशिष्टि उसीप्रकार शब्दानुशासनका प्रयोजन है । यदि कहो कि, उपमाभाववशतः इस प्रकार अभिमत प्रयोजन लब्ध नहीं होता । और प्रतिपद पाठको भी इसप्रकार अभ्युपाय कहकर नहीं समझ सकते । तो, उन शब्दोंके प्रतिपादनविषयमें अनभ्युपाय होता है, क्योंकि, शब्द और अपशब्दभेदसे शब्दोंका आनंत्य लक्षित होता है । इसका समाम्नाय यह है जो बृहस्पतिने इन्द्रको दिव्यसहस्रवर्ष प्रतिपद पाठविहित शब्दोंका शब्दपारायण कहा था, किन्तु अन्तको प्राप्त नहीं हुए ॥ १४ ॥

बृहस्पतिश्च प्रवक्ता, इन्द्रोऽध्येता, दिव्यं वर्षसहस्रमध्ययनकालः। न च पारावातिरभूत् । किमुताद्य यश्चिरं जीवति सोऽब्दशतम्॥१५॥

इसप्रकार बृहस्पति प्रवक्ता, इन्द्र अध्ययन कर्त्ता, दिव्यसहस्रवर्ष अध्ययन काल इसमें भी पार नहीं पाया तो अधुनातन समयमें जो व्यक्ति दीर्घजीवी होता है, वह सौवर्ष, उसकी बात और क्या कहूं ॥ १५ ॥

अधीतिबोधाचरणप्रचारणैश्चतुर्भिरुपायैर्विद्योपयुक्ता भवति । तत्राध्ययनकालेनैव सर्वमायुरुपयुक्तं स्यात्तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठ इति प्रयोजनं न सिध्येदिति ॥१६॥

अध्ययन, बोध, आचरण और प्रचारण इन चारप्रकारके उपायोंसे विद्या उपयुक्त होती है । उनमें अध्ययन समयद्वारा यदि सम्पूर्ण आयु उपयुक्त हो तो शब्दोंके प्रतिपादन विषयमें प्रतिपद पाठ अनभ्युपाय होता है । इसप्रकार प्रयोजनसिद्धि पराहत होती है ॥ १६ ॥

इति चेन्मैवं शब्दप्रतिपत्तेः प्रतिपदपाठसाध्यत्वानंगीकारात् । प्रकृत्यादिविभागकल्पनवत्सु लक्ष्येषु सामान्यविशेषरूपाणां लक्षणानां पर्जन्यवत्सकृदेव प्रवृत्तौ बहूनां शब्दानामनुशासनोपलम्भात् । तथाहि कर्मणीत्येकेन समान्यरूपेण लक्षणेन कर्मोपपदाद्धातुमात्रादण्प्रत्यये कृते कुम्भकारः काण्डलाव इत्यादीनां बहूनां शब्दानामनुशासनमुपलभ्यते । एवमातोऽनुपसर्गे इति

पदपाठस्याशक्यत्वप्रतिपादनपरोऽर्थवादः । नन्वन्येष्वप्यङ्गेषु सत्सु किमित्येतदेवाद्रियते । उच्यते प्रधानञ्च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति ॥ १७ ॥

ऐसा नहीं कह सकते । क्यों कि, शब्दोंकी प्रतिपत्ति प्रतिपद पाठ साध्यकरके नहीं स्वीकृत होती है । विशेषतः प्रकृत्यादि विभाग कल्पनायुक्त लक्ष्योंमें सामान्यविशेषरूप लक्षणोंका एकबारमात्र प्रवर्त्तनामें ही बहुशब्दका अनुशासन उपलब्ध होता है । उसीप्रकार, कर्म्मणि, इत्यादि एकमात्र सामान्यरूप लक्षणद्वाराही कर्मोपपद धातुमात्रमें अणप्रत्यय विहित होनेसे कुम्भकार काण्डलाव इत्यादि बहुत शब्दोंका अनुशासन उपलब्ध होता है । छ. अंगोमें व्याकरणही प्रधान अंग करके कहा गया है । प्रधानमें यत्न करनेसे, फललाभ करनेमें समर्थ होता है ॥ १७ ॥

तदुक्तम्—

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
प्रथमं छन्दसामंगमाहुर्व्याकरणं बुधा इति ॥ १८ ॥

उसीप्रकार, कहा है, पण्डितोंने व्याकरणकोही छन्दोंमें प्रथम अंगरूपसे निर्देश किया है ॥ १८ ॥

तस्मात् व्याकरणशास्त्रस्य शब्दानुशासनं भवति साक्षात् प्रयोजनं, पारम्पर्य्येण तु वेदरक्षादीनि । अतएवोक्तं भगवता भाष्यकारेण, रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति । साधुशब्दप्रयोगवशादभ्युदयोऽपि भवति । तथाच कथितं कात्यायनेन, शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देनेति । अन्यैरप्युक्तम्, एकः शब्दः सम्यक्ज्ञातः सुष्टु प्रयुक्तः स्वर्गे लोके कामधुग्भवतीति ॥ १९ ॥

इसीकारण, शब्दानुशासन व्याकरणशास्त्रका साक्षात प्रयोजन है और वेदरक्षादि परम्परित प्रयोजन है । इसीकारण भगवान् भाष्यकारने कहा है, रक्षा, ऊह, आगम, लघु, असन्देह आदि कतिपय प्रयोजन शब्दका वाच्य है और साधुशब्दके प्रयोगवशात अभ्युदयभी होता है । उसीप्रकार कात्यायनने कहा है; शास्त्रपूर्वक प्रयोगसे अभ्युदय संपादित होता है । वेद शब्दद्वारा भी उसके तुल्य फल होता है । अन्यान्य लोगोंनेभी कहा है, एकशब्द सम्यक् ज्ञात कर प्रयोग करनेसे स्वर्ग लोकमें कामदोहन करता है ॥ १९ ॥

यथा-

नाकमिष्टसुखं यान्ति सुयुक्तैर्बद्धवाग्रथैः ।

अथ पत्कांक्षिणो यान्ति ये चीकमतभाषिणः ॥ २० ॥

पुनः कहा है, सुप्रयुक्त बद्धवाक्रूप रथद्वारा इष्टसुखसम्पन्न स्वर्गमें गमन किया जाता है ॥ २० ॥

नन्वचेतनस्य शब्दस्य कथमीदृशं सामर्थ्यमुपपद्यत इति चेन्मैवं मन्येथाः महता देवेन साम्यश्रवणात् । तदाह श्रुतिः "चत्वारि शृङ्गास्त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश । व्याचकार च भाष्यकारः । चत्वारि शृंगाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपातास्त्रयो अस्य पादाः लडादिविषयाः त्रिधा भूतभविष्यद्वर्त्तमानकालाः द्वे शीर्षे द्वौ नित्यानित्यात्मानौ नित्यः कार्य्यश्च व्यंगव्यञ्जकभेदात् सप्तहस्तासो अस्य तिङा सह सप्त सुब्विभक्तयः त्रिधा बद्धः त्रिषु स्थानेषु उरसि कण्ठे शिरसि च बद्धः वृषभ इति प्रसिद्धवृषभत्वेन रूपणं क्रियते वर्षणाद्वर्षणञ्च ज्ञानपूर्वकानुष्ठानेन फलप्रदत्वं रोरवीति शब्दं करोति रौतिः शब्दकर्मा इह शब्दशब्देन प्रपञ्चो विवक्षितःमहो देवो मर्त्याँ आविवेश महादेवः शब्दः मर्त्या मरणधर्माणो मनुष्यास्तानाविवेशेति महता देवेन परेण ब्रह्मणा साम्यमुक्तं स्यादिति जगन्निदानं स्फोटाख्यो निरवयवो नित्यः शब्दो ब्रह्म वेति ॥ २१ ॥

त्रिधाबद्ध क्यों, उरु, कण्ठ और मस्तक इन तीन स्थानोंमें बद्ध वृषभ अर्थात् ज्ञानपूर्वक अनुष्ठान करनेसे फल देता है । शब्द करता है, अर्थात शब्द इसका कर्म्म है यहां शब्द से प्रपञ्च विवक्षित है । इसप्रकार महान् देव क्या शब्द मर्त्य अर्थात् मरणधर्म्मशील मनुष्योंमें आविष्ट है । इसके द्वारा महादेव अर्थात् परब्रह्मके साथ समता कही गयी । इसकारण, जगत् निदान, स्फोटाख्य, निरवयव, नित्य, शब्द साक्षात ब्रह्म है ॥ २१ ॥

हरिणाभाणि ब्रह्मकाण्डे—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यत इति ॥ २२ ॥

हरिने स्वयं ब्रह्मकाण्डमें कहाहै, शब्दत्त्व आनादि निधन और अक्षयरूपी ब्रह्मस्वरूप है जिससे जगत्की प्रक्रिया होती है ॥ २२ ॥

ननु नामाख्यातभेदेन पदद्वैविध्यप्रतीतेः कथं चातुर्विध्यमुक्तमिति चेन्मैवं प्रकारान्तरस्य प्रसिद्धत्वात् । तदुक्तं प्रकीर्णके ।

द्विधा कैश्चित् पदं भिन्नं चतुर्द्धा पञ्चधापि वा ।
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवदिति ॥ २३ ॥

यदि कहो कि, नाम और आख्यातभेदसे दो प्रकारकी प्रतीति होती है । तो किसप्रकार चार प्रकारका कहा जासकता ? इसका उत्तर यह है जो, प्रकारान्तर प्रसिद्ध है । प्रकीर्णकमें सो कहा है जैसे, किसीकिसीने दो प्रकार, चार प्रकार, या पांच प्रकार, पदभेदसे कल्पना कियी है ॥ २३ ॥

कर्मप्रवचनीयेन वै पञ्चमेन सह पदस्य पञ्चविधत्वमिति हेलाराजो व्याख्यातवान् कर्मप्रवचनीयास्तु क्रियाविशेषोपजनितसम्बन्धावच्छेदहेतव इति सम्बन्धविशेषद्योतनद्वारेण क्रियाविशेषद्योतनादुपसर्गेष्वेवान्तर्भवतीत्यभिसन्धाय पदचातुर्विध्यं भाष्यकारेणोक्तं युक्तमिति विवेक्तव्यम् ॥ २४ ॥

हेलाराजने पांचप्रकारकी व्याख्या कियी है । भाष्यकारनेभी सो सम्बन्ध विशेष द्योतन द्वारा क्रियाविशेष द्योतनसे उपसर्गमें इसका अन्तर्भाव होता है, इसप्रकार अभिसन्धान पूर्वक पदचातुर्विध्य निर्देश किया है, वहभी युक्तियुक्त विचार करना चाहिये ॥ २४ ॥

ननु भवता स्फोटात्मा नित्यः शब्द इति निजागद्यत तन्न मृष्यामहे तत्र प्रमाणाभावादिति केचित ॥२५॥

अच्छा, आपने जो स्फोटात्मा नित्य शब्द इत्यादि वाक्यप्रयोग किया है, सो हमारे विचारमें नहीं आता । क्योंकि, उस विषयमें किसी प्रकारका प्रमाण नहीं ॥ २५ ॥

अत्रोच्यते, प्रत्यक्षमेवात्र प्रमाणं, गौरित्येकं पदमिति नानावर्णातिरिक्तैकपदावगतेः सर्वजनीनत्वान्न ह्यसति बाधके पदानुभवः शक्यो मिथ्येति वक्तुं पदार्थप्रतीत्यन्यथानुपपत्त्यापि स्फोटोऽभ्युपगन्तव्यः।न च वर्णेभ्य एव तत्प्रत्ययःप्रादुर्भवतीति परीक्षाक्षमं विकल्पासहत्वात् ॥ २६ ॥

इसका उत्तर यह है जो, इस विषयका प्रमाण प्रत्यक्ष है। जैसे, गौ, यह एक पद । इसप्रकार नानावर्णातिरिक्त एकपादगति सर्वजन सम्मत है । बाधक असत्वमें पदानुभव सुसाध्य होता है, मिथ्या नहीं कह सकते हो । पदार्थप्रतीतिकी अन्यथा उपपत्तिद्वाराभी स्फोट स्वीकार करना पडेगा । वर्णोंसेही तत्प्रत्यय प्रादुर्भूत नहीं होता, यह परीक्षा सह है । क्योंकि इसमे विकल्प नहीं है ॥ २६ ॥

किं समस्ता व्यस्ता वा अर्थप्रत्ययं जनयन्ति । नाद्यः वर्णानां क्षणिकानां समूहासम्भवात् । नान्त्यः व्यस्तवर्णेभ्योऽर्थप्रत्ययासम्भवात् । न च व्यासससमासाभ्यामन्यः प्रकारः समस्तीति। तस्माद्वर्णानां वाचकत्वानुपपत्तौ यद्बलादर्थप्रतिपत्तिः सः स्फोट इति वर्णातिरिक्तो वर्णाभिव्यङ्ग्योऽर्थप्रत्यायको नित्यः शब्दः स्फोट इति तद्विदो वदन्ति । अतएव स्फुटयते व्यज्यते वर्णैरिति स्फोटो वर्णाभिव्यंग्यः स्फुटोभवत्यस्मादर्थ इति स्फोटोऽर्थप्रत्यायक इति स्फोटशब्दार्थमुभयथा निराहुः ॥ २७ ॥

इससमय पूछना यह है कि, क्या समस्त या व्यस्तवर्ण अर्थप्रत्यय समुत्पादन करते हैं ? इसका उत्तर यह है जो आद्य अर्थात् समस्त नहीं । क्योंकि वर्ण सब क्षणिक हैं । उनका समूह असम्भव है । द्वितीय अर्थात व्यस्तवर्णभी अर्थप्रतीति उत्पन्न करनेमें समर्थ नहीं । क्योंकि, व्यस्तवर्णसे अर्थप्रत्यय सम्भव नहीं हो सकता । और व्यास और समास होनेसे अन्यप्रकारभी सिद्ध नहीं होता । इसकारण वर्णोंका वाचकत्व अनुपपन्न होनेसे, जिसके बलसे अर्थप्रतीति उत्पन्न होती है उसीको स्फोट कहते हैं । इसप्रकार वर्णातिरिक्त वर्णाभिव्यंग अर्थप्रत्यय समुद्भावक नित्यशब्द स्फोटवाच्य है । इसके जाननेवाले लोग इसप्रकार कहते हैं, इसकारण वर्णद्वारा जो स्फुटित हो अर्थात्

प्रकट हो उसका नाम स्फोट, यथा वर्णाभिव्यङ्ग । और इससे अर्थ प्रकटीभूत होता है, इसी कारण इसका नाम स्फोट है, अर्थप्रत्यय समुद्भावक । इसप्रकार दोनों प्रकारसे स्फोट शब्दार्थ कहा गया है ॥ २७ ॥

तथाचोक्तं भगवता पतञ्जलिना महाभाष्ये । अथ गौरित्यत्र कः शब्दो येनोच्चरितेन सास्नालांगूलककुद्खुरविषाणिनां सम्प्रत्ययो भवति स शब्द इत्युच्यते इति ॥ २८ ॥

भगवान् पतञ्जलिने महाभाष्यमें कहाहै कि, जो यह एक शब्द है । जो उच्चारित होनेसे सास्ना, लांगूल, ककुद्, खुर और विषाण इन सबकी एक साथ प्रतीति होती है उसीको शब्द कहते हैं ॥ २८ ॥

विवृतश्च कैयटेन वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाचकत्वमिच्छन्ति । वर्णानां वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसंगादित्यादिना तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापित इत्यन्तेन प्रबन्धेन ॥ २९ ॥

कैयटने और विस्तारपूर्व्वक कहाहै, वैयाकरण लोग वर्णको छोडकर पदकी वाचकता इच्छा करतेहैं। वर्णोंका वाचकत्व होनेपर, द्वितीयोच्चारण अनर्थक होजाताहै। इत्यादि विधानसे उसके अतिरिक्त स्फोट नादाभिव्यङ्ग्य वाचक कहकर, विस्तारक्रमसे वाक्यपदीयमें व्यवस्थापित हुआ है ॥ २९ ॥

ननु स्फोटस्याप्यर्थप्रत्यायकत्वं न घटते विकल्पासहत्वात् । किमभिव्यक्तः स्फोटोऽर्थं प्रत्याययति अनभिव्यक्तो वा । न चरमः सर्वदा अर्थप्रत्ययलक्षणकार्य्योत्पादप्रसंगात् स्फोटस्य नित्यत्वाभ्युपगमेन निरपेक्षस्य हेतोः सदा सत्त्वेन कार्य्यस्य विलम्बायोगात् ॥ ३० ॥

यदि कहो कि, विकल्पासहत्ववशतः स्फोटभी अर्थप्रतीतिका कारण नहीं होसकता । अभिव्यक्त स्फोटही अर्थप्रतीतिका कारण या अनभिव्यक्त स्फोटद्वाराही अर्थप्रत्यय समुद्भावित होता है ? सर्व्वदा अर्थप्रत्ययरूप कार्य्यका उत्पादन प्रसङ्गवशतः चरम अर्थात् अनभिव्यक्त स्फोट अर्थप्रतीतिका समुद्भावक नहीं हो सकता है । स्फोटका नित्यत्व स्वीकार करनेसे निरपेक्ष हेतुकी सर्वकालीन सत्ताद्वारा कार्य्यका विलम्बयोग घटता है ॥ ३० ॥

अथैतद्दोषपरिजिहीर्षया अभिव्यक्तः स्फोटोऽर्थं प्रत्याययतीति कक्षीक्रियते तथाभिव्यञ्जयन्तो वर्णाः किं प्रत्येकमभिव्यञ्जयन्ति संभूय वा पक्षद्वयेऽपि वर्णानां वाचकत्वपक्षे भवता ये दोषा भाषितास्त एव स्फोटाभिव्यञ्जकत्वपक्षे व्यावर्त्तनीयाः ।

तदुक्तं भट्टाचार्य्यैर्मीमांसाश्लोकवार्त्तिके—

यस्यानवयवः स्फोटो व्यज्यते वर्णबुद्धिभिः ।
सोऽपि पर्य्यनुयोगेन नैकेनापि विमुच्यते इति ॥ ३१ ॥

यदि उल्लिखित दोषपरिहार वासनामें अभिव्यक्त स्फोट अर्थ प्रतीतिका विधायक होता है इसप्रकार स्वीकार किया जाये तो जिज्ञास्य यही है, अभिव्यञ्जक वर्ण सब क्या प्रत्येकको अभिव्यक्त करता है ? या एकत्र मिलकर, इसप्रकार विधान करता है ? दोनों पक्ष माननेसे, वर्णोंके वाचकत्व पक्षमे आपने जो सब निर्देश किया है वह सबही स्फोटाभिव्यञ्जकत्व पक्षमें व्यावर्त्तनीय होता है । मीमांसा श्लोक वार्तिकमें, भट्टाचार्य्योंने भी कहा है, कि वर्ण बुद्धिद्वारा जिसका अवयवशून्य स्फोट होता है सो एकमात्र पर्यनुयोगद्वारा विमुक्त नहीं होता ॥ २१ ॥

विभक्त्यन्तेष्वेव वर्णेषु पाणिनिना ते विभक्त्यन्ताः पदमिति गौतमेन च पदसंज्ञाया विहितत्वात् सङ्केतग्रहणेनानुग्रहवशाद्वर्णेष्वेव पदबुद्धिर्भविष्यति तर्हि सर इत्येतस्मिन् पदे यावन्तो वर्णास्तावन्त एव रस इत्यत्रापि एवं वनं नवं नददीना रामो मारो राजा जारेत्यादिष्वर्थभेदप्रतीतिर्न स्यादिति चेन्न क्रमभेदेन भेदसम्भवात् ।

तदुक्तं तौतातितैः—

यावन्तो यादृशा ये च यदर्थप्रतिपादने ।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधका इति ॥ ३२ ॥

[illegible] अनुग्रहवशात् यदि वर्णमें सब पदबुद्धि संघटित होती है, तो 'सर' [illegible] रस इस पदमें भी तद्वर्ण लक्षित होता है । इसप्रकार वन और [illegible] इत्यादि पदसमूहमें भी अर्थभेद प्रतीति [illegible] नहीं कहसकते क्योंकि, क्रमभेदसेही सम्भावित होता है, उसीप्रकार, [illegible] अर्थ प्रतिपादनमें प्रज्ञात सामर्थ्य, वे उसी [illegible] ॥ ३२ ॥

तस्माद्यश्चोभयोः समो दोषो न तेनैकश्चोद्यो भवतीति न्यायात् वर्णानामेव वाचकत्वोपपत्तौ नातिरिक्तस्फोटकल्पनाऽवकल्पते इति चेत् तदेतत् काशकुशावलम्बनकल्पनं विकल्पानुपपत्तेः किं वर्णमात्रे पदप्रत्ययावलम्बनं वर्णसमूहे वा । नाद्यः परस्परविलक्षणवर्णमालायामभिन्नं निमित्तं पुष्पेषु विना सूत्रं मालाप्रत्ययवदित्येकं पदमिति प्रतिपत्तेरनुपपत्तेः । नापि द्वितीयः उच्चरितप्रध्वस्तानां वर्णानां समूहभावासम्भवात् । तत्र हि समूहव्यपदेशः । ये पदार्था एकस्मिन् प्रदेशे सहावस्थिततया बहवोऽनुभूयन्ते यथा एकस्मिन् प्रदेशे सहावस्थिततयानुभूयमानेषु धवखदिरपलाशादिषु समूहव्यपदेशः यथा वा गजनरतुरगादिषु न च ते वर्णास्तथानुभूयन्ते उत्पन्नप्रध्वस्तत्वात् । अभिव्यक्तिपक्षेऽपि क्रमेणैवाभिव्यक्तौ समूहासम्भवात् । नापि वर्णेषु काल्पनिकः समूहः कल्पनीयः परस्पराश्रयप्रसङ्गात् ॥ २३ ॥

वर्ण सबका वाचकत्व उपपन्न होनेसे, अतिरिक्त स्फोट कल्पनाकी आवश्यकता नहीं होती, यह बात कहनेसे, पूछना यह है जो वर्णमात्रमें अथवा वर्णसमूहमें यह प्रत्यय अवलम्बित होता है ? सूत्रके विना पुष्पमें जैसे मालाप्रत्यय सम्भव नहीं; उसीप्रकार, परस्पर विलक्षण वर्णमालामें पद प्रतिपत्ति उपपन्न नहीं हो सकती । सुतरां, वर्णमात्रमें पद प्रत्ययका अवलम्बन सम्भव नहीं । और उच्चारित प्रध्वस्तवर्ण सबका समूहभावभी सम्भव होता है । सुतरां, द्वितीयकल्पभी प्रयोजित होसकता है । जो सब पदार्थ एकप्रदेशमें एकत्रा वस्थानवशात बहुत कहकर अनुभूत होता है, उसी स्थानमें समूह व्यपदेश होता है । जैसे, एकप्रदेशमें एकत्र अवस्थितिसे अनुभूयमान धव, खादिर, पलाशादि वृक्ष सबमें समूह व्यपदेश होता है । अथवा, जैसे गज नर या घोड़ा आदिमें इसप्रकार समूह व्यपदेश होता है । उत्पन्न प्रध्वस्तवशात् ये सब वर्ण तदनुरूप नहीं अनुभूत होते अभिव्यक्तिपक्षमें भी क्रमानुसार अभिव्यक्ति होजानेसे, समूहभाव असम्भवित होता है पुनः वर्णोंमें काल्पनिक समूह भी नहीं किया जासकता । परस्पराश्रयही इसका कारण है ॥ २३ ॥

एकार्थप्रत्यायकत्वासिद्धौ तदुपाधिना वर्णेषु पदत्वप्रतीतिःतत्सि-
द्धावेकार्थप्रत्यायकत्वासिद्धिरिति । तस्माद्वर्णानां वाचकत्वासम्भ-

वात् स्फोटोऽभ्युपगन्तव्यः। ननु स्फोटवाचकतापक्षेऽपि प्रागुक्त-विकल्पप्रसरेण घट्टकुटीप्रभातायितमिति चेत्तदेतन्मनोराज्य-विजृम्भणं वैषम्यसम्भवात् ॥ ३४ ॥

एकार्थप्रत्यायकत्व सिद्धिमें उसकी उपाधिद्वारा वर्णोंमें पदत्वप्रतीति होती है । पदत्व-प्रतीति होनेसे, एकार्थप्रत्यायकत्व सिद्ध होता है । इसकारण वर्णोंका वाचकत्व असम्भवित होनेसे स्फोट मानना पडता है ॥ ३४ ॥

तथाहि अभिव्यञ्जकोऽपि प्रथमो ध्वनिः स्फोटमस्फुटमभिव्य-नक्ति उत्तरोत्तराभिव्यञ्जकक्रमेण स्फुटं स्फुटतरं स्फुटतमं यथा स्वाध्यायःसकृत्पठ्यमानो नावधार्य्यते अभ्यासेन तु स्फुटावसायः यथा वा रत्नतत्त्वं प्रथमप्रतीतौ स्फुटं न चकास्ति चरमे चेतसि य-थावदभिव्यज्यते नादैराहितबीजायामन्त्येन ध्वनिना सह॥आवृ-त्तिपरिपाकायां बुद्धौ शब्दोऽवधार्य्यत इति प्रामाणिकोक्तेः ॥३५॥

उसीप्रकार अभिव्यञ्जक होनेपरभी प्रथम ध्वनि अस्फुटरूपसे स्फोट अभिव्यक्तकरताहै पर, उत्तरोत्तर अभिव्यञ्जक क्रमसे स्पष्ट, स्पष्टतर, स्पष्टतम और रूपसे अभिव्यक्त करताहै । जैसे. स्वाध्याय एकवारमात्र पाठसे निश्चय नहीं होता, अभ्यासद्वाराही स्पष्ट प्रतीत होता है । अथवा जैसे, रत्नतत्व प्रथम प्रतीतिमें स्पष्टरूपसे ज्ञात नहीं होता अन्तमें चित्तमें यथावत् अभिव्यक्त होता है । पहिले नादद्वारा बीज आहित होता है । पीछे अन्त्य ध्वनिके सहित आवृत्तिके परिपाक होनेसे, बुद्धिमें शब्द अवधारित होता है । यही प्रामा-णिक वचन है ॥ ३५ ॥

तस्मादस्माच्छब्दादर्थं प्रतिपद्यामह इति व्यवहारवशाद्वर्णानां अर्थवाचकत्वानुपपत्तेः प्रथमे काण्डे तत्रभवद्भिर्भर्तृहरिभिरभिहि-तत्वात् निरवयवमर्थप्रत्यायकं शब्दतत्त्वं स्फोटाभावमभ्युपगन्त-व्यमित्येतत् सर्वम् ॥ ३६ ॥

इसकारण, इसशब्दसे अर्थ प्रतिपन्न करना चाहिये. इत्यादि व्यवहारवशात् वर्णोंका अर्थवाचकत्व अनुपपन्न है जैसे, प्रथमकाण्डमें परम माननीय भर्तृहरिने कहा है । उससे अर्थ प्रत्यायक निरवयव शब्दतत्व स्फोट मानना पड़ता है ॥ ३६ ॥

परमार्थसंविद्रूपसत्ता जातिरेव सर्वेषां शब्दानामर्थ इति प्रति-पादनपरे जातिसमुद्देशे प्रतिपादितम्। यदि सत्तैव सर्वेषां शब्दा-

नामर्थस्तर्हि सर्वेषां शब्दानां पर्य्यायता स्यात् तथा च क्वचिदपि युगपत्त्रिचतुरपदप्रयोगायोग इति महच्चातुर्य्यमायुष्मतः ।

तदुक्तम्—

पर्य्यायाणां प्रयोगो हि यौगपद्येन नेष्यते ।
पर्य्यायेणैव ते यस्माद्वदन्त्यर्थं न संहता इति ॥ ३७ ॥

जिसमें परमार्थ संवित्‌रूप सत्ता है, वही जाति समुदाय शब्दका अर्थ, इसप्रकार प्रतिपादन पर जातिसमुद्देशमें प्रतिपादित हुआ है। यदि सत्ता ही सब शब्दोंका अर्थ होता है, तो समुदायशब्दकी पर्य्यायता होती है। और, कहींभी युगपत् तीन चार पद प्रयोगका अयोग संघटित होता है। यह आयुष्मान्‌की परम चतुरता है। उसीप्रकार, कहा है, पर्य्यायोंके यौगपद्यद्वारा प्रयोग अभिमत नहीं होता। जिसकारण, पर्य्यायद्वारा ही ये सब अर्थ प्रतिपादन करते हैं, संहत होकर नहीं करते ॥ ३७ ॥

तस्मादयं पक्षो न क्षोदक्षम इति चेत् तदेतद्गगनरोमन्थकल्पं नीललोहितपीताद्युपरञ्जकद्रव्यभेदेन स्फटिकमणेरिव सम्बन्धिभेदात् । सत्तायास्तदात्मना भेदेन प्रतिपत्तिसिद्धौ गोसत्तादिरूपगोत्वादिभेदनिबन्धनव्यवहारवैलक्षण्योपपत्तेः ।

तथा चाप्तवाक्यम्—

स्फटिकं विमलं द्रव्यं यथायुक्तं पृथक् पृथक् ।
नीललोहितपीताद्यैस्तद्वर्णमुपलभ्यत इति ॥ ३८ ॥

इसकारण उल्लिखित पक्ष सो इसमें नहीं, यह बात कहेंगे, वह गगन रोमन्थके तुल्य होगा। क्योंकि, नील, लोहित, पीतादि उपरञ्जक द्रव्यभेदसे स्फटिकमणिकी नाईं सम्बन्धि भेद संघटित होता है। इसकारण, सत्ताके तादात्म्यभेदद्वारा प्रतिपत्ति सिद्धि होनेपर, गोसत्तादिभेद निबन्धन व्यवहार वैलक्षण्य उत्पन्न होता है उसीप्रकार, आप्त वाक्य यह है, एकमात्र विमल स्फटिक द्रव्य नील, लोहित और पीतादि द्वारा भिन्न २ उनका रंग दीखता है॥ ३८॥

तथा हरिणाप्युक्तम्—

सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥ ३९ ॥

तां प्रातिपदिकार्थञ्च धात्वर्थञ्च प्रचक्षते ।
सा सत्ता सा महानात्मा तामाहुस्त्वतलादय इति ॥ ४० ॥

उसीको प्रातिपदिकार्थ और धात्वर्थ कहते हैं। वही सत्ता, वही महानात्मा, एवं उसीको त्वतलादि प्रत्यय कहते हैं ॥ ४० ॥

आश्रयभूतैः सम्बन्धिभिर्भिद्यमाना कल्पितभेदा गवाश्वादिषु सत्तैव महासामान्यमेव जातिः । गोत्वादिकमपरं सामान्यं परमार्थतस्ततो भिन्नं न भवति । गोसत्तैव गोत्वं नापरमन्वायि प्रतिभासते । एवमश्वसत्ता अश्वत्वमित्यादि वाच्यम् ॥ ४१ ॥

जो आश्रयभूत सम्बन्धिसमूहद्वारा भिन्नरूपसे प्रादुर्भूत और तन्निबन्धन जिसमें भेद कल्पित होताहै, वह सत्ताही महासामान्य है । एवं वही जातिशब्दसे उल्लिखित होता है । गोत्वादि अपर सामान्य परमार्थतः उससे भिन्न होता है। गोसत्ताही गोत्व, वह अपरान्वयी करके प्रतीत नहीं होता। इसप्रकार अश्वसत्ता अश्वत्व कहना चाहिये ॥ ४१ ॥

एवञ्च तस्यामेव गवादिभिन्नायां सत्तायां जातौ सर्वे गोशब्दादयो वाचकत्वेन व्यवस्थिताः प्रातिपदिकार्थश्च सत्तेति प्रसिद्धम् । भाववचनो धातुरिति पक्षे भावः सत्तैवेति धात्वर्थः सत्ता भवत्येव क्रियावचनो धातुरिति पक्षेऽपि जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्त्तिनीमिति जातिपदार्थनयानुसारेणानेकव्यक्तिक्रियासमुदेशे क्रियाया जातिरूपत्वप्रतिपादनात् धात्वर्थः सत्ता भवत्येव तस्य भावस्त्वतलाविति भावार्थे त्वतलादीनां विधानात् सामानाधिकरण्यं युक्तं सा च सत्ता उदयव्ययवैधुर्य्यान्नित्या सर्वस्य प्रपञ्चस्य तद्विवर्त्ततया देशतः कालतो वस्तुतश्च परिच्छेदराहित्यात् सा सत्ता महानात्मेति व्यपदिश्यत इति कारिकाद्वयार्थः ४२

[illegible] गोशब्दादिवाचकत्व द्वारा व्यवस्थित

वशात: नित्यस्वरूप है । क्योंकि, समुदायप्रपञ्चही उसका विवर्त्तस्वरूप । एवं देश, काल, वस्तु, किसीप्रकारभी उसको परिच्छेद नहीं । इसीकारण सत्ता महान् आत्मा कहकर व्यपदिष्ट होता है दोनों कारिकोंमें इसीप्रकार अर्थ किया है ॥ ४२ ॥

द्रव्यपदार्थसंविल्लक्षणं तत्त्वमेव सर्वशब्दार्थ इति सम्बन्धसमुद्देशे समर्थितम्—

सत्यं वस्तु तदाकारैरसत्यैरवधार्य्यते ।
असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते ॥ ४३ ॥

द्रव्यपदार्थका संवित्स्वरूप तत्त्वही सर्व्वपदार्थ, यह सम्बन्धसमुद्देशमें समर्थित हुआ है । जैसे, सत्यवस्तु तदाकार असत्यद्वारा अवधारित होता है । उसीप्रकार असत्योपाधि विशिष्ट शब्दोंद्वारा सत्यही अभिहित होता है ॥ ४३ ॥

अध्रुवेण निमित्तेण देवदत्तगृहं यथा ।
गृहीतं गृहशब्देन शुद्धमेवाभिधीयते इति ॥ ४४ ॥

अध्रुवनिमित्तद्वारा देवदत्तगृहकी नाईं, गृहीतपदार्थ गृहशब्दद्वारा शुद्धरूपही प्रतिपादित होता है ॥ ४४ ॥

भाष्यकारेणापि सिद्धे शब्दार्थसम्बन्ध इत्येतद्वार्त्तिकव्याख्यानावसरे द्रव्यं हि नित्यमित्यनेन ग्रन्थेन अश्वत्थोपाध्यवच्छिन्नं ब्रह्मत्त्वं द्रव्यशब्दवाच्यं द्रव्यशब्दार्थ इति निरूपितम् ॥ ४५ ॥

भाष्यकारने भी कहा है शब्दार्थ सम्बन्ध सिद्ध इत्यादि विधानमें वार्त्तिक व्याख्यान प्रसंगसे द्रव्य नित्यस्वरूप इसप्रकार उक्ति स्थापनपूर्व्वक अश्वत्थोपाधिद्वारा अवच्छिन्न द्रव्यशब्दवाच्य ब्रह्मतत्वही समुदाय शब्दार्थ, इसप्रकार निरूपण किया है ॥ ४५ ॥

जातिशब्दार्थवाचिनो वाजप्यायनस्य मते गवादयः शब्दाः भिन्नद्रव्यसमवेतजातिमभिदधति । तस्यामवगाह्यमानायां तत्सम्बन्धात् द्रव्यमवगम्यते शुक्लादयःशब्दा गुणसमवेतां जातिमाचक्षते गुणे तत्सम्बन्धात् । प्रत्ययः द्रव्यसम्बन्धिसम्बन्धात् संज्ञाशब्दानामुत्पत्तिप्रभृत्याविनाशात् शैशवकौमारयौवनावस्थादिभेदेऽपि स एवायमित्यभिप्रत्ययबलात सिद्धा देवदत्त्वादि-

जातिरभ्युपगन्तव्या क्रियास्वपि जातिरालक्ष्यते सैव पठतीत्यादावनुवृत्तप्रत्ययस्य प्रादुर्भावात् ॥ ४६ ॥

जातिशब्दार्थवाची वाजप्यायनके मतसे गवादिशब्द सब भिन्न द्रव्यसमवेत जाति अभिहित करता है। जाति अवगाह्यमान होनेपर, तदीयसम्बन्धवशात् द्रव्यज्ञानसम्पन्न होता है। जैसे, शुक्लादिशब्द सब, गुणसमवेत जाति अभिहित करता है। गुणसे उसका सम्बन्ध वशात् प्रत्यय होता है। एवं द्रव्य सम्बन्धि सम्बन्धप्रयुक्त संज्ञा सुसम्पन्न होती है। शब्दोंकी उत्पत्ति प्रभृतिका विनाश नहीं। सुतरां, शैशव, कौमार, यौवनादि, अवस्था भेदसे वह, ' यह ' इसप्रकार अभिप्रत्ययबलसे देवदत्तत्वादि जातिसिद्ध होती है, मानना होगा। क्रिया सबमें भी, जाति अलक्षित होती है। वही धातुवाच्य। क्योंकि, पाठ करता हूं, इत्यादिस्थानमें अनुवृत्त प्रत्ययका प्रादुर्भाव होता है ॥ ४६ ॥

द्रव्यपदार्थवादिव्याडिनये शब्दस्य व्यक्तिरेवाभिधेयतया प्रतिभासते। जातिस्तूपलक्षणतयेति नानन्त्यादिदोषावकाशः ॥४७॥

द्रव्यपदार्थवाची व्याडिके मतसे शब्दकी व्यक्ति अभिध्येयताद्वारा एवं जाति उपलक्षणताद्वारा प्रतीत होती है। इसमें आनन्त्यादि दोष प्रसङ्ग नहीं ॥ ४७ ॥

पाणिन्याचार्य्यस्योभं सम्मतं यतो जातिपदार्थमभ्युपगम्य जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्यामित्यादिव्यवहारः द्रव्यपदार्थमङ्गीकृत्य सरूपाणामेकशेष एकविभक्तावित्यादिः व्याकरणस्य सर्वपार्षदत्वान्मतद्वयाभ्युपगमे न कश्चिद्विरोधः ४८॥

पाणिनि आचार्य्य दोनोंही मानते हैं। जिसकारण, जाति पदार्थ मानकर जातिके कहनेमें ' एकस्मिन् बहुवचनं इत्यादि, प्रयोग किया है पुनः, द्रव्य पदार्थ मानकर, 'सरूपाणां एक शेष ' इत्यादि प्रयोग किया है। इसप्रकार, व्याकरणका सर्वपार्षदत्व प्रयुक्त दोनो मत अंगीकार करनेसे, किसीप्रकार विरोध नहीं होता ॥ ४८ ॥

तस्मात् द्रव्यं सत्यं परं ब्रह्मतत्त्वं सर्वशब्दार्थ इति स्थितम्।

तदुक्तम्—

> तस्माच्छक्तिविभागेन सत्यः सर्वः सदात्मकः।
> एकोऽर्थः शब्दवाच्यत्वे बहुरूपः प्रकाशत इति ॥ ४९ ॥

इसकारण दोनो मतोंमे, सत्यस्वरूप परब्रह्मतत्त्व सर्व्व शब्दार्थ है, यह सिद्धान्तित हुआ। इसीप्रकार कहा है, इसकारण शक्तिविभाग सहायतामें सत्यस्वरूप, सर्व्वस्वरूप, सदात्मक, एक अर्थ शब्दवाच्यत्वमें बहुत प्रकारसे प्रकाशित होता है ॥ ४९ ॥

सत्यस्वरूपमपि हरिणोक्तं सम्बन्धसमुद्देशे—
यत्र द्रष्टा च दृश्यञ्च दर्शनञ्चाविकल्पितम् ।
तस्यैवार्थस्य सत्यत्वमाहुस्त्रय्यन्तवेदिन इति ॥ ५० ॥

हरिनेंभी सम्बन्धसमुद्देशमें सत्यस्वरूपे निर्देश किया है । जैसे जिस स्थानमें द्रष्टा, दर्शन और दृश्य सर्व्वथा विकल्पशून्य, त्रय्यन्तवेदी पण्डितगण उस अर्थका सत्यत्व उल्लेख करते हैं ॥ ५० ॥

द्रव्यसमुद्देशेऽपि—
विकारोपगमे सत्यं सुवर्णं कुण्डले यथा ।
विकारापगमो यत्र तामाहुः प्रकृतिं परामिति ॥ ५१ ॥

द्रव्यसमुद्देशमें भी कहा है विकारके उपशममें सत्यकुण्डलमें सोनेकी नाईं प्रतिभात होता है । और जिसमें विकारका अपगम लक्षित होता है, उसको पराप्रकृति कहते हैं ॥ ५१ ॥

अभ्युपगताद्वितीयत्वनिर्वाहाय वाच्यवाचकयोरविभागः प्रदर्शितः।
वाच्या सा सर्वशब्दानां शब्दाच्च न पृथक् ततः ।
अपृथक्त्वेऽपि सम्बन्धस्तयोर्नानात्मनोरिवेति ॥ ५२ ॥

ऊपर जो अद्वितीय माना गया है, उसके प्रतिपादनार्थ वाच्य वाचक दोनोंका अविभाग दर्शन किया है । जैसे, वह समुदाय शब्दका वाच्य एवं उससे शब्द पृथक् नहीं ॥ ५२ ॥

तत्तदुपाधिपरिकल्पितभेदबहुलतया व्यवहारस्याविद्यामात्रकल्पितत्वेन प्रतिनियताकारोपधीयमानरूपभेदं ब्रह्मतत्त्वं सर्वशब्दविषयः अभेदे च पारमार्थिके संवृत्तिवशाद्व्यवहारदशायां स्वप्नावस्थावदुच्चावचः प्रपञ्चो विवर्त्तत इति कारिकार्थः ।

तदाहुर्वेदान्तवादनिपुणाः—
यथा स्वप्नप्रपञ्चोऽयं मयि माया विजृम्भितः ।
एवं जाग्रत्प्रपञ्चोऽपि मयि माया विजृम्भित इति ॥ ५३ ॥

उन उन उपाधिद्वारा, बहुत भेद परिकल्पित होता है । व्यवहारका, [illegible] अविद्यामात्र कल्पित है । इसकारण, प्रतिनियत आकारमें जिसका रूपभेद प्रतिभात होता है वही ब्रह्मतत्त्व सर्व शब्द विषय एवं अभेद परमार्थिक है तथा संवृत्तिवशात् व्यवहारदशामें स्वप्नावस्थाकी नाईं उच्चावच प्रपञ्च विवर्त्तित होता है । यही कारिकाका अर्थ, वेदान्त[illegible]

निपुणने कहा है यह स्वप्नप्रपञ्च जिसप्रकार मायावशात् मुझमें विजृम्भित होता है, जगत्प्रपञ्चभी उसीप्रकार मुझमें मायाविजृम्भित होता है ॥ ५३ ॥

तदित्थं कूटस्थे परस्मिन् ब्रह्मणि सच्चिदानन्दरूपे प्रत्यगभिन्नेऽवगते अनाद्यविद्यानिवृत्तौ तादृग्ब्रह्मात्मनावस्थानलक्षणं निःश्रेयसं सेत्स्यति.शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीत्यभियुक्तोक्तेः । तथा च शब्दानुशासनशास्त्रस्य निःश्रेयससाधनत्वं सिद्धम् ।

तदुक्तम्—

तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रचक्षत इति ॥ ५४ ॥

इसप्रकार सच्चिदानन्दविग्रह, प्रत्यगभिन्न कूटस्थ परब्रह्म अवगत होनेसे, अनादि अविद्याकी निवृत्ति होती है। तो ब्रह्म और आत्मा दोनोंकी एकतारूप निःश्रेयस समाहित होता है । क्योंकि पण्डितोंने कहा है । शब्दब्रह्ममें निष्णात होनेसे, परब्रह्मकी प्राप्ति होती है । और शब्दानुशासनकी निःश्रेयस साधनता सिद्ध हुई । सो कहा है, जैसे वही मोक्षका द्वार है । वही वाणीमलोंका चिकित्सित, वही, सब विद्याओंमें पवित्र एवं उसीको श्रेष्ठविद्या कहते हैं ॥ ५४ ॥

तथा—

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमार्गाणामजिह्मा राजपद्धतिरिति ॥ ५५ ॥

पुनः कहा है, यही सिद्धि सोपानपर्वकी पहिली सीढी एवं यही मुक्तिमार्ग अतीव सरल राजमार्ग है ॥ ५५ ॥

तस्माद् व्याकरणशास्त्रं परमपुरुषार्थसाधनतयाध्येतव्यमिति सिद्धम् ॥ ५६ ॥

इति सर्वदर्शनसंग्रहे पाणिनिदर्शनं समाप्तम् ॥ १३ ॥

इसकारण, परमपुरुषार्थकी साधनतानिमित्त व्याकरणशास्त्र अध्ययनसाधनता अध्ययन करना कर्तव्य है ॥ ५६ ॥

इति सर्वदर्शनसंग्रहे पाणिनिदर्शन समाप्त हुआ ॥ १३ ॥

अथ सांख्यदर्शनम् ॥ १४ ॥

अथ सांख्यैराख्याते परिणामवादे परिपन्थिनि जागरूके कथङ्कारं विवर्त्तवाद आदरणीयो भवेदेष हि तेषामाघोषः । संक्षेपेण हि सांख्यशास्त्रस्य चतस्रो विधाः सम्भाव्यन्ते । कश्चिदर्थः प्रकृतिरेव, कश्चिद्विकृतिरेव, कश्चिद्विकृतिः प्रकृतिश्च; कश्चिदनुभय इति । तत्र केवला प्रकृतिः प्रधानपदेन वेदनीया मूलप्रकृतिः नासावन्यस्य कस्यचिद्विकृतिः ॥ १ ॥

सांख्यगणके आख्यात परिणामवाद परिपन्थिस्वरूप जागरूक रहनेसे, विवर्त्तवाद किसप्रकार आदरणीय होसकता है, यही उन लोगोंका आघोष है । सांख्यशास्त्रमें संक्षेपसे चार विधान सम्भावित होते हैं, प्रथम प्रकृति, द्वितीय विकृति, तृतीय विकृतिप्रकृति एवं चतुर्थ अनुभय उनमें केवला प्रकृति प्रधानशब्द वाच्य मूल प्रकृति, वह अन्य किसीकी विकृति नहीं ॥ १ ॥

प्रकरोतीति प्रकृतिरिति व्युत्पत्त्या सत्त्वरजस्तमोगुणानां साम्यावस्थाया अभिधानात् । तदुक्तं, मूलप्रकृतिरविकृतिरिति । मूलश्चासौ प्रकृतिश्च मूलप्रकृतिः । महदादेः कार्य्यकलापस्यासौ मूलं न त्वस्य प्रधानस्य मूलान्तरमस्ति अनवस्थापातात् । न च बीजांकुरवदनवस्थादोषो न भवतीति वाच्यं प्रमाणाभावादिति भावः ॥ २ ॥

प्रकृष्टरूपसे जो करता है, इसकारण इसका नाम 'प्रकृति' है । इसप्रकार व्युत्पत्ति द्वारा सत्व, रज और तमोगुणकी साम्य अवस्था अभिहित हुई है । इसीप्रकार, कहा है कि मूल प्रकृति अविकृति । इसका अर्थ यह है, यह मूल अर्थात महत आदि कार्य्य कलापकी आदि है, इसका मूलान्तर नहीं । मूलान्तर है, कहनेसे, अनवस्था दोष पड़ता है । बीजांकुरकी नाईं, अनवस्था दोष सम्भव नहीं, यह बात नहीं कहसकते । क्योंकि, इसका कोई प्रमाण नहीं ॥ २ ॥

विकृतयश्च प्रकृतयश्च महदहङ्कारतन्मात्राणि । तदप्युक्तं, महदाद्याः प्रकृतिविकृतयः सप्तेति । अस्यार्थः प्रकृतयश्च ताः विकृतयश्चेति प्रकृतिविकृतयः सप्त महदादीनि तत्त्वानि ॥ ३ ॥

विकृति प्रकृति शब्दसे अहङ्कार और तन्मात्र पञ्चक । उसीप्रकार, कहाहै, महत् आदि प्रकृति विकृतिकी संख्या सात ७ है । इसका अर्थ यह है जो महत् आदि सात तत्त्वका नाम प्रकृति विकृति है ॥ ३ ॥

तत्रान्तःकरणादिपदवेदनीयं महत्तत्वमहङ्कारस्य प्रकृतिः मूलप्रकृतेस्तु विकृतिः ॥ ४ ॥

इनमें अन्तःकरणादि शब्दवाच्य महत्तत्व अहङ्कार प्रकृति । एवं मूल प्रकृतिकी विकृति है ॥ ४ ॥

एवमहङ्कारतत्त्वमभिमानापरनामधेयं महती विकृतिः प्रकृतिश्च । तदेवाहंकारतत्त्वं तामसं सत् पञ्चतन्मात्राणां सूक्ष्माभिधानां तदेव सात्त्विकं सत् प्रकृतिरेकादशेन्द्रियाणां बुद्धीन्द्रियाणां चक्षुःश्रोत्रघ्राणरसनात्वगाख्यानां कर्मेन्द्रियाणां वाक्पाणिपादपायूपस्थाख्यानामुभयात्मकस्य मनसश्च रजसस्तूभयत्र क्रियोत्पादनद्वारेण कारणत्वमस्तीति न वैयर्थ्यम् ॥ ५ ॥

इसप्रकार, जिसका नाम अभिमान वही अहंकारतत्त्व महत्की विकृति । यह अहंकार तत्त्व तामस अवस्थामें सूक्ष्माभिधेय पञ्च तन्मात्रकी प्रकृति होती है एवं सात्विक अवस्थामें ग्यारह इन्द्रियकी प्रवर्त्तना करता है । ये ग्यारह इन्द्रिय दोभागमें विभक्त हैं, बुद्धि इन्द्रिय और कर्मेन्द्रिय । इनमें चक्षु, घ्राण, रसना, त्वक्, इन पांचका नाम बुद्धि इन्द्रिय एवं वाक्, पाणि पाद, पायु, और उपस्थ इनका नाम कर्मइन्द्रिय है । और मन उभयात्मक है । रजोगुण उभयत्र क्रियाका उत्पादन करता है । इसकारण उसका कारणत्व लक्षित होता है । इस विषयमे वैयर्थ्य नहीं है ॥ ५ ॥

तदुक्तमीश्वरकृष्णेन—

अभिमानोऽहंकारस्तस्माद् द्विविधः प्रवर्त्तते सर्गः ।
एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव ॥ ६ ॥

उसीप्रकार, ईश्वर कृष्णने कहा है. अहंकार अर्थात् अभिमान । उससे दो प्रकारका सर्ग प्रवर्त्तित होता है । प्रथम ग्यारहगण एवं द्वितीय तन्मात्र पञ्चक है ॥ ६ ॥

सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहंकारात् ।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ।

बुद्धीन्द्रियाणि चक्षुः श्रोत्रघ्राणरसनत्वगाख्यानि ।
वाक्पादपाणिपायूपस्थानि कर्मेन्द्रियाण्याहुः ॥ ७ ॥

चक्षु श्रोत्र, घ्राण, रसना, त्वक् इनका नाम बुद्धीन्द्रिय, वाक्, पाद, पाणि, पायु और उपस्थ इनको कर्म्मेन्द्रिय कहते हैं ॥ ७ ॥

उभयात्मकमत्र मनः संकल्पविकल्पकञ्च साधर्म्यादिति ॥ ८ ॥

मन उभयात्मक । अर्थात् साधर्म्म्यवशात् संकल्पविकल्पात्मक इन्द्रिय है ॥ ८ ॥

विवृतश्च तत्त्वकौमुद्यामाचार्यवाचस्पतिभिः केवला विकृतिस्तु वियदादीनि पञ्चभूतानि एकादशेन्द्रियाणि च तदुक्तं, पोडशकस्तु विकार इति पोडशसंख्यावच्छिन्नो गणः पोडशको विकार एव न प्रकृतिरित्यर्थः यद्यपि पृथिव्यादयो गोघटादीनां प्रकृतिस्तथापि न ते पृथिव्यादिभ्यस्तत्त्वान्तरमिति न प्रकृतिः तत्त्वान्तरोपादानत्वं चेह प्रकृतित्वमभिमतं गोघटादीनां स्थूलत्वेन्द्रियग्राह्यत्वयोः समानत्वेन तत्त्वान्तरत्वाभावः । तत्र शब्दस्पर्शरूपरसगन्धतन्मात्रेभ्यः पूर्वपूर्वसूक्ष्मभूतसहितेभ्यः पञ्चभूतानि वियदादीनि क्रमेणैकद्वित्रिचतुःपञ्चगुणानि जायन्ते । इन्द्रियसृष्टिस्तु प्रागेवोक्ता ॥ ९ ॥

तत्त्वकौमुदीमें आचार्य्य वाचस्पतिने विवृत किया है कि जैसे, आकाश, प्रभृति पांचभूत और ग्यारह इन्द्रिय इनको केवल प्रकृति कहते हैं । इसीप्रकार, कहा है विकार सोलह हैं अर्थात् पोडश संख्या अवच्छिन्नगण १६ विकार, प्रकृति नहीं । यद्यपि पृथिव्यादि गो घट आदिकी प्रकृति है तथापि, उनका पृथिवी आदिसे तत्त्वान्तर नहीं इसकारण, प्रकृति नहीं । गोघट आदिका स्थूलत्व और इन्द्रियग्राह्यत्व दोनोंही समान हैं इससे, तत्त्वान्तरत्व सम्भव नहीं । उनमें, पूर्व्व पूर्व्व सूक्ष्मभूत सहित शब्द, स्पर्श, रूप, रस और गन्ध तन्मात्रसे यथाक्रम एक दो तीन चार और पांच गुणविशिष्ट आकाशादि पांचभूत होते हैं । इन्द्रियसृष्टि पहिलेही कही गयी है ॥ ९ ॥

तदुक्तम्—

प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च पोडशकः ।
तस्मादपि पोडशकात् पञ्चभ्यः पञ्चभूतानि ॥ १० ॥

उसीप्रकार कहा है कि प्रकृतिसे महान् महान्से अहङ्कार अहङ्कारसे षोडशगण समुत्पन्न हुआ है ॥ १० ॥

अनुभयात्मकः पुरुषः । तदुक्तं, न प्रकृतिर्न विकृतिः पुरुष इति। पुरुषस्तु कूटस्थनित्योऽपरिणामो न कस्यचित् प्रकृतिर्नापि विकृतिः कस्यचिदित्यर्थः ॥ ११ ॥

पुरुष अनुभयात्मक अर्थात् वह प्रकृतिभी नहीं विकृतिभी नहीं । वह कूटस्थ, नित्य और परिणामरहित वह किसीकी प्रकृति या विकृति नहीं है ॥ ११ ॥

एतत्पञ्चविंशतितत्त्वसाधकत्वेन प्रमाणत्रयमभिमतम् ।

तदप्युक्तम्-

दृष्टमनुमानमाप्तवचनञ्च सर्वप्रमाणसिद्धत्वात् ।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धीति ॥ १२ ॥

उल्लिखित पच्चीस तत्वके साधकत्वद्वारा प्रमाणत्रय अभिमत हुआ है । जैसे दृष्ट अनुमान और आप्तवाक्य । सर्व प्रमाण सिद्धिवशतः यही तीनप्रकारका प्रमाण अभिमत है । प्रमाणसेही प्रमेयकी सिद्धि होती है ॥ १२ ॥

इह कार्य्यकारणभावे चतुर्द्धा विप्रतिपत्तिः प्रसरति । असतः सज्जायत इति सौगताः संगिरन्ते । नैयायिकादयः सतोऽसज्जायत इति ॥ १३ ॥

प्रस्तावित कार्य्यकारणभावमें चारप्रकारसे विप्रतिपत्ति प्रकृत होती है । प्रथमतः सौगत लोगोंने कहा है कि, असतसे सत्का जन्म होता है नैयायिकोंके मतमें सत्से असत्का आविर्भाव हुआ है ॥ १३ ॥

वेदान्तिनः सतो विवर्त्तः कार्य्यजातं न वस्तु सदिति । सांख्याः पुनः सतः सज्जायत इति । तत्रासतः सज्जायत इति प्रामाणिकः पक्षः । असतो निरुपाख्यस्य शशविषाणवत्कारणत्वानुपपत्तेः तुच्छातुच्छयोस्तादात्म्यानुपपत्तेश्चानापि सतोऽसज्जायते कारकव्यापारात्प्रागसतः शशविषाणवत्सत्तासम्बन्धलक्षणोत्पत्त्यनुपपत्तेः । न हि नीलं निपुणतमेनापि पीतं कर्तुं पार्य्यते । ननु सत्त्वासत्त्वे घटस्य धर्माविति चेत्तदचारु असति धर्मिणि तद्धर्म

इति व्यपदेशानुपपत्त्या धर्मिणः सत्त्वापत्तेः । तस्मात्कारकव्यापारात् प्रागपि कार्य्यं सदेव सतश्चाभिव्यक्तिरुपपद्यते । यथा पीडनेन तिलेषु तैलस्य दोहेन सौरभेयीषु पयसः । असतः कारणे किमपि निदर्शनं न दृश्यते ॥ १४ ॥

वेदान्तीलोग कहते हैं, सत्से विवर्तका उत्तर होता है । सांख्यलोग निर्देश करते हैं सत्से सत्का जन्म होताहै इनमें असत्से सत्की उत्पत्ति होती है यह प्रामाणिक पक्ष नहीं। क्योंकि असत् निरूपाख्य सुतरां, खरहे (शशक) के शृङ्गके तुल्य उसका कारणत्व सम्भव नहीं एवं तुच्छ अतुच्छ दोनोंके तादात्म्यकी अनुपपत्ति होती है सत्सेभी असत्की उत्पत्ति होनहीं सकती । जिसकारण, कारकव्यापारके पहिले शशविषाणकी नाईं असत्की सत्ता सम्बन्धरूप उत्पत्ति सम्भव नहीं । निपुणतम व्यक्तिभी नीलको पीत नहीं करसकती । यदि कहो सत्त्व और असत्त्व दोनोंही घटका धर्म्म है यह बातभी युक्तिसंगत नहीं हो सकती । क्योंकि धर्म्मीकी सत्त्वापत्ति होती है । असत् धर्म्मिमें तद्धर्म, ऐसे व्यपदेशसे उपपन्न नहीं होता इसकारण कारकव्यापारके पूर्वभी कार्य्य अवश्यही रहता है उसीकी अभिव्यक्ति उपपन्न होती है । जैसे निष्पीडनसे तिलमें तैलका एवं दोहनद्वारा गौमें दुग्धकी अभिव्यक्ति होती है । असत्कारणमें किसीप्रकार निदर्शनही नहीं देखाजाता ॥ १४ ॥

किञ्च कार्य्येण कारणं सम्बद्धं तज्जनकम् असम्बद्धं वा । प्रथमे कार्य्यस्य सत्त्वमायातं सतोरेव सम्बन्ध इति नियमात् । चरमे सर्वं कार्य्यजातं सर्वस्माज्जायेत असम्बद्धत्वाविशेषात् ॥ १५ ॥

पुनः कारणकार्य्यद्वारा सम्बन्ध होकर उसका जनक होता है । किम्वा असम्बद्ध होकर इसप्रकार उत्पादक होताहै ? पहिला पक्ष माननेसे, कार्य्यका सत्त्व आपतित होताहै । क्योंकि, सत्हीका सम्बन्ध इसप्रकार नियम है । दूसरा पक्ष माननेसे, असम्बद्धत्व किसीप्रकार विशेष नहीं रहता । इसकारण सबसे सबप्रकार कार्यजात समुद्भूत होता है ॥ १५ ॥

तदाख्यायि सांख्याचार्य्यैः—

असत्त्वान्नास्ति सम्बन्धः कारणैः सत्त्वसंगिभिः ।
असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिरिति ॥ १६ ॥

सांख्याचार्य्योंने कहा है । जैसे कारण सब सत्त्वसंगी हैं सुतरां असत्त्वसे सम्बन्ध नहीं । जो व्यक्ति असम्बद्धकी उत्पत्ति इच्छाकरता है उसकी व्यवस्थिति नहीं ॥ १६ ॥

अथैवमनुष्टेयासम्बद्धमपि तत् तदेव जनयति यत्र यच्छक्तं शक्तिश्च कार्य्यदर्शनान्नेयेति तन्न संगच्छते तिलेषु तैलजननश-

क्तिरित्यत्र तैलस्यासत्त्वे सम्बद्धत्वासम्बद्धत्वविकल्पेन तच्छाक्ति-
रितिनिरूपणायोगात् । कार्य्यकारणयोरभेदाच्च कार्य्यस्य सत्त्वं
कारणात् पृथक् न भवति पटस्तन्तुभ्यो न भिद्यते तद्धर्मत्वान्न
यदेवं न तदेवं यथा गोरश्वः तद्धर्मश्च पटस्तस्मान्नार्थान्तरम् ॥ १७ ॥

तिलमें शक्ति, इसप्रकार अनुष्ठेया सम्बन्धभी उस २ पदार्थका समुत्पादन करता है । कार्य्य देखकरही, शक्तिका उन्नयन करसकताहै । इत्यादि मतवाद संगत नहीं होसकता । तिलमें तैल जननशक्ति है । इसस्थानमें तैलके असत्वमें सम्बद्धासम्बद्धत्व विकल्प न करके वह शक्ति, इसप्रकार निरूपणके प्रयोग वशतः पृथक् नहीं होसकती । उसीप्रकार पटतन्तुसे भिन्न नहीं होसकता । तद्धर्म्मताही उसका कारण है । जो ऐसा नहीं, सो इसप्रकार नहीं, जैसे गौ और घोडा सुतरां पट अर्थान्तर नहीं ॥ १७ ॥

तर्हि प्रत्येकं त एव प्रावरणकार्य्यं कुर्य्युरिति चेत् संस्थानभेदे-
नाविर्भूतपटभावानां प्रावरणार्थक्रियाकारित्वोपपत्तेः । यथा हि
कूर्मस्यांगानि कूर्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति
चाविर्भवन्ति एवं कारणस्य तन्त्वादेः पटादयो विशेषा निःसर-
न्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते निविशमानास्तिरोभव-
न्तो विनश्यन्तीत्युच्यन्ते न पुनरसतामुत्पत्तिः सतां वा विनाशः ।

यथोक्तं भगवद्गीतायाम्-

नासतो विद्यते भावो नाभावो विद्यते सत इति ॥

ततश्च कार्य्यानुमानात् तत्प्रधानसिद्धिः ॥ १८ ॥

यदि कहो कि, प्रत्येक ही प्रावरण कार्य्य नहीं करसकता । इसका उत्तर यह है जो, संस्थानभेदसे जिनका पटभाव आविर्भूत हुआ है, उनकी प्रावरणार्थ क्रियाकारिता सिद्ध होती है । इसीप्रकार, कूर्म्मके अङ्ग सब कूर्म्म शरीरनिविष्ट होकर तिरोभूत एवं निःसृत हो आविर्भूत होते हैं । इसप्रकार, कारणरूपी तन्तु प्रभृतिका अङ्गस्वरूप पटादि निःसृत होकर, आविर्भूत और उत्पन्न होता है, इसप्रकार कहा जाता है । और निविष्ट होकर तिरोभूत, अर्थात् विनष्ट होता है, इत्यादि कहा जाता है । वस्तुतः, असत्की उत्पत्ति नहीं एवं सत्का भी विनाश नहीं होता । भगवद्गीतामें कहा है कि, असत्का भाव अर्थात् उत्पत्ति नहीं, एवं सत्का अभाव अर्थात् ध्वंस नहीं होता । इसीकारण, कार्य्यानुमानप्रयुक्त उस प्रधानकी सिद्धि होती है । १८ ॥

तदुक्तम्—

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्य्यमिति ॥

नापि सतो ब्रह्मतत्त्वस्य विवर्त्तः प्रपञ्चः बाधानुपलम्भात् अधिष्ठानारोप्ययोश्चिज्जडयोः कलधौतरूप्यादिवत् सारूप्याभावेनारोपसम्भवाच्च । तस्मात् सुखदुःखमोहात्मकस्य तथाविधकारणमवधारणीयं तथा च प्रयोगः विमतं भावजातं सुखदुःखमोहात्मककारणकं तदन्वितत्वात् यद्रूपेणान्वीयते तत्तत्कारणकं यथा रुचकादिकं सुवर्णान्वितं सुवर्णकारणकं तथाचेदं तस्मात्तथेति ॥ १९ ॥

बाधाके अनुपलम्भवशात्; अधिष्ठानारोप्यचित और जड दोनोंके स्वर्ण रौप्यादि तुल्य सारूप्याभावसे आरोप सम्भवित होजानेसे, सत् स्वरूप ब्रह्मतत्त्व विवर्त्त प्रपञ्च नहीं । इस कारण, सुखदुःखमोहात्मककाही उसप्रकार कारण अवधारण करना होगा । और प्रयोग जैसे, विमत भावजात सुखदुःखमोहात्मकका कारण होता है । तदन्वितताही इसका कारण है । जिस २ द्वारा अन्वित होता है, वह २ उसका कारण होता है । जैसे रुचकादि सुवर्णान्वित होनेसे स्वर्णका कारण नहीं हो सकता ॥ १९ ॥

तत्र जगत्कारणे येयं सुखात्मकता तत सत्त्वं, या दुःखात्मकता तद्रजः, या च मोहात्मकता तत्तम इति त्रिगुणात्मककारणसिद्धिः । तथाहि प्रत्येकं भावास्त्रैगुण्यवन्तोऽनुभूयन्ते यथा मैत्रदारेषु सत्यवत्यां मैत्रस्य सुखमाविरस्ति तं प्रति सत्त्वगुणप्रादुर्भावात्तत्सपत्नीनां दुःखम् । तां प्रति रजोगुणप्रादुर्भावात् तामलभमानस्य चैत्रस्य मोहो भवति तं प्रति तमोगुणसमुद्भवात् एवमन्यदपि घटादिकं लभ्यमानं सुखं करोति परैरपि ह्रियमाणं दुःखाकरोति उदासीनस्योपेक्षाविषयत्वेनोपतिष्ठते उपेक्षाविषयत्वं नाम मोहः मुह वैचित्त्ये इत्यस्माद्धातोर्मोहशब्दनिष्पत्तेः उपेक्षणीयेषु चित्तवृत्त्यनुदयात् ॥ २० ॥

उनमें जगत्का कारणमें जो यह सुखात्मकता वही सत्व है जो दुःखात्मकता वही रजः एवं जो मोहात्मकता, वही तमः है इसप्रकार त्रिगुणात्म कारण सिद्ध होता है । उसी प्रकार, भावमात्रही त्रैगुण्यविशिष्ट होकर, अनुभवगोचर होता है । इसको उदाहरण जैसे, मैत्र-पत्नी सत्यवतीमें मैत्रका सुख आविर्भूत होता है । सत्त्वगुणका प्रादुर्भाव इसका कारण है । एवं तदीय सपत्नियोंके प्रति रजोगुणका प्रादुर्भाववशात् दुःख उत्पन्न होजाता है । उसको न पाकर, चैत्रको मोह होता है, उसके प्रति तमोगुणका प्रादुर्भावही इसका कारण है इसी प्रकार अन्यत्रभी जानो, घट आदि लभ्यमान होनेसे, सुखसमुद्भावन करता है. पीछे हरण करलेनेपर, दुःख उत्पन्न करता है । उपेक्षा विषयत्ववशात् उदासीनको दुःख उपस्थित होता है । उपेक्षा विषयत्व शब्दसे मोह लेना । वैचित्यरूप अर्थ प्रतिपादक मुहधातुसे मोहशब्द निष्पन्न होता है जिस कारण, उपेक्षणीय विषयमें चित्तवृत्तिका अनुदय होता है ॥ २० ॥

तस्मात् सर्वं भावजातं सुखदुःखमोहात्मकं त्रिगुणप्रधानकारणकमवगम्यते । तथाच श्वेताश्वतरोपनिषदि श्रूयते—

अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजा जनयन्तीं सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोन्य इति ॥ २१ ॥

इस कारण, सम्पूर्ण भावजात सुखदुःखमोहात्मक है एवं त्रिगुणप्रधान कारण कहकर परिज्ञात होता है । और श्वेताश्वतर उपनिषद्में कहा है;-एक अज लोहित, शुक्ल और कृष्ण भेदसे बहुतप्रजा समुद्भावन करता है । वे सबभी सरूप है ॥ २१ ॥

अत्र लोहितशुक्लकृष्णशब्दा रञ्जकत्वप्रकाशकत्वावरकत्व साधर्म्यात् रजःसत्त्वतमोगुणत्वप्रतिपादनपराः ॥ २२ ॥

यहां लोहित, शुक्ल और कृष्णशब्द रञ्जकत्व, प्रकाशकत्व और आवरकत्व साधर्म्य वशात्, यथाक्रम रज, सत्व और तमोगुणत्व प्रतिपादित करतेहैं ॥ २२ ॥

नन्वचेतनं प्रधानं चेतनानधिष्ठितं महदादिकार्य्ये न व्याप्रियते । अतः केनचिच्चेतनेनाधिष्ठात्रा भवितव्यं तथा च सर्वार्थदर्शी परमेश्वरः स्वीकर्त्तव्यः स्यादिति चेत् तदसंगतम् अचेतस्यापि प्रधानस्य प्रयोजनवशेन प्रवृत्त्युपपत्तेः । दृष्टञ्च अचेतनं चेतनानधिष्ठितं पुरुषार्थाय प्रवर्तमानं यथा वत्सवृद्ध्यर्थमचेतनं क्षीरं प्रव-

र्त्तते यथा जलमचेतनं लोकोपकाराय प्रवर्त्तते तथा च प्रकृतिर-चेतनापि पुरुषविमोक्षाय प्रवर्त्स्यतीति ॥ २३ ॥

यदि कहो कि, प्रधान अचेतन है, सुतरां, चेतनके अधिष्ठान विना महत आदि कार्य्यमें व्यापृत नहीं हो सकते । सुतरां, कोई चेतन पदार्थ अवश्यही इसका अधिष्ठाता होगा । तो सर्व्वार्थदर्शी परमेश्वरको मानना पडता है । इसका उत्तर यह है जो, ऐसा मनवाद सङ्गत नहीं हो सकता । क्योंकि, प्रधान अचेतन होनेपर भी, प्रयोजनवशात् उसकी प्रवृत्तिकी उत्पत्ति होजाती है । एवं ऐसाभी देखागया कि, अचेतन चेतनके अधिष्ठान विनाही पुरुषार्थ सम्पादनमें प्रवर्त्तमान होता है । इसका दृष्टान्त क्षीर अचेतन होनेपरभी वत्सकी वृद्धिसम्पादनमें प्रवृत्ति होती है । अथवा जल अचेतन होनेपरभी लोकके उपकारार्थ प्रवर्त्तित होता है इसप्रकार, प्रकृति अचेतन होनेपरभी, पुरुषके मुक्तिसाधनमें प्रवृत्ति होगी ॥ २३ ॥

तदुक्तम्-

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्येति ॥ २४ ॥

उसीप्रकार कहाभी है, अज्ञक्षीर जैसे वत्सके विवृद्धिसाधनमें प्रवृत्त होता है पुरुषके मोक्ष निमित्तभी प्रधानकी तद्रूप प्रवृत्ति होती है ॥ २४ ॥

यस्तु परमेश्वरः करुणया प्रवर्त्तक इति परमेश्वरास्तित्ववादिनां डिण्डिमः स प्रायेण गतः विकल्पानुपपत्तेः । स किं सृष्टेः प्राक् प्रवर्त्तते सृष्ट्युत्तरकाले वा । आद्ये शरीराद्यभावेन दुःखानुत्पत्तौ जीवानां दुःखप्रहाणेच्छानुपपत्तिः । द्वितीये परस्पराश्रयप्रसंगः करुणया सृष्टिः सृष्ट्या च कारुण्यमिति ॥ २५ ॥

परमेश्वर करुणावशतः प्रवर्त्तक होता है इसप्रकार कहकर परमेश्वरका अस्तित्ववादिगण जो डंका बजाते हैं, वह प्रायः गया क्योंकि, उसमें विकल्पकी अनुपपत्ति है, वह परमेश्वर सृष्टिके पूर्व्व या सृष्टिके उत्तरकालमें प्रवर्त्तित होते हैं सृष्टिके पहिले होनेसे शरीरादिके अभावमें दुःखकी अनुत्पत्तिमें जीवनका दुःखप्रहाणकी इच्छा अनुपपत्ति होती है । और सृष्टिके पीछे होनेसे, करुणाद्वारा सृष्टि एवं सृष्टिद्वारा करुणा, इसप्रकार परस्पराश्रय प्रसंग संघटित होता है ॥ २५ ॥

तस्मादचेतनस्यापि चेतनानधिष्ठितस्य प्रधानस्य महदादिरूपेण परिणामः पुरुषार्थप्रयुक्तः प्रधानपुरुषसंयोगनिमित्तः ॥ २६ ॥

इसकारण, प्रधान अचेतन होनेपर भी, चेतनका अधिष्ठान विना महत् आदि रूपसे परिणत होता है। यह परिणाम पुरुषार्थवशात् एवं प्रधान पुरुषके संयोग निमित्तहै ॥ २६ ॥

यथा निर्व्यापारस्याप्ययस्कान्तस्य सन्निधानेन लोहस्य व्यापारः तथा निर्व्यापारस्य पुरुषस्य सन्निधानेन प्रधानव्यापारो युज्यते। प्रकृतिपुरुषसम्बन्धश्च पङ्ग्वन्धवत्परस्परापेक्षानिबन्धनः॥२७॥

जैसे व्यापारशून्य अयस्कान्तके सन्निधानसे लोहाका व्यापार सम्पन्न होता है। उसी प्रकार, व्यापारविहीन पुरुषका सन्निधानवशात् प्रधानका व्यापार विनिष्पन्न होता है। प्रकृति पुरुषका सम्बन्ध, पङ्गु और अन्धेकी नाई परस्पर एक दूसरेकी अपेक्षा करता है ॥ २७ ॥

प्रकृतिर्हि भोग्यतया भोक्तारं पुरुषमपेक्षते। पुरुषोऽपि भेदाग्रहाद्बुद्धिच्छायापत्त्या तद्गतं दुःखत्रयं वारयमाणः कैवल्यमपेक्षते। तत प्रकृतिपुरुषविवेकनिबन्धनं न च तदन्तरेण युक्तमिति कैवल्यार्थं पुरुषः प्रधानमपेक्षते। यथा खलु कौचित् पङ्ग्वन्धौ पथि सार्थेन गच्छन्तौ दैवकृतादुपप्लवात् परित्यक्तसार्थौ मन्दमन्दमितस्ततः परिभ्रमन्तौ भयाकुलौ दैववशात् संयोगमुपगच्छेतां तत्र चान्धेन पंगुः स्कन्धमारोपितः ततः पंगुदर्शितेन मार्गेणान्धः समीहितं स्थानं प्राप्नोति। पंगुरपि स्कन्धाधिरूढः तथा परस्परापेक्षप्रधानपुरुषनिबन्धनः सर्गः॥ २८ ॥

प्रकृति भोग्यता प्रयुक्त भोक्ता पुरुषकी अपेक्षा करता है। पुरुषभी तद्गत दुःखत्रय निवारण करते हुए, कैवल्यकी अपेक्षा करता है। वह प्रकृति पुरुष दोनोंका विवेक निबन्धन, इसके बिना मुक्त नहीं होता। इसप्रकार कैवल्यार्थ पुरुष और प्रधान दोनोंकी अपेक्षा करता है। जैसे कोई पंगु और अन्ध, मार्गमे एक साथ चलते चलते दैवात् उत्पातवशात् परस्पर स्वार्थ त्याग और भयाकुल, इधर उधर धीरे धीरे परिभ्रमण करते हुए अन्तमें दैवसंयोगसे अन्धेने लंगड़ेको अपने कान्धेपर रख लिया, और उस लंगड़ेके बतलाये हुए मार्गसे अपने इष्टस्थानको अन्धा पहुंचता है एवं लंगड़ा भी कन्धेपर चढ़कर अभीष्टस्थानको गमन करता है इसी प्रकार सृष्टि व्यापारभी परस्परापेक्ष प्रधान पुरुष निबन्धन है ॥ २८ ॥

यथोक्तम्—

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि सम्बन्धस्तत्कृतः सर्ग इति ॥ २९ ॥

उसी प्रकार, कहा है, पुरुषके दर्शनार्थ और प्रधानके कैवल्यार्थ पंगु और अन्धेकी नाईं, इन दोनोंका सम्बन्धसे सृष्टि व्यापार चलता है ॥ २९ ॥

ननु पुरुषार्थनिबन्धना भवतु प्रकृतेः प्रवृत्तिः निवृत्तिस्तु कथमुपपद्यत इति चेदुच्यते यथा भर्त्रा दृष्टदोषा स्वैरिणी भर्त्तारं पुनर्नोपैति यथा वा कृतप्रयोजना नर्त्तकी निवर्तते तथा प्रकृतिरपि ॥ ३० ॥

अच्छा, मानाकि, प्रकृतिकी प्रवृत्ति पुरुषार्थ निबन्धन है। किन्तु निवृत्ति किसप्रकार हो जाती है? इसका उत्तर यह है भर्त्ताके दोषको देखकर स्वैरिणी स्त्री जिसप्रकार पुनः अपने भर्त्ताके समीप नहीं जाती, अथवा कृत प्रयोजना नर्त्तकी जैसे विनिवृत्त होती है, प्रकृति भी उसीप्रकार भावापन्न होती है ॥ ३० ॥

यथोक्तम्—

रंगस्य दर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात् ।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्त्तते प्रकृतिरिति ॥ ३१ ॥

उसी प्रकार कहा है; नर्त्तकी जैसे रङ्ग (नाच) दिखलाकर, नृत्यसे निवृत्त होती है प्रकृतिभी उसी प्रकार पुरुषको प्रदर्शन पूर्वक विनिवृत्त होकरती है ॥ ३१ ॥

एतदर्थे निरीश्वरसांख्यशास्त्रप्रवर्त्तककपिलानुसारिणां मतमुपन्यस्तम् ॥ ३२ ॥

इति सर्वदर्शनसंग्रहे सांख्यदर्शनं समाप्तम् ॥ १४ ॥

इसी कारण, निरीश्वर सांख्यशास्त्रके प्रवर्त्तक कपिलानुसारियोंका मत उपन्यस्त हुआ ॥ ३२ ॥

इति सर्व्वदर्शनसंग्रहे सांख्यदर्शन समाप्त हुआ ॥ १४ ॥

अथ पातञ्जलदर्शनम् ॥ १५ ॥

साम्प्रतं सेश्वरसांख्यप्रवर्त्तकपतञ्जलिप्रभृतिमुनिमतमनुवर्तमानानां मतमुपन्यस्यते ॥ १ ॥

अधुना, जो लोग सेश्वर सांख्यप्रवर्त्तक पतञ्जलि प्रभृति मुनियोंके मतानुवर्त्ती हैं उन लोगोंके मतके विषयमें कहाजाता है ॥ १ ॥

तत्र सांख्यप्रवचनापरनामधेयं योगशास्त्रं पतञ्जलिप्रणीतं पादचतुष्टयात्मकम् । तत्र प्रथमे पादे अथ योगानुशासनमिति योगशास्त्रारम्भप्रतिज्ञां विधाय योगश्चित्तवृत्तिनिरोध इत्यादिना योगलक्षणमभिधाय समाधिं सप्रपञ्चं निरदिक्षद् भगवान् पतञ्जलिः। द्वितीये तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोग इत्यादिना व्युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च बहिरंगानि साधनानि । तृतीये देशबन्धश्चित्तस्य धारणेत्यादिना धारणाध्यानसमाधित्रयमन्तरंगं संयमपदवाच्यं तत्रावान्तरफलं विभूतिजातम् । चतुर्थे जन्मौषधिमन्त्रतपः समाधिजाः सिद्धय इत्यादिना सिद्धिपञ्चकप्रपञ्चनपुरःसरं परमं प्रयोजनं कैवल्यम् ! प्रधानानीति पञ्चविंशति तत्त्वानि प्राचीनान्येव सम्मतानि षड्विंशस्तु परमेश्वरः क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषः स्वेच्छया निर्माणकायमधिष्ठाय लौकिकवैदिकसम्प्रदायप्रवर्त्तकः संसारांगारे तप्यमानानां प्राणभृतामनुग्राहकश्च ॥ २ ॥

उनमें पतञ्जलिप्रणीत योगशास्त्र ४ पादयुक्त है। उसका दूसरा नाम सांख्यप्रवचन है। उसके प्रथमपादमें अथ योगानुशासनं, ऐसा कहकर, योगशास्त्रके आरम्भ करनेकी प्रतिज्ञा करके योगशब्दसे चित्तवृत्ति निरोध इत्यादि विधानसे योगका लक्षण निर्देश सहकारसे भगवान पतञ्जलिने समाधि प्रपञ्चका उल्लेख किया है। द्वितीयपादमें, तपः स्वाध्याय और ईश्वर प्रणिधान, क्रियायोग इत्यादि निर्देशपूर्व्वक व्युत्थित चित्तका क्रियायोग यमादि पांच बहिरंग साधनका विवरण किया गया है। तृतीयपादमें देशबन्ध चित्तकी धारणा इत्यादि उपन्यास सहकारसे संयम शब्दवाच्य धारणा, ध्यान, समाधित्रय एवं उसका अवान्तर फलस्वरूप विभूति जात निर्देश किया है। चतुर्थपादमें जन्म, औषधि, मन्त्र, जप और समाधिजन्य सिद्धि सब, इत्यादि विधानसे सिद्धिप्रपञ्चक प्रपञ्चन पुरः सर परमप्रयोजन कैवल्यकीर्तित हुआ है। एवं प्रधान प्रकृति प्राचीन २५ तत्त्व स्वीकारकर परमेश्वरको २६ वां तत्त्वरूपसे निर्देश किया है। एवं कहा है, यह परमेश्वर क्लेश कर्म्म विपाक और आशय इन सबसे परामृष्ट नहीं है। यह स्वेच्छासे निर्म्माण शरीरमें अधिष्ठान करके लौकिक और वैदिक सम्प्रदायकी प्रवर्त्तन करते हैं एवं संसाररूप अङ्गारमें तप्यमान प्राणिगणके प्रति अनुग्रह वितरण करताहै ॥२॥

ननु पुष्करपलाशवन्निर्लेपस्य तस्य तापः कथमुपपद्यते येन परमेश्वरोऽनुग्राहकतया कक्षीक्रियते इति चेदुच्यते तापकस्य रजसः

सत्त्वमेव तप्यं बुद्ध्यात्मना परिणमते इति सत्त्वे परितप्यमाने तमोवशेन तदभेदावगाहिपुरुषोऽपि तप्यत इत्युच्यते ॥ ३ ॥

परमेश्वर, कमलपत्रकी नाईं, निर्लिप्त है। उसका किसप्रकार तापसम्भव हो सकता है जो उसको अनुग्राहकता करके माना गया है। इस बातका उत्तर यह है जो रजोगुण तापसमुद्भावन करता है। एवं सत्वगुण तत्कर्तृक तप्य होता है। इसप्रकार सत्वगुण तप्यमान होनेसे उसके सहित अभेदमें अधिष्ठित पुरुषभी तमोवशात् तप्यमान होता इसप्रकार कहाहै ॥ ३ ॥

तदुक्तमाचार्य्यैः—

सत्त्वं तप्यं बुद्धिभावेन वृत्तं
भावा ते वा राजसास्तापकास्ते।
तप्याभेदग्राहिणी तामसी वा
वृत्तिस्तस्यां तप्य इत्युक्तमात्मेति ॥ ४ ॥

आचार्य्योंने भी निर्देश किया है कि बुद्धिभावद्वारा सत्वगुण तप्यमान होता है राजसभाव समूह इस तापका उद्भावक है ॥ ४ ॥

पतञ्जलिनाप्युक्तम्।

अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुभवतीति ॥

भोक्तृशक्तिरिति चिच्छक्तिरुच्यते। सा चात्मैव परिणामिन्यर्थे बुद्धितत्त्वे प्रतिसंक्रान्तेव प्रतिबिम्बिते तद्वृत्तिमनुभवतीति बुद्धौ प्रतिबिम्बिता सा चिच्छक्तिर्बुद्धिच्छायापत्त्या बुद्धिवृत्त्यनुकारवतीति भावः तथा शुद्धोऽपि पुरुषः प्रत्ययं बौद्धमनुपश्यति तमनुपश्यन्नतदात्मापि तदात्मक इव प्रतिभासत इति ॥ ५ ॥

पतञ्जलिने कहा है भोक्तृशक्ति अपरिणामिनी और अप्रतिसंक्रमा है परिणामी अर्थमें प्रतिसंक्रान्त होनेसे उस वृत्तिको अनुभव करताहै। यहां भोक्तृशक्ति शब्दसे यही आत्मा परिणामी अर्थ बुद्धितत्त्व है, इस बुद्धितत्त्वके प्रति संक्रान्त अर्थात् प्रतिबिम्बित होनेपर, उस वृत्तिका अनुभव करता है, क्या बुद्धिमें प्रतिबिम्बिता होकर, यह चित् शक्ति बुद्धि छाया प्रति प्रकारसे बुद्धिवृत्तिका अनुकरण करती है। इसप्रकार, पुरुष शुद्ध होनेपर, बौद्ध प्रत्यय अनुदर्शन करता है। अनुदर्शन करते हुए, तादात्म्य नहीं होनेपर भी, उस आत्माके नाईं प्रतीत होता है ॥ ५ ॥

इत्थं तप्यमानस्य पुरुषस्यादरनैरन्तर्य्यदीर्घकालानुबन्धियमनियमाद्यष्टांगयोगानुष्ठानेन परमेश्वरप्रणिधानेन च सत्त्वपुरुषान्यताख्यातावनुपप्लवायां जातायामविद्यादयः पञ्च क्लेशाः समूलकाषं कषिता भवन्ति । कुशलाकुशलाश्च कर्माशयाः समूलघातं हता भवन्ति । ततश्च पुरुषस्य निर्लेपस्य कैवल्येनावस्थानं कैवल्यमिति सिद्धम् ॥ ६ ॥

इसप्रकार, पुरुष तप्यमान होनेपर आदर नैरन्तर्य्य और दीर्घ कालानुबन्धी यम नियम आदि अष्टांग योगानुष्ठान एवं परमेश्वर प्रणिधान सहायसे उसका सत्व पुरुषान्यताख्याति अनुपप्लव होता है, तब अविद्यादि पांच क्लेश समूल विनष्ट होते हैं, एवं कुशलाकुशल कर्माशय समस्त समूलघात ध्वंस प्राप्त होता है। इससमय पुरुष निर्लिप्त होकर, कैवल्य अवस्थान करता है । इसीका नाम कैवल्य है ॥ ६ ॥

तत्राथ योगानुशासनमिति प्रथमसूत्रेण प्रेक्षावत्प्रवृत्त्यंगं विषयप्रयोजनसम्बन्धाधिकारिरूपमनुबन्धचतुष्टयं प्रतिपाद्यते ॥७॥

इनमें, अथ योगानुशासन; इत्यादि प्रथमसूत्रमें प्रेक्षावानोंकी प्रवृत्ति अंगस्वरूप विषय प्रयोजन सम्बन्ध, और अधिकाररूप अनुबन्ध चतुष्टय प्रतिपादित होता है ॥ ७ ॥

अत्राथशब्दोऽधिकारार्थः स्वीक्रियते । अथशब्दस्यानेकार्थत्वे संभवति कथमारम्भार्थत्वपक्षे पक्षपातः सम्भवेत् । अथशब्दस्य मङ्गलाद्यनेकार्थत्वं नामलिंगानुशासने नानुशिष्टं मंगलानन्तरारम्भप्रश्नकात्स्न्येंष्वथो अथेति ॥ ८ ॥

यहां अथ शब्द अधिकारार्थ कहकर स्वीकृत होता है । अथ शब्दका अनेक अर्थसम्भव होता है । ऐसे स्थानमें किसप्रकार आरम्भार्थत्व पक्षमें पक्षपात सम्भवित हो सकता । नामलिंगानुशासनमें अथशब्दका मंगलादि अनेक अर्थ अनुशिष्ट हुए हैं । जैसे, मंगल, अनन्तर, आरम्भ, प्रश्न, कार्त्स्न्य और अथ ये सब अथशब्दका वाच्य है ॥ ८ ॥

तत्र प्रश्नकार्त्स्न्ययोरसम्भवेऽपि आनन्तर्य्यमंगलपूर्वप्रकृतापेक्षारम्भलक्षणानाञ्चतुर्णामर्थानां सम्भवादारम्भार्थत्वानुपपत्तिरिति चेन्मैवं मंस्थाः विकल्पासहत्वात् आनन्तर्य्यमथशब्दार्थ इति पक्षे प्रागुक्तवद्यदानन्तर्य्यं पूर्ववृत्तिभावसाधारणात कारणाता-

नन्तर्य्यं वा । न प्रथमः, न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्म-कृदिति न्यायेन सर्वो जन्तुः किञ्चित् कृत्वा किञ्चित् करोत्येवेति तस्याभिधानमन्तरेणापि प्राप्ततया तदर्थाथशब्दप्रयोगवैयर्थ्यप्रसक्तेः । न चरमः, शमाद्यनंतरं योगस्य प्रवृत्तावपि तस्यानुशासनप्रवृत्त्यनुबन्धतया शब्दतः प्राधान्याभावात् ॥ ९॥

यहां प्रश्न और कात्स्न्र्य इस दो प्रकारके अर्थका असम्भव होनेपरभी अवशिष्ट अर्थचतुष्टय का सम्भववशतः आरम्भार्थत्वकी अनुपपत्ति होती है । ऐसा समझोभी नहीं । क्योंकि, यह विकल्पसह नहीं । अथ शब्दका अर्थ आनन्तर्य है । ऐसा कहनेसे, यही जिज्ञास्य है, जो कहींसे आनन्तर्य, या पूर्ववृत्तिभाव साधारण कारणसे आनन्तर्य प्रथम पक्ष अर्थात् जो कहींसे आनन्तर्य नहीं हो सकता है । क्योंकि, जब कोई व्यक्ति क्षणकालभी कर्म्म न करके नहीं रहसकता अर्थात् विनाकर्म्म किये क्षणभरभी नहीं ठहर सकता, इत्यादिके तुल्य सब जन्तु कुछ २ किया करता है । इसप्रकार उसका अभिधान व्यतिरेकभी प्राप्त होनेपर, उसका अर्थ अथशब्दका प्रयोग वैफल्यदोष घटता है । द्वितीयपक्षभी नहीं मानाजासकता । क्योंकि शमादिके अनन्तर योगकी प्रवृत्ति होनेसेभी उसके अनुशासन प्रवृत्तिका अनुबन्धताभावात् शब्दतः प्राधान्यका अभाव घटता है ॥ ९ ॥

न च शब्दतः प्रधानभूतस्यानुशासनस्य शमाद्यानन्तर्य्यमथशब्दार्थः किं न स्यादिति वदितव्यम्। अनुशासनमिति हि शास्त्रमाह अनुशिष्यते व्याख्यायते लक्षणभेदोपायफलसहितो योगो येन तदनुशासनमिति व्युत्पत्तेः। अनुशासनस्य च तत्त्वज्ञानचिख्यापयिषानन्तरभावित्वेन शमदमाद्यानन्तर्य्यनियमाभावात् जिज्ञासाज्ञानयोस्तु शमाद्यानन्तर्य्यमाम्नायते । तस्माच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तः समाहितो भूत्वात्मन्येवात्मानं पश्येदित्यादिना । नापि तत्त्वज्ञानचिख्यापयिषानन्तर्य्यमथशब्दार्थः तस्य सम्भवेऽपि श्रोतृप्रतिपत्तिप्रवृत्त्योरनुपयोगेनानभिधेयत्वात ॥ १० ॥

होता है, उसका नाम अनुशासन है इसप्रकार व्युत्पत्ति होती है । विशेषतः अनुशासन तत्वज्ञान व्याख्याकी इच्छाका अनन्तरभावी इसकारण शमदमादिके आनन्तर्य नियमका अभाव संघटित होता है । किन्तु जिज्ञासा और ज्ञान दोनोंका शमदमादिके आनन्तर्य आम्नात होता है । अतएव, शान्त, दान्त, उपरत तितिक्षु श्रद्धान्वित और समाहित होकर आत्मामें आत्माको अवलोकन करना चाहिये इत्यादिद्वारा भी तत्वज्ञान कहनेकी इच्छाका आनन्तर्यही अथशब्दका अर्थ है ॥ १० ॥

तथापि निःश्रेयसहेतुतया योगानुशासनं प्रमितं न वा । आद्ये तदभावेऽपि उपादेयत्वं भवेत् । द्वितीये तदभावेऽपि हेयत्वं स्यात् । प्रमितं चास्य निःश्रेयसनिदानत्वम् अध्यात्मयोगाधिगमेन चैवं मत्वा धीरो हर्षशोकौ जहातीति श्रुतेः समाधावचला बुद्धिस्तदा योगमवाप्स्यसीति स्मृतेश्च । अतएव शिष्यप्रश्नतपश्चरणरसायनाद्युपयोगानन्तर्य्यं पराकृतम् ॥ ११ ॥

इससमय जिज्ञासा यह है जो योगानुशासन निःश्रेयसका हेतुतावशतः प्रमित या अप्रमित है । प्रमित होनेसे, उसके अभावमेंभी उपादेयत्व होता है । और अप्रमित होनेसे, उसके अभावमेंभी हेयत्व होता है । इसका निःश्रेयस निदानत्व प्रमित क्योंकि उसकेद्वारा अध्यात्म योगाधिगम होता है । उसीप्रकार श्रुतिमेंभी कहा है धीर व्यक्ति इसप्रकार मननपूर्वक हर्ष शोक परिहार करता है । स्मृतिमेंभी निर्देश है समाधिमें बुद्धि अचला होनेसे योग प्राप्त होगा ॥ ११ ॥

अथातो ब्रह्मजिज्ञासेत्यत्र तु ब्रह्मजिज्ञासायाः अनधिकार्यत्वेनाधिकार्य्यार्थत्वं परित्यज्य साधनचतुष्टयसंपत्तिविशिष्टाधिकारिसमर्पणाय शमदमादिवाक्यविहिताच्छमादेरानन्तर्य्यमथशब्दार्थ इति शङ्कराचार्य्यैर्निरटङ्कि ॥ १२ ॥

अथातो ब्रह्म जिज्ञासा, इत्यादि स्थानमें ब्रह्मजिज्ञासाका अनधिकार्य्यत्ववशतः अधिकार्य्यार्थत्व परित्यागपूर्वक साधनचतुष्टय सम्पत्तिविशिष्ट अधिकारि समर्पणार्थ शमदमादि वाक्यविहित शमादिका आनन्तर्यही अथ शब्दार्थ शङ्कराचार्य्यने इसप्रकार मीमांसा किई है ॥ १२ ॥

अथ मा नाम भूदानन्तर्य्यार्थोऽथशब्दः मङ्गलार्थः किं न स्यात् न स्यान्मंगलस्य वाक्यार्थे समन्वयाभावात् । अगर्हिताभीष्टावाप्तिर्मङ्गलम् । अभीष्टं च सुखावाप्तिदुःखपरिहाररूपतयेष्टं

योगानुशासनस्य च सुखदुःखनिवृत्त्योरन्यतरत्वाभावान्न मंगलता । तथा च योगानुशासनं मंगलमिति न संपद्यते मृदंगध्वनेरिवाथशब्दश्रवणस्य कार्य्यतया मंगलस्य वाच्यत्वलक्ष्यत्वयोरसंभवाच्च यथार्थिकार्थो वाक्यार्थे निविशते तथा कार्य्यमपि निविशेत अपदार्थत्वाविशेषात् । पदार्थे पदार्थ एव हि वाक्यार्थे समन्वीयते अन्यथा शब्दप्रमाणकानां शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्य्यंति मुद्राभंगकृतो भवेत् ॥ १३ ॥

चांहे अथ शब्द आनन्तर्यार्थक न हो पर मङ्गलार्थक क्यों नहीं होगा ? इसका उत्तर यह है जो मङ्गलशब्दके वाक्यार्थमें समन्वयके अभाववशतः मङ्गलार्थ नहीं होसकता मङ्गलशब्दसे अगर्हित अभीष्टप्राप्ति सुखकी अवाप्ति और दुःखकी परिहाररूपताद्वारा जो इष्ट है उसीको अभीष्ट कहतेहैं । सुख और दुःख दोनोंहीकी निवृत्तिवशतः अन्यतरत्वका अभाव होजानेसे योगानुशासनकी मङ्गलता नहीं सिद्ध होती । और योगानुशासनशब्दसे मङ्गल यह किसीक्रमसेभी सङ्गत नहीं होसकता । इसका कारण यह है जो मृदङ्गध्वनिकीनाईं अथशब्द सुननेकी कार्यतावशतः मङ्गलशब्द वाच्य वा लक्ष्य कुछभी होना सम्भव नहीं । जैसे अर्थिकार्थवाक्यमें निविष्ट होताहै कार्य्यभी उसीप्रकार निविष्ट होता है अन्यथा शब्द प्रमाणकसमूहकी शाब्दीआकांक्षा शब्दद्वाराही पूरणीय होती है, इसप्रकार मुद्राभंग विहित होताहै ॥ १३ ॥

ननु प्रारिप्सितप्रबन्धपरिसमाप्तिपरिपन्थिप्रत्यूहव्यूहशमनाय शिष्टाचारपरिपालनाय च शास्त्रारम्भे मंगलाचरणमनुष्ठेयम् । मंगलादीनि मंगलमध्यानि मंगलान्तानि च शास्त्राणि प्रथन्ते आयुष्मत्पुरुषकाणि वीरपुरुषकाणि च भवन्तीत्यभियुक्तोक्तेः । भवति च मंगलार्थोऽथशब्दः । ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्मांगलिकावुभाविति स्मृतिसम्भवात । तथाच वृद्धिरादैजित्यादौ वृद्ध्यादिशब्दवदथशब्दो मंगलार्थः स्यादिति चेन्मैवं मापिष्टाः अर्थान्तराभिधानाय प्रयुक्तस्याथशब्दस्य वीणावेण्वादिध्वनिवच्छ्रवणं मंगलफलत्वोपपत्तेः ॥ १४॥

यदि कहो कि, प्रारिप्सित प्रबन्धकी परिसमाप्तिका प्रतिकूल विघ्नपरम्पराके प्रशमन एवं शिष्टाचार परिपालन, इन दोनोंप्रकारके व्यापार सम्पादनार्थ शास्त्रोंके आरम्भमें मंगलाचरण अनुष्ठान करना पड़ताहै उसीप्रकार पण्डितोंने कहा है कि, शास्त्रोंकी आदिमें मंगल, मध्यमें मंगल, अन्तमें मंगल, विधान करना कर्त्तव्य है । इसकारण अथ शब्द मंगलार्थ है । स्मृतिमें कहाहै । पहिले ब्रह्माकेकण्ठ भेदकरके ओङ्कार और अथ ये दो शब्द निकलेहैं । इस कारण, ये दोनोंही मांगलिकहैं । और वृद्धिरादैच् इत्यादिमें वृद्ध्यादि शब्दकी नाईं, अथ शब्द मंगलार्थ होताहै । ऐसा कहनाभी नहीं । क्योंकि, अर्थान्तर अभिधानार्थ प्रयोजित अथशब्द सुननेसे वीणावेण्वादिध्वनिकी नाईं मंगलफल समुद्भावन करताहै ॥ १४ ॥

अथार्थान्तरारम्भवाक्यार्थधीफलकस्याथशब्दस्य कथमन्यफलकतेति चेन्न अन्यार्थनीयमानोदकुम्भोपलम्भवत् तत्सम्भवात् । न च स्मृतिव्याकोपः मांगलिकाविति मंगलप्रयोजकत्वाविवक्षया प्रवृत्तेः । नापि पूर्वप्रकृतापेक्षोऽथशब्दः फलत आनन्तर्य्याव्यतिरेकेण प्रागुक्तदूषणानुषङ्गात् ॥ १५ ॥

यदि कहो कि, अर्थान्तरका आरम्भ वाक्यार्थ धीफलक अथ शब्दका किसप्रकार अन्यफलकत्व सम्भव होसकता ? इसका उत्तर यह है जो अन्यार्थ नीयमान उदक कुम्भवत् वह सम्भवित होता है । उसमें पूर्वोक्त स्मृतिका व्यभिचार नहीं होसकता । स्मृतिमें जो, माङ्गलिक इसप्रकार पद प्रयोजित हुआ है, सो मङ्गल प्रयोजकत्व विवक्षाहीमें कहा है । फलतः आनन्तर्य्यका अव्यतिरेकमें पूर्वोक्त दोष घटता है । इसकारण अथ शब्द पूर्व्वप्रकृतिका अपेक्षी नहीं होसकता ॥ १५ ॥

किमयमथशब्दोऽधिकारार्थः अथानन्तर्य्यार्थ इत्यादिविमर्शवाक्ये पक्षान्तरोपन्यासे तत्सम्भवेऽपि प्रकृते तदसम्भवाच्च । तस्मात्पारिशेष्याद्धिकारपदवेदनीयप्रारम्भार्थोऽथशब्द इति विशेषो भाष्यते ॥ १६ ॥

यदि कहो कि [illegible] अधिकार या आनन्तर्य बोध होता है, इत्यादि विमर्श वाक्यमें वह सम्भव [illegible] असम्भव होता है इसीकारण, परिशेषसे विशेष करके, कहा है अथ शब्दसे अधिकार [illegible] प्रारम्भ [illegible] पड़ता है ॥ १६ ॥

अथैष ज्योतिरथैष विश्वज्योतिरित्यत्राथशब्दः क्रतुविशेषप्रारम्भार्थः परिगृहीतो यथा अथशब्दानुशासनमित्यत्राथशब्दो

व्याकरणशास्त्राधिकारार्थः । तदभापि व्यासभाष्ये योगसूत्रविवरणपरे अथेत्ययमधिकारार्थः । प्रयुज्यत इति तद् व्याचख्यौ वाचस्पतिः । तस्मादयमथशब्दोऽधिकारद्योतको मंगलार्थश्चेति सिद्धमिति ॥ १७ ॥

अथैष ज्योतिः एवं अथैष विश्वज्योतिः इत्यादि स्थानमें अथ शब्द क्रतुविशेष मारम्भार्थ रूपसे परिगृहीत हुआ है । जैसे, अथ शब्दानुशासन, इत्यादि स्थलमें अथशब्दसे व्याकरण शास्त्रका अधिकार बूझ पड़ता है । योगसूत्रका विवरणपर व्यासभाष्यमें सो कहा है, अथ शब्द अधिकारार्थ मयोजित हुआ है । वाचस्पतिने इसमकार व्याख्या किया है । अतएव, अथ शब्दसे अधिकार और मङ्गल दोनोंही ज्ञात होता है, यह सिद्ध हुआ ॥ १७ ॥

तदित्थममुष्याथशब्दस्याधिकारार्थत्वपक्षे शास्त्रेण प्रस्तूयमानस्य योगस्योपवर्त्तनात् समस्तशास्त्रतात्पर्य्यव्याख्यानेन शास्त्रस्य सुखावबोधप्रवृत्तिरास्तामित्युपपन्नम् ॥ १८ ॥

इसकारण, इसमकार इस अथ शब्दका अधिकारार्थत्व पक्षमें शास्त्रद्वारा प्रस्तूयमान योगका उपावर्त्तन होनेसे समस्त शास्त्र तात्पर्य्यका व्याख्यानद्वारा शास्त्रकी सुखबोधता मवृत्तिभी उपपन्न हुई ॥ १८ ॥

ननु हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातन इति याज्ञवल्क्यस्मृतेः पतञ्जलिः कथं योगस्य शासितेति चेदद्धा अतएव तत्र तत्र पुराणादौ विशिष्य योगस्य विप्रकीर्णतया दुर्ग्राह्यार्थत्वं मन्यमानेन भगवता कृपासिन्धुना फणिपतिना सारं सञ्जिघृक्षुणा अनुशासनमारब्धं न तु साक्षाच्छासनम् ॥ १९ ॥

यदि कहो कि, हिरण्यगर्भही योगका वक्ता दूसरा कोई नहीं । याज्ञवल्क्यस्मृतिमें इस प्रकार निर्देश किया है । सुतरां पतञ्जलि किसमकार योगके शासिता होसकते हैं ? इसका उत्तर यह है जो, उस २ पुराण आदिमें योगकी विप्रकीर्णतावशतः अर्थबोध होना दुर्घट है, ऐसा समझकर, कृपासिन्धु भगवान फणिपतिने सारसंग्रह वासनासे अनुशासन आरम्भ किया है, साक्षात शासन नहीं ॥ १९. ॥

यदायमथशब्दोऽधिकारार्थः तदेवं काव्यार्थः सम्पद्येत योगानुशासनं शास्त्रमधिकृतं वेदितव्यमिति तत्र शास्त्रे व्युत्पाद्यमानतया योगः ससाधनः सफलो विषयः तद्व्युत्पादनमवान्तरफलं

व्युत्पादितस्य योगस्य कैवल्यं परमप्रयोजनं शास्त्रयोगयोः प्रतिपाद्यप्रतिपादकभावलक्षणः सम्बन्धः योगस्य कैवल्यस्य च साध्यसाधनाभावलक्षणः सम्बन्धः । स च श्रुत्यादिप्रसिद्ध इति प्रागेवावादिषम् । मोक्षमपेक्षमाणाः श्रवणाधिकारिण इत्यर्थं सिद्धम् ॥ २० ॥

अथशब्द अधिकारार्थ होनेसे, इसप्रकार वाक्यार्थ होता है, योगानुशासन शास्त्र अधिकृत अर्थात् कहना चाहिये, उस शास्त्रमें साधन और फलके सहित योग व्युत्पादित हुआ है, इसकारण योगही विषय । उसका व्युत्पादन अवान्तर फल कैवल्य इस व्युत्पादितयोगका परम प्रयोजनहै । शास्त्र एवं योग दोनोंमें प्रतिपाद्य प्रतिपादक भावरूप सम्बन्धहै । कैवल्य दोनों साध्य साधन भावरूप सम्बन्धहै । वह श्रुत्यादिमें प्रसिद्धहै । पूर्वैही सो कहागया है ॥२०॥

न चाथातो ब्रह्मजिज्ञासेत्यादावधिकारिणोऽर्थतः सिद्धिराशंकनीया तत्राथशब्देनानन्तर्य्याभिधाने प्रणाडिकया अधिकारिसमर्पणसिद्धावार्थिकत्वशङ्कानुदयात् । अत एवोक्तं श्रुतिप्राप्ते प्रचरणादीनामनवकाश इति । अस्यार्थः यत्र हि श्रुत्या अर्थो न लभ्यते तत्रैव प्रकरणादयोऽर्थं समर्पयन्ति नेतरत्र । यत्र तु शब्दादेवार्थस्योपलम्भः तत्र नेतरस्य सम्भवः ॥ २१ ॥

अथातो ब्रह्मजिज्ञासा, इत्यादिस्थलमें अधिकारीकी अर्थसिद्धि आशङ्का नहीं कियी जासकती । यहां अथशब्दसे आनन्तर्य अभिहित होनेसे, प्रणालीक्रमसे अधिकारी समर्पण सिद्ध हुआ है । इसकारण, आर्थिकत्व शङ्काका उदय नहीं होसकता । इसकारण कहाहै, श्रुति प्राप्त होनेसे प्रकरणादिका अनवकाश इसका अर्थ यह है जो, जिस स्थलमें श्रुतिद्वारा अर्थलाभ होता नहीं, उसी स्थानमें प्रकरणादि अर्थसमर्पण करताहै, अपरत्र नहीं किन्तु जिसस्थानमें शब्दसेही अर्थकी उपलब्धि होती है उस स्थानमें इतरका सम्भव सिद्ध नहीं होता ॥ २१ ॥

ननु प्रबोधिन्या श्रुत्या बोधितेऽर्थे तद्विरुद्धार्थं प्रकरणादि समर्पयति अविरुद्धं वा न प्रथमः विरुद्धार्थबोधकस्य तस्य बाधितत्वात् । न चरमः वैयर्थ्यात्तदाह श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति—

बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा ।
मध्यमानान्तु बाध्यत्वं बाधकत्वमपेक्षयेति च ॥
तस्माद्विषयादिमत्वाद् ब्रह्मविचारकशास्त्रवद् योगानुशासनं शास्त्रमारम्भणीयमिति स्थितम् ॥ २२ ॥

शीघ्रबोधसम्पादिनीश्रुतिद्वारा अर्थबोधित होनेसे, उसका विरुद्धार्थ प्रकरणादिसमर्पण करता है, या अविरुद्ध अर्थ प्रतिपादित करता है, प्रथमपक्ष ग्राह्य नहीं होसकता । इसका कारण यहहै कि, विरुद्धार्थबोधिक उसका बाध्य होजाताहै । द्वितीयपक्षभी संगत नहीं होता । क्योंकि, उसमें वैयर्थ्य घटताहै । उसीप्रकार कहा है, श्रुति नित्यही बाधिका और समाख्या सदा बाधित होतीहै । इसकारण, ।विषयादिसम्पन्नतावशतः ब्रह्मविचारक शास्त्रकीनाईं योगानु- शासनशास्त्र आरम्भणीय है यह मीमांसित हुआ ॥ २२ ॥

ननु व्युत्पाद्यमानतया योग एवात्र प्रस्तुतो न शास्त्रमिति चेत् सत्यं प्रतिपाद्यतया योगः प्राधान्येन प्रस्तुतः स च तद्विषयेण शास्त्रेण प्रतिपाद्यत इति तत्प्रतिपादने करणं शास्त्रं करणगोचरश्च कर्तृव्यापारा न कर्मगोचरतामाचरति ॥ २३ ॥

यदि कहो कि योग व्युत्पादित हुआहै अतएव वही इस स्थानमें प्रस्तुत है शास्त्र प्रस्तुत नहीं, यह सत्यहै, किन्तु योग जब प्रतिपाद्यहै तब प्रधानतः वही प्रस्तुत कहनाचाहिये । यह योग उस विषयके शास्त्रद्वारा प्रतिपादित हुआहै इसकारण, उसके प्रतिपादनमें शास्त्र कारणहै । कर्तृव्यापार, करणगोचर, कर्म्मगोचरताका आचरण नहीं करता ॥ २३ ॥

यथा छेत्तुर्देवदत्तस्य व्यापारभूतमुद्यमननिपातनादिकर्मकरणभूतपरशुगोचरं न कर्मभूतवृक्षादिगोचरं तथा च वक्तुः पतञ्जलेः प्रवचनव्यापारापेक्षया योगविषयस्याधिकृतता करणस्य शास्त्रस्याभिधानव्यापारापेक्षया तु योगस्य वेति विभागः । ततश्च योगशास्त्रस्यारम्भः सम्भावनां भजते ॥ २४ ॥

जैसे, छेदनकर्त्ता देवदत्तका व्यापारस्वरूप उद्यमन निपातनादिकर्म्म, करणभूत परशुका गोचर होताहै, कर्म्मभूत वृक्षादिगोचर नहीं होता, इसीप्रकार वक्ता पतञ्जलिकी प्रवचन व्यापारापेक्षाद्वारा योगविषयकी अधिकृतता, एवं करण शास्त्रका अभिधान व्यापारापेक्षाद्वारा योगका अधिकार, ऐसा विभाग विनिष्पन्न होता है । इसीसे योगशास्त्रका आरम्भ सम्भावित होता है ॥ २४ ॥

अत्र चानुशासनीयो योगश्चित्तवृत्तिनिरोध इत्युच्यते । ननु युजियोंग इति संयोगार्थतया परिपठितात् युजेर्निष्पन्नो योगशब्दः संयोगवचन एव स्यान्न तु निरोधवचनः । अतएवोक्तं याज्ञवल्क्येन—

संयोगो योग इत्युक्तो जीवात्मपरमात्मनोरिति ॥ २५ ॥

यहां अनुशासनीय योगशब्दसे निरोध इसप्रकार, कहा गया है । यदि कहो कि, युजि-योग, इसप्रकार संयोगार्थनाद्वारा परिपठित युज धातुसे योगशब्द सिद्ध हुआ है । अतएव वह संयोग, वचनहै, निरोध वचन नहीं होसकता । अतएव, याज्ञवल्क्यने भी कहाहै, जीवात्मा और परमात्मा दोनोंके सयोगको 'योग' कहते हैं ॥ २५ ॥

तदेतद्वार्त्तं जीवपरयोः संयोगे कारणस्यान्यतरकर्मादेरसम्भवादजसंयोगस्य कणभक्षाक्षचरणादिभिः प्रतिक्षेपाच्च । मीमांसकमतानुसारेण तदंगीकारेऽपि नित्यसिद्धस्य तस्य साध्यत्वाभावेन शास्त्रवैफल्यापत्तेश्च धातूनामनेकार्थत्वेन युजेः समाध्यर्थत्वोपपत्तेश्च ॥ २६ ॥

याज्ञवल्क्यका यह वचन सर्वथा जनश्रुति है । क्योंकि, जीवात्मा और परमात्मा दोनोंके संयोगका कारण स्वरूप अन्यतरकर्म सम्भव नहीं । मीमांसक मतानुसार उनको माननेसे भी नित्य सिद्ध करकर उसके साध्यत्वका अभाववशात् शास्त्रवैफल्य दोष घटता है । विशेषतः धातुओंके अनेक अर्थ हैं । सुतरां, युज धातुका समाध्यर्थत्व सिद्ध होता है ॥ २६ ॥

तदुक्तम्—

निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः ।
अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनमिति ॥ २७ ॥

इसी प्रकार कहे हैं, निपात, उपसर्ग और धातु, इन तीनका अनेक अर्थ लक्षित होताहै २७॥

अतएव केचन युजिं समाधावपि पठन्ति युज समाधाविति। नापि याज्ञवल्क्यवचनव्याकोपः तत्रस्थस्यापि योगशब्दस्य समाध्यर्थत्वात् ।

समाधिः समतावस्था जीवात्मपरमात्मनोः ।

इसकारण कोई कोई युजधातुका अर्थ समाधि, इसप्रकार पढ़ते हैं । याज्ञवल्कके वचनकाभी वैयर्थ्य नहीं होता । क्योंकि, उनने योगशब्दसे समाधि, ऐसा कहा है । जैसे जीवात्मा और परमात्मा दोनोंकी समतावस्थानका नाम समाधि है ॥ २८ ॥

तेनैवोक्तत्वाच्च । तदुक्तं भगवता व्यासेन । योगः समाधिरिति । यद्येवमष्टाङ्गयोगे चरमस्यांगस्य समाधित्वमुक्तं पतञ्जलिना यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयोऽष्टांगानि योगस्येति । न चांगेवांगतां गन्तुमुत्सहते उपकार्य्योपकारकभावस्य दर्शपूर्णमासप्रयाजादौ भिन्नायतनत्वेनात्यन्तभेदादतः समाधिरपि न योगशब्दार्था युज्यत इति चेत्तन्न युज्यते व्युत्पत्तिमात्राभिधित्सया तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरिति निरूपितचरमांगवाचकेन समाधिशब्देनांगिनो योगस्याभेदविवक्षया व्यपदेशोपपत्तेः । न च व्युत्पत्तिबलादेव सर्वत्र शब्दःप्रवर्त्तते तथात्वे गच्छतीति गौरिति व्युत्पत्तेः तिष्ठन् गान स्यात् गच्छतो देवदत्तस्य स्यात् ॥ २९ ॥

भगवान् व्यासने भी कहाहै कि योगशब्दार्थ समाधि है । पतञ्जलिने यद्यपि अष्टांग योगमें चरम अंगका समाधित्व निर्देश किया है, अंगी कभी अंगताको गमन करनेमें उत्साही नहीं होता । क्योंकि, दर्शपूर्णमास यज्ञादिमें उपकार्य्य और उपकारकभावका भिन्नायतनत्व वशतः अत्यन्त भेद लक्षित होता है । इसकारण, समाधिभी योगशब्दका अर्थ है । यह युक्तिसंगत नहीं होसकता; इसप्रकार मतवाद संगत नहीं । क्योंकि, व्युत्पत्तिबलसेही सर्वत्र शब्द प्रवर्त्तित नहीं होता । ऐसा होनेसे, गमन करता है, इस अर्थमें गो इसप्रकार व्युत्पत्तिवशात, गमन न करके बैठ रहनेसे, गो नहीं कहते हैं ॥ २९ ॥

प्रवृत्तिनिमित्तञ्च प्रागुक्तमेव चित्तवृत्तिनिरोध इति तदुक्तं योगश्चित्तवृत्तिनिरोध इति । ननु वृत्तीनां निरोधश्चेद्योगोऽभिमतस्तासां ज्ञानत्वेनात्माश्रयतया तन्निरोधोऽपि प्रध्वंसपदवेदनीयस्तदाश्रयो भवेत प्रागभावप्रध्वंसयोः प्रतियोगिसमानाश्रयत्वनियमात् । ततश्चोपपन्नस्त्वयं धर्मो विकरोति हि धर्मिणमिति न्यायेनात्मनः कौटस्थ्यं विहन्यतेति चेत्तदपि न घटते निरोधानां

प्रमाणविपर्य्ययविकल्पनिद्रास्मृतिस्वरूपाणां वृत्तीनामन्तः करणाद्यपरपर्य्यायचित्तधर्मत्वांगीकारात्। कूटस्थनित्या त्विच्छक्तिरपरिणामिनी विज्ञानधर्माश्रयो भवितुं नार्हत्येव ॥ ३० ॥

यदि वृत्तियोंके निरोधहीको योग कहना अभिमत होता है, तो कहना यह है-जो वेही वृत्तियां साक्षाद् ज्ञानस्वरूप और आत्माका आश्रय है । अतएव, उनका प्रध्वंस पदवाच्य निरोधभी आश्रय होगा । क्योंकि प्रागभाव और प्रध्वंस दोनोमें प्रतियोगि समानाश्रयत्व नियमसे बद्ध है । सुतरां आत्माकी कूटस्थताका व्याघात करसकताहै इसका उत्तर यह है जो, यह कभी घटनेकी सम्भावना नहीं, इसका कारण यह है कि प्रमाण, विपर्य्यय, विकल्प, निद्रा, स्मृति, स्वरूप, वृत्ति सब अन्तःकरणादि अपर नामसे अभिहित चित्तका धर्म्म प्रकार अंगीकृत होतीहै । चित्‌शक्ति कूटस्थ नित्या एवं परिणाम विहीना है सुतरां, विज्ञान धर्म्माश्रयं होनेकी सम्भावना नहीं ॥ ३० ॥

न च चितिशक्तेरपरिणामित्वमसिद्धमिति मन्तव्यं चितिशक्तिरपरिणामिनी सदा ज्ञातृत्वात् न यदेवं न तदेवं यथा चित्तादि इत्याद्यनुमानसम्भवात् तथा यद्यसौ पुरुषः परिणामी स्यात्तदा परिणामस्य कादाचित्कत्वात्तासां चित्तवृत्तीनां सदाज्ञातृत्वं नोपपद्येत चिद्रूपस्य पुरुषस्य सदैवाधिष्ठातृत्वेनावस्थितस्य यदन्तरंगनिर्मलं सत्त्वं तस्यापि सदैव स्थितत्वात् येन येनार्थेनोपरक्तं भवति तस्य दृश्यस्य सदैव चिच्छायापत्त्या भानोपपत्त्या पुरुषस्य निःसंगत्वं सम्भवतिाततश्च सिद्धं तस्य सदाज्ञातृत्वमिति न काचित् परिणामित्वाशंकावतरति ॥ २१ ॥

चितिशक्तिकी परिणामशून्यता कहकर नही, समझाजासकता । क्योंकि, सर्वदा ज्ञातृत्व-[illegible] परिणामविहीन एवं जोजो नही है, वहवह नहीं होसकता, जैसे चित्तादि [illegible] अनुमान सम्भव होताहै । इसीप्रकार यदि यह पुरुष परिणामी होताहै तो परिणाम [illegible] इन वृत्तियोंका सदाज्ञातृत्व उपपन्न नही होसकता चिद्रूपपुरुष सदा-[illegible] अवस्थितहै । उसका जो अन्तरंग निर्म्मलसत्त्व उसका सर्व्वदा अवस्थान [illegible] । यह निहजित विषयमें उपरक्त होताहै, उसउस दृश्यका सदाही चित् छाया-[illegible] । इसकेद्वारा पुरुषका निःसंगत्व सम्भावित होताहै । तो, सदा [illegible] परिणामित्वकी आशंकाकी अवतारणा नहीं होसकती २१॥

चित्तं पुनर्येन विषयेणोपरक्तं भवति स विषयो ज्ञातः, यदुपरक्तं नभवति तदज्ञातमिति वस्तुनोऽयस्कान्तमणिकल्पस्य ज्ञानाज्ञानकारणभूतोपरागानुपरागधर्मित्वादयःसधर्मकं चित्तं परिणामि इत्युच्यते ॥ ३२ ॥

चित्त जिस विषयद्वारा उपरक्त होताहै वही उसको ज्ञात होता । जिसमें उपरक्त नहीं होता वह उसको अविदित रहता,है इसकारण, कहागया है, वस्तुमात्रही अयस्कान्त मणिकी नाई एवं ज्ञानाज्ञानका कारणस्वरूप उपराग और अनुपराग धर्म्मादि विशिष्ट एवं सधर्म्मक चित्त परिणामीहै ॥ ३२ ॥

ननु चित्तस्येन्द्रियाणां चाहंकारिकाणां सर्वगतत्वात् सर्वविषयैरस्ति सदा सम्बन्धः तथा च सर्वेषां सर्वदा सर्वत्र ज्ञानं प्रसज्येत । सर्वगतत्वेऽपि चित्तं यत्र शरीरे वृत्तिमत् तेन शरीरेण सह सम्बन्धो येषां विषयाणां तेष्वेवास्य ज्ञानं भवति नेतरेष्वित्यतिप्रसंगाभावादत एवायस्कान्तमणिकल्पा विषयाः अयःसधर्मकं चित्तमिन्द्रियप्रणालिकयाभिसम्बध्योपरञ्जयन्ति । तस्माच्चित्तस्य धर्मा वृत्तयो नात्मनः । तथा च श्रुतिः, कामः संकल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिरित्येतत्सर्वं मन एवेति ॥ ३३ ॥

चित्त एवं अहङ्कारिक इन्द्रियसमूह सर्वगत है इसकारण, सब विषयोंके साथ उसका सदा सम्बन्ध रहता है और सबहीका सर्व्वदा सर्व्वत्र ज्ञानप्रसक्त होताहै सर्वगत होनापरभी चित्त जिस शरीरमें वृत्तियुक्त होताहै । उसी शरीरके साथ सम्बन्ध होता है । जिन सब विषयोंमें सम्बन्ध लक्षित होताहै वही उसका ज्ञान होताहै, अन्यत्र नहीं इसप्रकार अति प्रसंगका अभाव घटता है इसकारण अयस्कान्त मणिसदृश विषय सब लोहेका धर्म्म मनको इन्द्रिय प्रणालिकाकी सहायताले अभिसम्बन्धमें उपरञ्जित करता है । इसीकारण वृत्ति सब चित्तका धर्म्महै, आत्माका नहीं और, श्रुतिमें कहा है कि काम, सङ्कल्प, [illegible], श्रद्धा, अश्रद्धा, धृति, अधृति, ये सब मनही है ॥ ३३ ॥

चिच्छक्तेरपरिणामित्वं पञ्चशिखाचार्य्यैराख्यायि अपरिणामिनी भोक्तृशक्तिरिति पतञ्जलिनापि सदाज्ञाताश्चित्तवृत्तयस्तत्प्रभोः

पुरुषस्यापरिणामित्वादिति चित्तपरिणामित्वेऽनुमानमुच्यते । चित्तं परिणामि ज्ञाताज्ञातविषयत्वात् श्रोत्रादिवदिति ॥ ३४ ॥

चित्शक्तिके अपरिणामित्वकी व्याख्या पञ्चशिखाचार्य्यने किथी है, जैसे, भोक्तृशक्ति अपरिणामिनी है पतञ्जलिनेभी कहा है चित्तवृत्तियां सब सदैव ज्ञाता हैं । उन सबके प्रभु पुरुषका अपरिणामित्वही इसका कारण है, चित्तके परिणामित्व सम्बन्धमें ऐसा अनुमान कहाजाताहै कि श्रोत्रादिकी नाईं ज्ञाताज्ञातविषयत्ववशतः चित्त परिणामी है ॥ ३४ ॥

परिणामश्च त्रिविधः प्रसिद्धः धर्मलक्षणावस्थाभेदात् । धर्मिणश्चित्तस्य नीलाद्यालोचनं धर्मपरिणामः । यथा कनकस्य कटकमुकुटकेयूरादिधर्मस्य वर्त्तमानत्वादिर्लक्षणपरिणामः । नीलाद्यालोचनस्य स्फुटत्वादिरवस्थापरिणामः । कनकादेस्तु नवपुराणत्वादिरवस्थापरिणामः । एवमन्यत्रापि यथासम्भवं परिणामत्रितयमूहनीयम् । तथा च प्रमाणादिवृत्तीनां चित्तधर्मत्वात्तन्निरोधोऽपि तदाश्रय एवेति न किञ्चिदनुपपन्नम् ॥ ३५ ॥

धर्म्म, लक्षण, और अवस्थाभेदसे परिणाम तीन प्रकारका प्रसिद्ध है । धर्म्मी चित्तके नीलाद्यालोचनका नाम धर्म्मपरिणाम है । जैसे कनकका कटक, मुकुट, और केयूर आदि धर्मका वर्त्तमानत्व आदि लक्षणपरिणाम है और नीलादि आलोचनका स्फुटत्व प्रभृतिको अवस्थापरिणाम कहतेहैं । जैसे, कनक आदिका नया पुराणत्व आदि अवस्था परिणाम है । इस प्रकार, अन्यत्र भी यथासम्भव परिणामत्रय विचारना चाहिये । और प्रमाणादि वृत्तियोंका चित्तधर्मत्ववशतः इनका निरोधभी चित्तका आश्रित है।इस विषयमें कुछ अनुपपत्ति नहीं ३५॥

ननु वृत्तिनिरोधो योग इत्यंगीकारे सुषुप्त्यादौ क्षिप्तमूढादिचित्तवृत्तीनां निरोधसम्भवाद्योगत्वप्रसंगः । न चैतद्युज्यते क्षिप्ताद्यवस्थासु क्लेशप्रहाणादेरसम्भवान्निःश्रेयसपरिपन्थित्वाच्च । तथा हि क्षिप्तं नाम तेषु तेषु विषयेषु क्षिप्यमाणमस्थिरं चित्तमुच्यते । तमःसमुद्रे मग्नं निद्रावृत्तिमच्चित्तं मूढमिति गीयते क्षिप्ताद्विशिष्टं चित्तं विक्षिप्तमिति गीयते । विशेषो नाम चञ्चलं हि मनः कृष्णप्रमाथि बलवद्दृढमिति न्यायेनास्थिरस्यापि मनसः [illegible]

स्वाभाविकं व्याध्याद्यनुशयजनितं वा । तदाह व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तराया इति । तत्र दोषत्रयवैषम्यनिमित्तो ज्वरादिर्व्याधिः, चित्तस्याकर्मण्यत्वं स्त्यानं विरुद्धकोटिद्वयावगाहि ज्ञानं संशयः समाधिसाधनानामभावनं प्रमादः शरीरवाक्चित्तगुरुत्वादप्रवृत्तिरालस्यं विषयाभिलाषोऽविरतिः अतस्मिंस्तद्बुद्धिर्भ्रान्तिदर्शनं कुतश्चिन्निमित्तात् समाधिभूमेरलाभोऽलब्धभूमिकत्वं लब्धायामपि तस्यां चित्तस्याप्रतिष्ठा अनवस्थितत्वमित्यर्थः। तस्मान्न वृत्तिविरोधो योगपदनिक्षेपमर्हति इति चेन्मैवं वोचः हेयभूताक्षिप्ताद्यवस्थात्रये वृत्तिविरोधस्य हेयत्वसम्भवेऽप्युपादेययोरेकाग्रविरुद्धावस्थयोर्वृत्तिनिरोधस्य योगत्वसम्भवात् एकतानं चित्तमेकाग्रमुच्यते निरुद्धसकलवृत्तिकं संस्कारमात्रशेषं चित्तं निरुद्धमिति भण्यते ॥ २६ ॥

यदि कहो कि, योगशब्दसे, वृत्तिनिरोध, ऐसा अंगीकार करनेसे, सुषुप्तादि अवस्थामें विक्षिप्त मूढ़ आदि चित्तवृत्तियोंका निरोध सम्भववशतः योगत्व प्रसंग होता है । इसका उत्तर यह है कि, यह कभी युक्तिसंगत नहीं होसकता । क्योंकि, क्षिप्तादि अवस्थामें क्लेश प्रहाणादिका असम्भव और निःश्रेयस प्रतिकूलता संघटित होती है । इसीप्रकार, क्षिप्त शब्दसे उस २ विषयमें क्षिप्यमाण अस्थिर चित्त जानपड़ता है । और अन्धकार तमःप्रधान निद्रावृत्तियुक्त चित्तको मूढ कहते हैं । इसप्रकार, क्षिप्तसे विशिष्ट चित्तका नाम विक्षिप्त है ।

भूमिके अलाभको अलब्धभूमिकत्व एवं भूमिलब्ध होनेपरभी उसमें चित्तके अप्रतिष्ठाको अनवस्थितत्व कहते हैं। इसकारण वृत्तिनिरोधको योगपक्षमें निक्षेप नहीं कियाजासकता। ऐसा कहनाभी नहीं क्योंकि हेयस्वरूप क्षिप्तादि तीनों अवस्थाओंमें वृत्तिनिरोधका हेयत्व सम्भव होनेपरभी उपादेय एकाग्र और निरुद्धावस्थाके वृत्तिनिरोधका योगत्व होताहै। एकतानचित्तको 'एकाग्र' कहते है, और जिसकी सबही वृत्ति निरुद्ध हुई हैं, तादृश संस्कार मात्रशेषविशिष्ट चित्तका नाम निरुद्ध है ॥ २६ ॥

स च समाधिर्द्विविधः सम्प्रज्ञातासम्प्रज्ञातभेदात्। तत्रैकाग्रचेतसि यः प्रमाणादिवृत्तीनां बाह्यविषयाणां निरोधः स सम्प्रज्ञातसमाधिः सम्यक् प्रज्ञायतेऽस्मिन् प्रकृतेर्विविक्ततया चित्तमिति व्युत्पत्तेः। स चतुर्विधः सवितर्कादिभेदात्। समाधिर्नामभावना, सा च भाव्यस्य विषयान्तरपरिहारेण चेतसि पुनः पुनर्निवेशनं भाव्यञ्च द्विविधम् ईश्वरस्तत्त्वानि च। तान्यपि द्विविधानि जडाजडभेदात्। जडानि प्रकृतिमहदहंकारादीनि चतुर्विंशतिः अजडः पुरुषः ॥ २७ ॥

समाधि दोप्रकारकी है, सम्प्रज्ञात और असम्प्रज्ञात। उनमें, एकाग्र चित्त होनेमें प्रमाणादि वृत्तिविशिष्ट बाह्यविषयोंका निरोधको सम्प्रज्ञात समाधि कहते हैं। इसमें प्रकृतिकी विविक्ततावशतः चित्तको सम्यक्रूपसे जाना जाता है, इसप्रकार, व्युत्पत्तिमें इसका नाम 'सम्प्रज्ञात' है। यह सम्प्रज्ञात समाधि सवितर्कादि भेदसे चारप्रकारकी है। समाधि शब्दसे भावना है। विषयान्तर परिहारद्वारा चित्तमें जिस भावका पुनः पुनः निवेशन होता है उसका नाम 'भावना' है, भाव्य दो प्रकारका है ईश्वर और तत्त्वसमूह। तत्त्वसमूहभी और दो प्रकारका जड और अजड। उनमे प्रकृति और अहङ्कारादि २४ तत्व जड़शब्द वाच्य हैं। और ईश्वरको अजड़ वा चैतन्य कहते हैं ॥ २७ ॥

तत्र यदा पृथिव्यादीनि स्थूलानि विषयत्वेनादाय पूर्वापरानुसन्धानेन शब्दार्थोल्लेखसम्भेदेन भावना प्रवर्त्तते स समाधिः सवितर्कः, यदा तन्मात्रान्तःकरणलक्षणं सूक्ष्मं विषयमालम्ब्य देशाद्यवच्छेदेन भावना प्रवर्त्तते तदा सविचारः, यदा रजस्तमोलेशानुविद्धं चित्तं भाव्यते तदा सुखप्रकाशं यस्य सत्त्वस्योद्रेकात् सानन्दः, यदा रजस्तमोलेशानभिभूतं शुद्धं सत्त्वमालम्बनी-

कृत्य या प्रवर्त्तते भावना तदा तस्यां सत्त्वस्य न्यग्भावाच्चितिशक्तेरुद्रेकाच्च सत्त्वमात्रावशेषत्वेन सास्मितः समाधिः वितर्कविचारानन्दास्मितारूपानुगमात् सम्प्रज्ञात इति सर्ववृत्तिनिरोधे त्वसम्प्रज्ञातः समाधिः ॥ ३८ ॥

उनमें जिसमें पृथिवी प्रभृति स्थूलतत्त्व सबको विषयरूपसे ग्रहण करके, पूर्व्वापरानुसन्धान और शब्दार्थोल्लेख सम्भेदके सहारेसे भावना प्रवर्त्तित होती है, उस समाधिका नाम सवितर्क है । और जिसमें तन्मात्रान्तःकारणरूप सूक्ष्मविषयको अवलम्बन कर, देशादिके अवच्छेदानुसार भावना प्रवृत्त होती है, उसका नाम सविचार समाधिहै । इसप्रकार जिस अवस्थामें रजः और तमोलेशानुविद्ध चित्तभावित होतीहै, एवं जिस सत्त्वके उद्रेक वशतः सुखप्रकाश होताहै उसका नाम सानन्दसमाधि है । जिस अवस्थामें रजः और तमोलेशका अनभिभूत शुद्ध सत्त्व अवलम्बन करके, भावना प्रवृत्त हो उसका नाम सास्मिता समाधि है इसप्रकार भावना प्रसंगसे सत्त्वगुणका न्यग्भाव और चितिशक्तिका उद्रेकवशतः सत्त्वमात्र अवशिष्ट होता है । उक्तप्रकार वितर्क, विचार, आनन्द और अस्मिता रूपका अनुगमवशतः सम्प्रज्ञात समाधि कहते हैं । और, सब वृत्तियोंके निरोधमें असम्प्रज्ञात समाधि कहते हैं ॥ ३८ ॥

ननु सर्ववृत्तिनिरोधो योग इत्युक्ते सम्प्रज्ञाते व्याप्तिर्न स्यात् तत्र सत्त्वप्रधानायाः सत्त्वपुरुषान्यताख्यातिलक्षणाया वृत्तेरनिरोधादिति चेत्तदेतद्वार्त्तं क्लेशकर्मविपाकाशयपरिपन्थिचित्तवृत्तिनिरोधो योग इत्यङ्गीकारात् । क्लेशाः पुनः पञ्चधा प्रसिद्धाः अविद्यास्मितारागद्वेषाभिनिवेशाः ॥ ३९ ॥

सब वृत्तियोंके निरोधका नाम योग है ऐसा कहनेसे सम्प्रज्ञात व्याप्ति दोष नहीं घटता । क्योंकि, उस अवस्थामें सत्त्वप्रधान सत्त्वपुरुषान्यताख्यातिरूपिणी वृत्तिका नाम निरोध नहीं होता । यह बात सर्वथा संगत है । इसका कारण यह है जो, क्लेश, कर्म्म, विपाक, आशय, इन सबके शत्रु चित्तवृत्तिके निरोधका नाम योग है, इसप्रकार अंगीकृत हुआहै, क्लेश पांच प्रकारका है अविद्या, अस्मिता, राग, द्वेष, और अभिनिवेश ॥ ३९ ॥

नन्वविद्येत्यत्र किमाश्रीयते पूर्वपदार्थप्राधान्यम् अमक्षिकं वर्तत इतिवत् उत्तरपदार्थप्राधान्यं वा राजपुरुष इतिवत् अन्यपदार्थप्राधान्यं वा अमक्षिको देश इतिवत् । तत्र न पूर्वः

पूर्वपदार्थप्रधानत्वे अविद्यायां प्रसज्यप्रतिषेधोपपत्तौ क्लेशादि कारकत्वानुपपत्तेः अविद्याशब्दस्य स्त्रीलिंगत्वाभावापत्तेश्च, न द्वितीयः कस्यचिदभावेन विशिष्टाया विद्यायाः क्लेशादि परिपन्थित्वेन तद्बीजत्वानुपपत्तेः, न तृतीयः नञोऽस्त्यर्थानां बहुव्रीहिर्वा चोत्तरपदलोप इति वृत्तिकारवचनानुसारेण अविद्यमाना विद्या यस्या सा अविद्या बुद्धिरिति समाधिसिद्धौ तस्या अविद्यायाः क्लेशादिबीजत्वानुपपत्तेः विवेकख्यातिपूर्वक-सर्ववृत्तिसम्पन्नायास्तस्यास्तथात्वाप्रसङ्गाच्च । उक्तञ्च, अस्मितादीनां क्लेशानामविद्यानिदानत्वम् । अविद्याक्षेत्रत्वमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदारणमिति । तत्र प्रसुप्तत्वं प्रबोधसहकार्य्यभावेनानभिव्यक्तिः तनुत्वं प्रतिपक्षभावनया शिथिलीकरणाविच्छिन्नत्वबलवता क्लेशेनाभिभवः उदारत्वं सहकारिसन्निधिवशात् कार्य्यकारित्वम्।तदुक्तं वाचस्पतिमिश्रेण व्यासभाष्यव्याख्यायाम्

प्रसुप्तास्तत्त्वलीनानां तनुदग्धाश्च योगिनाम् ।

विच्छिन्नोदाररूपाश्च क्लेशा विषयसङ्गिनामिति ॥ ४० ॥

यदि कहो कि, यहां अविद्या शब्दसे किस प्रकार अर्थ जानना चाहिये, अमक्षिक रूपसे वर्त्तमान, इत्यादि तुल्य पूर्वपदार्थभावान्य, या राज पुरुष, इत्यादि तुल्य उत्तरपदपदार्थ

विच्छिन्नत्व शब्दसे बलवत् क्लेश करनेको अभिभव एवं उदारत्व शब्दसे सहकारिके सान्निध्यवशात् कार्य्यकारित्व है । वाचस्पतिमिश्रनेभी व्यासभाष्यकी व्याख्यामें इसीप्रकार कहा है ॥ ४० ॥

द्वन्द्ववत् स्वतन्त्रपदार्थद्वयानवगमादुभयपदार्थप्रधानत्वं नाशङ्कितम् । तस्मात् पक्षद्वयेऽपि क्लेशादिनिदानत्वमविद्यायाः प्रसिद्धं हीयेतेति चेत् तदपि न शोभनं विभाति पर्य्युदासशक्तिमाश्रित्याविद्याशब्देन विद्याविरुद्धस्य विपर्य्ययज्ञानस्याभिधानमिति वृद्धैरंगीकारात् ।

तदाह—

नामधात्वर्थयोगे तु नैव नञ् प्रतिषेधकः ।
वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनाविति ॥
वृद्धप्रयोगगम्या हि शब्दार्थाः सर्व एव नः ।
तेन यत्र प्रयुक्तो यो न तस्मादपनीयत इति च ॥ ४१ ॥

द्वन्द्ववत् स्वतन्त्र दोनों पदार्थोंकी अनवगतिसे उभयपदार्थप्रधानत्व आशङ्कित नहीं होता इसकारण दोनों पक्षहीमें अविद्याको क्लेशनिदानत्वका अपगम (त्याग) होता है । इस प्रकार मतवाद भी संगत नहीं होसकता । क्योंकि वृद्धोंने माना है कि पर्य्युदास शक्तिआश्रय करके, अविद्याशब्दद्वारा विद्या विरुद्ध विपर्यय ज्ञानका अभिधान होता है । उसीप्रकार कहा है, कि नामधात्वर्थ योगमें नञ् प्रतिषेधक नहीं होता । सब ही पदार्थ वृद्धप्रयोग गम्य है । तत्कर्तृक जिसमें जो प्रयुक्त होता है । उससे नहीं अपनीत होता ॥ ४१ ॥

वाचस्पतिमिश्रैरप्युक्तं लोकाधीनावधारणो हि शब्दार्थयोः सम्बन्धः लोके चोत्तरपदार्थप्रधानस्यापि नञ् उत्तरपदाभिधेयोपमर्दकस्य तद्विरुद्धतया तत्र तत्रोपलब्धेरिहापि तद्विरुद्धे प्रवृत्तिरिति । एतदेवाभिप्रेत्योक्तम् अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येति । अनात्मन्यात्मबुद्धिर्विपर्य्ययः इत्युक्तं भवति । तद्यथा अनित्ये घटादौ नित्यत्वाभिमानः अशुचौ काय्यादौ शुचित्वप्रत्ययः ॥ ४२ ॥

होताहै तद्विरुद्धताद्वारा उस २ स्थानमें उसकी उपलब्धिही इसका कारण है यहांभी उसके विरुद्धमें प्रवर्तना हुईहै, इत्यादि । इस प्रकार अभिप्रायही कहा है अनित्य, अशुचि, दुःख और अनात्मवस्तुमें नित्य, शुचि, सुख और आत्मख्यातिका नाम अविद्या है पुनः कहाहै अतत्वमें तत्वबुद्धिका नाम विपर्यय है जैसे अनित्य घटादिमें नित्यत्वका अभिमान, एवं अशुचि कार्यादिमें शुचित्व प्रत्यय ॥ ४२ ॥

स्थानाद्बीजादवष्टम्भान्निःष्पन्दान्निधनादपि ।
कायमाधेयशौचत्वात् पण्डिता ह्यशुचिं विदुरिति ॥

परिणामतापसंस्कारैर्गुणवृत्तिनिरोधाच्च दुःखमेव सर्वं विवेकिन इति न्यायेन दुःखे स्रक्चन्दनवनितादौ सुखत्वारोपः अनात्मनि देहादावात्मबुद्धिः ।

तदुक्तम्—

अनात्मनि च देहादावात्मबुद्धिस्तु देहिनाम् ।
अविद्या तत्कृतो बन्धस्तन्नाशे मोक्ष उच्यत इति ॥ ४३ ॥

परिणामतापसंस्कार द्वारा गुणवृत्तिका निरोधप्रयुक्त, विवेकपक्षमें सबही दुःख इत्यादि न्यायानुसार, माला, चन्द्रमा, नवनीत आदिरूप दुःखमें सुखत्वका आरोप और अनात्मदेहादिमें आत्मबुद्धि उपस्थित होती है । इसीप्रकार कहा है, अनात्मदेहादिमें देहिगणकी जो आत्मबुद्धि, उसका नाम अविद्या है । इस अविद्याद्वारा जो बंधन संघटन होता है । उसके नाशकोही मोक्ष कहते हैं ॥ ४३ ॥

एवमियमविद्या चतुष्पादा भवति । नन्वेतेष्वविद्याविशेषेषु किञ्चिदनुगतं सामान्यलक्षणं वर्णनीयम् अन्यथा विशेषस्यासिद्धेः ।

तथा चोक्तं भट्टाचार्यैः—

सामान्यलक्षणं त्यक्त्वा विशेषस्यैव लक्षणम् ।
न शक्यं केवलं वक्तुमेवमप्यस्य न वाच्यतेति ॥ ४४ ॥

इसप्रकार यह अविद्या चतुष्पादयुक्त होती है । उल्लिखित अविद्यासम्बन्ध चतुष्पादका कुछ सामान्य लक्षण वर्णन करना कर्तव्य है । सामान्यलक्षण वर्णन नहीं करनेसे, विशेषकी असिद्धि होती है । इसीप्रकार, भट्टाचार्यने कहा है, सामान्यलक्षण छोड़कर, विशेषका लक्षण केवल कहना उपयुक्त नहीं है ॥ ४४ ॥

तदपि न वाच्यमतस्मिंस्तद्बुद्धिरिति सामान्यलक्षणाभिधान-सम्भवात् ॥ ४५ ॥

यह बात नहीं कहसकते हो । क्योंकि, अवस्तुमें वस्तु बुद्धि, इत्यादि सामान्यलक्षण निर्देश करनेहीसे उसका उत्तर दियागया है ॥ ४५ ॥

सत्त्वपुरुषयोरहमस्मीत्येकताभिमानोऽस्मिता । तदप्युक्तं, दृक्-दर्शनशक्त्योरेकात्मत्वाभिमानोऽस्मितेति ॥ ४६ ॥

सत्व और पुरुष, इन दोनोंका 'अहमस्मि, अर्थात् मैं हूँ ऐसा एकता अभिमानको आस्मि-ता कहते हैं । इसीप्रकार, कहाहै, दृक् और दर्शनशक्ति, दोनोंके एकताभिमानका नाम अस्मिता है ॥ ४६ ॥

सुखाभिज्ञस्य सुखानुस्मृतिपूर्वकः सुखसाधनेषु तृष्णारूपो गर्द्धो रागः ॥ ४७ ॥

सुखाभिज्ञके सुखसाधनसमूहमें सुखानुस्मृतिपूर्वक तृष्णारूप गृध्नुताका नाम राग है ४७ ॥

दुःखज्ञस्य तदनुस्मृतिपुरःसरन्तत्साधनेषु निन्दा द्वेषः । तदुक्तं, सुखानुशयो रागः दुःखानुशयो द्वेष इति । किमत्रानुशयिशब्दे ताच्छील्यार्थे णिनिरिनिर्वा मत्वर्थो योऽभिमतः नाद्यः सुप्यजातौ णिनिस्ताच्छील्य इत्यत्र सुपीति वर्त्तमाने पुनः सुब्ग्रहणस्य उपसर्गनिवृत्त्यर्थत्वेन सोपसर्गाद्धातोर्णिनेरनुत्पत्तेः यथाकथञ्चि-दंगीकारेऽपि अचोऽञ्णितीति वृद्धिप्रसक्तावतिशाय्यादिपदवद-नुशायिपदस्य प्रयोगप्रसंगात् । न द्वितीयः ।

एकाक्षरात् कृतो जातेः सप्तम्याश्च न तौ स्मृताविति ।

तत्प्रतिषेधादत्र चानुशयशब्दस्याजन्तत्वेन कृदन्तत्वात् ।

तस्मादनुशयिशब्दो दुरुपपाद इति चेत् नैतद्भद्रं भावानवबो-धात् प्रायिकाभिप्रायमिदं वचनम् । अतएवोक्तं वृत्तिकारेण— इतिकरणो विवक्षार्थः सर्वत्राभिसम्बध्यत इति ।

तेन क्वचिद्भवति कार्य्यं कार्यिकस्तण्डुली तण्डुलिक इति ।

तथाच कृदन्तात् जातेश्च प्रतिषेधस्य प्रायिकत्वं अनुशयश-ब्दस्य कृदन्ततया इनेरुपपत्तिरिति सिद्धम् ॥ ४८ ॥

णिनि या इनि प्रत्यय करके, यह अनुशयी शब्द निष्पन्न हुआ है इसका उत्तर यहहै जो, ताच्छील्यार्थमें णिनि प्रत्यय होता नहीं क्योंकि. 'सुप्यजातौ णिनि ताच्छील्ये' इत्यादि सूत्रानुसार सुप् वर्त्तमानमें पुनः सुप् ग्रहण करनेसे उपसर्ग निवृत्त्यर्थत्व घटता है । इसलिये उपसर्गसहित धातुके उत्तर णिनिकी अनुत्पत्ति होती है । जिस किसीप्रकार अङ्गीकार करनेपरभी अचोऽञ्णिति इत्यादि सूत्रानुसार वृद्धिप्रसक्ति घटती है । उसमें अतिशायी प्रभृति पदकी नाई अनुशयि पदका प्रयोग प्रसंग उपस्थित होता है । द्वितीयपक्षभी सङ्गत नहीं । क्योंकि अनुशय शब्द अजन्त कहकर कृदन्त है । तब अनुशयि शब्द साधन करना दुःसाध्य है । इसप्रकार समझनाभी प्रशस्तकल्प नहीं । क्योंकि, भावके अनवरोधवशतः यह वचन प्रायिकाभिप्राय है । इसीकारण वृत्तिकारने कहा है कि इतिकरण विवक्षार्थका सर्वत्रही सम्बन्ध है । वृत्तिकारके इस वचनके अनुसार कहीं कार्य्यीस्थलमें कार्यिक, एवं तण्डुली स्थलमें तण्डुलिक होता है इत्यादि नियम से अनुशयि शब्द कृदन्त कहकर इनिप्रत्ययकी उपपत्ति सिद्ध हुई ॥ ४८ ॥

पूर्वजन्मानुभूतमरणदुःखानुभववासनाबलात् सर्वस्य प्राणभृन्मात्रस्याकृमेरा च विदुषः सञ्जायमानः शरीरविषयादेर्मम वियोगो मा भूदिति प्रत्यहं निमित्तं विना प्रवर्त्तमानो भयरूपोऽभिनिवेशः पञ्चमः क्लेशः । मा च भूवं हि भूयासमिति प्रार्थनायाः प्रत्यात्मप्रनुभवसिद्धत्वात् । तदाह स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेश इति । ते चाविद्यादयः पञ्च सांसारिकविविधदुःखोपहारहेतुत्वेन पुरुषं क्लिश्नन्तीति क्लेशाः प्रसिद्धाः ॥ ४९ ॥

पूर्वजन्मानुभूत मरणदुःखका अनुभव वासनाबलसे कृमिसे विद्वान् पर्य्यन्त प्रत्येक प्राणीहीका प्रतिदिन विना निमित्त भी, मेरा शरीरविषयादिका जिससे वियोग न हो, इसप्रकार प्रवर्त्तमान भयरूप 'अभिनिवेश' उत्पन्न होता है । यही पांचवां क्लेश है । उक्तप्रकार प्रार्थना प्रत्येक आत्मामेही अनुभव सिद्ध है । ये अविद्या आदि पांचपदार्थ सांसारिक अनेक प्रकार दुःखोपहारका कारण कहकर पुरुषको क्लेश देता है; इसीकारण क्लेश शब्दसे प्रसिद्ध है ॥ ४९ ॥

कर्माणि विहितप्रतिषिद्धरूपाणि ज्योतिष्टोमब्रह्महत्यादीनि विपाकाः कर्मफलानि जात्यायुर्भोगाः आफलविपाकाच्चित्तभूमौ शेरत इत्याशयाः धर्माधर्मसंस्काराः तत्परिपन्थिचित्तवृत्तिनिरोधो योगः निरोधो नाभावमात्रमभिमतं तस्य तुच्छत्वेन भावरूपसंस्काराजननत्वासम्भवात् किन्तु तदाश्रयो मधुमतीमधु-

प्रतीकाविशोकासंस्कारशेषताव्यपदेश्यः चित्तस्यावस्थाविशेषः निरुध्यन्तेऽस्मिन् प्रमाणाद्याश्चित्तवृत्तय इति व्युत्पत्तेरुपपत्तेः॥५०॥

कर्म्म शब्दसे विहित और प्रतिषिद्ध स्वरूप जैसे, ज्योतिष्टोम और ब्रह्महत्या आदि विपाक शब्दसे कर्म्मफल। जैसे, जाति और आयुर्भोग। फलविपाक पर्य्यन्त चित्तभूमिमें शयन अर्थात् अवस्थिति करता है, इस अर्थमें आशय है। जैसे, धर्म्माधर्म्म संस्कार इनका प्रतिकूल चित्तवृत्ति समूहके निरोधको योग कहते हैं। निरोधशब्दसे अभाव मात्र अभिमत नहीं। क्योंकि, वह तुच्छ कहकर, चित्तभावरूप संस्कार जननमें उसका क्षमत्व सम्भव नहीं होता। किन्तु मधुमती प्रभृति नामक अवस्था विशेष उसके आश्रित हैं। क्योंकि प्रमाण आदि चित्तवृत्तिसमूह इसमें निरुद्ध होता है इसप्रकार व्युत्पत्तिकी उपपत्तिही इसका हेतु५०

अभ्यासवैराग्याभ्यां वृत्तिनिरोधः तत्र स्थितौ यत्नोऽभ्यासः। प्रकाशप्रवृत्तिरूपवृत्तिरहितस्य चित्तस्य स्वरूपनिष्ठः परिणामविशेषः स्थितिः। तन्निमित्तीकृत्य यत्नः पुनः पुनस्तथात्वेन चेतसि निवेशनमभ्यासः। चर्मणि द्वीपिनं हन्तीतिवन्निमित्तार्थेयं सप्तमीत्युक्तं भवति॥५१॥

अभ्यास और वैराग्य, इन दो उपायोंसे वृत्तियोंका निरोध होता है उनमें स्थित यत्नका नाम अभ्यास है। प्रकाशप्रवृत्तिरूपवृत्ति रहित चित्तके स्वरूप निष्ठ परिणाम विशेषका नाम स्थिति है। इसको निमित्त करके यत्न अर्थात् पुनः पुनः उस अवस्थामें चित्तमें निवेशनका नाम अभ्यास है। यहां चर्म्मणि अर्थात् चर्म्मके लिये द्वीपिका मारना इत्यादि तुल्य निमित्तार्थमें सप्तमी विभक्ति इसप्रकार कहा गया है॥ ५१॥

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्। ऐहिकपारत्रिकविषयादौ दोषदर्शनान्निरभिलाषस्य ममैते विषया वश्याः नाहमेतेषां वश्य इति विमर्शो वैराग्यमित्युक्तं भवति॥५२॥

दृष्टानुश्रविक विषयमें तृष्णारहितका वशीकार संज्ञाका नाम वैराग्य है। ऐहिक पारलौकिक विषयादिमें दोषदर्शनवशतः अभिलाषाशून्य पुरुष, ये सब विषय मेरे वश्य हैं मैं जिससे इनके वशीभूत न होऊं, इसप्रकार जो विमर्श करता है उसीको वैराग्य कहते हैं ५२

समाधिपरिपन्थिक्लेशतनूकरणार्थं समाधिलाभार्थञ्च प्रथमं क्रियायोगविधानपरेण योगिना भवितव्यं क्रियायोगसम्पादने अभ्यासवैराग्ययोः सम्भवात्। तदुक्तं भगवता—

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते इति ॥ ५३ ॥

समाधिके प्रतिकूल क्लेशोंका तनू छोटा करना और समाधिलाभ इन दोनों प्रकारके व्यापार विधानके लिये योगी व्यक्ति पहिले क्रियायोग विधानमें तत्पर होंगे । क्योंकि क्रियायोग सम्पादनमें अभ्यास और वैराग्य दोनोंहीका सम्भव होता है । भगवान्ने सो कहा है। जैसे योगारोहणमें अभिलाषी मुनिका कर्म्मही कारणरूपसे कथित होता है। एवं योगमें आरूढ़ होनेपर शमही कारणस्वरूप परिगणित होता है ॥ ५३ ॥

क्रियायोगश्चोपदिष्टः पतञ्जलिना–तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोग इति । तपःस्वरूपं निरूपितं याज्ञवल्क्येन ।
विधिनोक्तेन मार्गेण कृच्छ्रचान्द्रायणादिभिः ।
शरीरशोषणं प्राहुस्तपसां तप उत्तममिति ॥ ५४ ॥

पतञ्जलिने क्रियायोग उपदेश कियाहै। जैसे तपः स्वाध्यायान्त ईश्वर प्रणिधान इन सबका नाम क्रियायोग है । याज्ञवल्क्यने तपस्याका स्वरूप निरूपण किया है । जैसे विधि विहित मार्गानुसार कृच्छ्र चान्द्रायण अनुष्ठानपूर्वक शरीरके शोषण करनेको तपोंमें श्रेष्ठ तप कहा है ॥ ५४ ॥

प्रणवगायत्रीप्रभृतीनामध्ययनं स्वाध्याय इति । ते च मन्त्रा द्विविधाः वैदिकास्तान्त्रिकाश्च । वैदिकाश्च द्विविधाः प्रगीता अप्रगीताश्च । तत्र प्रगीताः सामानि, अप्रगीताश्च द्विविधाः छन्दोबद्धास्तद्विलक्षणाश्च । तत्र प्रथमा ऋचः द्वितीया यजूंषि। तदुक्तं जैमिनिना–तेषामृग् यत्रार्थवशेन पादव्यवस्था गीतिषु सामाख्या शेषे यजुःशब्द इति ॥ ५५ ॥

प्रणवगायत्री प्रभृतिके अध्ययनको स्वाध्याय कहते हैं। ये सब मंत्र दो प्रकारकेहैं. वैदिक और तान्त्रिक, वैदिकमन्त्र और भी दो प्रकारके हैं प्रगीत और अप्रगीत इनमें साम मन्त्रको प्रगीत कहते हैं । अप्रगीत मन्त्र दो प्रकारके छन्दोबद्ध तद्विलक्षण इनमें ऋक् सब छन्दोबद्ध और यजु, सब इनसे विलक्षण हैं ॥ ५५ ॥

तन्त्रेषु कामिकवातुलनपञ्चरात्रागमेषु ये ये वर्णितास्ते तान्त्रिकाः ॥ ते पुनर्मन्त्रास्त्रिविधाः स्त्रीपुंनपुंसकभेदात्तत्राह–
स्त्रीपुंनपुंसकत्वेन त्रिविधा मन्त्रजातयः ।

स्त्रीमन्त्रा वह्निजायान्ता नमोऽन्ताः स्युर्नपुंसकाः ।
शेषाः पुमांसस्ते शस्ताः सिद्धा वश्यादिकर्मणीति ॥ ५६ ॥

तन्त्र सब अर्थात् कामिक कारण मपश्चादिआगम समूहमें जो जो मन्त्र वर्णित हुआ है, उसका नाम तान्त्रिक है । तान्त्रिक मन्त्र सब तीन प्रकारका । जैसे, स्त्रीमन्त्र, पुंमन्त्र और नपुंसकमंत्र हैं उनमें स्वाहान्तमन्त्रोंको स्त्रीमन्त्र, नमोन्त मन्त्रोंको नपुंसकमंत्र एवं अवशिष्ट मंत्रोंको पुंमन्त्र कहते हैं । वश्य आदि कार्य्यमें पुंमन्त्र सब प्रशस्त हैं । ये सब मन्त्रही सिद्ध हैं ॥ ५६ ॥

स्नापनादिसंस्काराभावेऽपि निरस्तसमस्तदोषत्वेन सिद्धिहेतुत्वात् सिद्धत्वम् । स च संस्कारो दशविधः कथितः शारदातिलके ॥ ५७ ॥

स्नापनादि संस्कारके अभावमें भी सब दोष विनर्जित और इसकारण सिद्धिका हेतु होता है । इसकारण सिद्ध उल्लिखित संस्कार दश प्रकारका है । शारदा तिलकमें से कहा है । जैसे ॥ ५७ ॥

मन्त्राणां दश कथ्यन्ते संस्काराः सिद्धिदायिनः ।
निर्दोषतां प्रयान्त्याशु ते मन्त्राः साधु संस्कृताः ॥ ५८ ॥

मन्त्र सब दशप्रकारका संस्कार कहा गया है उस २ संस्कार मात्रही सिद्धिसाधन करता है । मन्त्र सब सम्यग् विधानसे संस्कृत होनेपर, आशु निर्दोष होता है ॥ ५८ ॥

जननं जीवनञ्चैव ताडनं बोधनं तथा ।
अभिषेकोऽथ विमलीकरणाप्यायने पुनः ॥ ५९ ॥

जनन, जीवन, ताडन, बोधन, अभिषेक, विमलीकरण, आप्यायन हैं ॥ ५९ ॥

तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ॥ ६० ॥

तर्पण, दीपन, गुप्ति, ये दशमन्त्रसंस्कार हैं ॥ ६० ॥

मन्त्राणां मातृकावर्णादुद्धारो जननं स्मृतम् ।
प्रणवान्तरितान् कृत्वा मन्त्रवर्णान् जपेत सुधीः ॥ ६१ ॥

उनमें मातृकावर्णसे मन्त्र सबका उद्धार करनेको 'जनन' कहते हैं । आर्णीपुरुषको म... वर्ण सबको प्रणवान्तरितकरके जप करना चाहिये ॥ ६१ ॥

मन्त्रार्णसंख्यया तद्धि जीवनं संप्रचक्षते ।
मन्त्रवर्णान् समालिख्य ताडयच्चन्दनाम्भसा ॥ ६२ ॥

मन्त्रवर्णका संख्याक्रमसे जप करनेको जीवन कहते हैं । मन्त्रवर्ण सब सम्यक् रूपसे लिखकर चन्दनजलमें ताडित करना ॥ ६२ ॥

प्रत्येकं वायुबीजेन ताडनं तदुदाहृतम् ॥
विलिख्य मन्त्रवर्णांस्तु प्रसूनैः करवीरजैः ॥ ६३ ॥

प्रत्येक वर्णको वायुबीज सहायसे इसप्रकार ताडन करनेको ताडन कहते हैं । मन्त्रवर्ण सब विशेषरूपसे लिखकर जितने मंत्रवर्ण हों उतनेही कणेरके फूलोंसे ॥ ६३ ॥

मन्त्राक्षरेण संख्यातैर्हन्यात्तद्बोधनं मतम् ॥
स्वतन्त्रोक्तविधानेन मन्त्री मन्त्रार्णसंख्यया ॥ ६४ ॥

हननकरनेको बोधन कहते हैं । स्वतन्त्रोक्त प्रकारसे मन्त्रवर्ण संख्यानुसार परिगृहीत होना है ॥ ६४ ॥

अश्वत्थपल्लवैर्मन्त्रमभिषिञ्चेद्विशुद्धये ॥
सञ्चिन्त्य मनसा मन्त्रं ज्योतिर्मन्त्रेण निर्दहेत् ॥ ६५ ॥
मन्त्रे मलत्रयं मन्त्री विमलीकरणं हि तत् ॥
तारव्योमाग्निमनुयुक् ज्योतिर्मन्त्र उदाहृतः ॥ ६६ ॥

अश्वत्थ (पीपल) पत्रद्वारा विशुद्धिके निमित्त मंत्रको अभिषिक्त करना चाहिये, इसीका नाम अभिषेक है । मनहीमन विचारकर ज्योतिर्मंत्रसे तीनों मल निर्दहन करना चाहिये, इसीका नाम विमलीकरण है । जो 'तारव्योम' अग्निके युक्त उसका नाम ज्योतिर्मन्त्र है ॥ ६५ ॥ ६६ ॥

कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणं मनोः ।
वारिबीजेन विधिवदेतदाप्यायनं मतम् ॥ ६७ ॥

जप करके कुशोदकद्वारा मन्त्रके प्रत्येक वर्णको प्रोक्षित करना चाहिये । वारिबीजसे यथाविधि इसप्रकार करनेका नाम आप्यायन है ॥ ६७ ॥

मन्त्रेण वारिणा मन्त्रे तर्पणं तर्पणं स्मृतम् ॥
तारमायारमायोगो मनोर्दीपनमुच्यते ॥ ६८ ॥

मन्त्रोच्चारण करके जलद्वारा मन्त्रमें तर्पण करनेका नाम 'तर्पण' है मन्त्रसे तार माया और रमाबीज योग करनेका नाम 'दीपन' है ॥ ६८ ॥

जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम् ॥
संस्कारा दश मन्त्राणां सर्वतन्त्रेषु गोपिताः ॥ ६९ ॥

जप्यमान मन्त्रका गोपन करनेको अप्रकाशन कहते हैं। मन्त्रोंके ये १० संस्कार सब तन्त्रोंमें गोपित हुए हैं ॥ ६९ ॥

यत्कृत्वा सम्प्रदायेन मन्त्री वाञ्छितमश्नुते ॥
रुद्धकीलितविच्छिन्नसुप्तशप्तादयोऽपि च।
मन्त्रदोषाः प्रणश्यन्ति संस्कारैरेभिरुत्तमैरिति ॥ ७० ॥

सम्प्रदायानुसार इन सबका अनुष्ठान करनेसे, मन्त्री वाञ्छित फल भोग करता है। इन सब उत्कृष्टमन्त्रोंसे संस्कृत होनेपर, रुद्ध, कीलित (कीलकिया हुआ) विच्छिन्न, सुप्त और शप्तआदि मन्त्रदोष सब विनष्ट होते हैं ॥ ७० ॥

तदलमकाण्डताण्डवकल्पेन मन्त्रशास्त्ररहस्योद्घोषणेन ७१॥

अकाण्ड ताण्डवकी नाई अर्थात् अनवसर (बेवक्त) नाचकरानेकी नाई मन्त्रशास्त्रोंमें सबके रहस्य (छिपे हुए) भेदोंका अधिक प्रकटकरनेकी आवश्यकता नहीं ॥ ७१ ॥

ईश्वरप्रणिधानं नामाभिहितानामनभिहितानाञ्च सर्वासां क्रियाणां परमेश्वरे परमगुरौ फलानपेक्षया समर्पणम्।

अत्रेदमुक्तम्—
कामतोऽकामतो वापि यत्करोमि शुभाशुभम्।
तत्सर्वं त्वयि विन्यस्तं त्वत्प्रयुक्तः करोम्यहमिति ॥ ७२ ॥

निष्कामहोकर, अभिहित और अनभिहित सबही क्रियाओंको परमगुरु परमेश्वरके समर्पण करनेका नाम ईश्वर प्रणिधान है। यहां इससे कहा गया है कि, मैकामतः (इच्छासे) या अकामतः (विना इच्छा) शुभाशुभ जो करता हूं, सबको तुम्हारे अर्पण किया। निःकारण मैंने तुमसे प्रेरित होकर कियाहै ॥ ७२ ॥

क्रियाफलसन्न्यासोऽपि भक्तिविशेषापरपर्य्यायं प्रणिधानमेव फलाभिसन्धानेन कर्मकरणात् तथाच गीयते गीतासु भगवता।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणीति ॥ ७३ ॥

जिसका दूसरा नाम भक्तिविशेष है, क्रियाफल सन्यासभी वही प्रणिधानही [illegible] प्रसिद्ध है। और भगवानने स्वयं गीतामें कहा है, तुम्हें कर्म्ममें निश्चिये अधिकार है, कर्मफलमें कभी नहीं। तुम कर्म्मफलका कारणभूत न होओ ॥ ७३ ॥

फलाभिसन्धेरुपघातकत्वमभिहितं भगवद्भिर्नीलकण्ठभारतीश्रीचरणैः।

अपि प्रयत्नसम्पन्नं कामेनोपहतं तपः ।
न तुष्टये महेशस्य श्वलीढमिव पायसमिति ॥ ७४ ॥

भगवान् नीलकण्ठ भारती श्रीचरणनेभी फलाभिसन्धिका उपघातकत्व निर्देश किया है । जैसे प्रयत्नसम्पन्न तपस्याभी कामनासे नष्ट होनेपर, कुत्तेका चाटा, पायसकी नाईं महेश्वरकी तुष्टि सम्पादन नहीं करता ॥ ७४ ॥

सा च तपः स्वाध्यायेश्वरप्रणिधानात्मिका क्रिया योगसाधनत्वाद्योग इति ।शुद्धसारोपलक्षणावृत्त्याश्रयणेन निरूप्यते यथाऽऽयुर्घृतमिति । शुद्धसारोपलक्षणा नाम लक्षणाप्रभेदः मुख्यार्थबाधतद्योगाभ्यामर्थान्तरप्रतिपादनं लक्षणा । सा द्विविधा रूढिमूला प्रयोजनमूला च तदुक्तं काव्यप्रकाशे ।

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रियेति ॥७५॥

ये तप, स्वाध्याय और ईश्वर प्रणिधानरूप क्रियायोग साधन करता है, इसकारण योग नामसे कहागया है शुद्धसार उपलक्षणवृत्तिके अवलम्बन करके यह निरूपण किया गया है । शुद्धसारोपलक्षणाशब्दसे लक्षण प्रभेद मुख्यार्थका बाध और तद्योग, इन दोनोंकेद्वारा अर्थान्तर प्रतिपादन करनेका नाम लक्षणा यह लक्षणा दो प्रकारकी है जैसे रूढिमूला और प्रयोजनमूला काव्यप्रकाशमें भी इसप्रकार कहा है ॥ ७५ ॥

तच्छब्देन लक्ष्यत इत्याख्याते गुणीभूतं प्रतिपादनमात्रं परामृश्यते । सा लक्षणेति प्रतिनिर्दिश्यमानापेक्षया तच्छब्दस्य स्त्रीलिंगत्वोपपत्तिः तदुक्तं कैयटैः । निर्दिश्यमानप्रतिनिर्दिश्यमानयोरैक्यमापादयन्ति सर्वनामानि पर्य्यायेण तत्तल्लिंगमुपाददत इति ॥ ७६ ॥

तत् शब्दसे जो लक्ष्य कियाजाता है ऐसा कहनेसे गुणीभूत प्रतिपादनमात्र परामृष्ट होता है । सो लक्षणा इत्यादि निर्देशसे प्रतिनिर्दिश्यमानापेक्षामें तत् शब्दका स्त्रीलिंगत्व उपपन्न होता है। कैयटने भी कहा है, जैसे सर्वनाम शब्द निर्दिश्यमान और प्रतिनिर्दिश्यमान होनेसे एकता सम्पादित कर पर्य्यायक्रमसे तत्तल्लिंग समाहित करता है ॥ ७६ ॥

तत्र कर्मणि कुशल इत्यादिरूढिलक्षणाया उदाहरणं कुशान् लातीति व्युत्पत्त्या दर्भादानकर्त्तरि यौगिकं कुशलपदं विवेच-

कत्वसारूप्यात् प्रवीणे प्रवर्त्तमानम् अनादिवृद्धव्यवहारपरम्परानुपातित्वेनाभिधानवत् प्रयोजनमनपेक्ष्य प्रवर्त्तते । तदाह, निरूढालक्षणाः काश्चित् सामर्थ्यादभिधानवदिति ॥ ७७ ॥

उनमें कर्म्ममें कुशल इत्यादि रूढिलक्षणाका उदाहरण और कुशल शब्दका उत्तर ग्रहण शब्दार्थ ला धातु योगकरके कुशलशब्द निष्पन्न हुआ है। इसका अर्थ दर्भादान कर्त्ता है। इस दर्भादान कर्त्तामें यौगिक कुशल शब्द विवेचकत्व सारूप्यवशतः प्रवीणमें प्रवर्त्तमान रहा है एवं अनादि वृद्धि नहीं करके प्रचलित होता है । उसीप्रकार कहाहै, कोई २ निरूढा लक्षणा सामर्थ्यवशतः अभिधानकी नाईं ॥ ७७ ॥

तस्मात् रूढिलक्षणायाः प्रयोजनापेक्षा नास्ति । यद्यपि प्रयुक्तः शब्दः प्रथमे मुख्यार्थं प्रतिपादयति तेनार्थेनार्थान्तरं लक्ष्यत इति अर्थधर्मोऽयं लक्षणा तथापि तत्प्रतिपादके शब्दे समारोपितः सन् शब्दव्यापार इति व्यपदिश्यते । एतदेवाभिप्रेत्योक्तं लक्षणारोपिता क्रियेति ॥ ७८ ॥

उसीप्रकार, रूढिलक्षणाका प्रयोजनापेक्षा नहीं । यद्यपि प्रयुक्त शब्द पहिले मुख्यार्थ प्रतिपादन करता है, उसी अर्थद्वाराही अर्थान्तर लक्षित होता है, इसप्रकार अर्थधर्मही लक्षणा, तथापि, तत् प्रतिपादकशब्दसे शब्दव्यापार समारोपित होता है; इसप्रकार व्यपदिष्ट होता है । इसी अभिप्रायसे काव्यप्रकाशमें कहा है, " लक्षणारोपिता क्रिया " इत्यादि ॥ ७८ ॥

प्रयोजनलक्षणा तु षड्विधा उपादानलक्षणा लक्षणलक्षणा गौणसारोपा गौणसाध्यवसाना शुद्धसारोपा शुद्धसाध्यवसाना चेति । कुन्ताः प्रविशन्ति मञ्चाः क्रोशन्ति गौर्वाहीकः गौरयं आयुर्घृतं आयुरेवेदमिति यथाक्रममुदाहरणानि द्रष्टव्यानि ।

तदुक्तम्-

स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ।
सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा ।
विषय्यन्तः कृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ।
भेदाविमौ च सादृश्यात् सम्बन्धान्तरतस्तथा ।

गौणौ शुद्धौ च विज्ञेयौ लक्षणा तेन षड्विधेति ॥
तदलं काव्यमीमांसामर्मनिर्मन्थनेन ॥ ७९ ॥

प्रयोजनलक्षणा ६ प्रकारकी जैसे उपादान, लक्षण, गौण सारोपा, गौणसाध्यवसाना, एवं शुद्धसाध्यवसाना । यथाक्रमसे उदाहरण, जैसे, कुन्त सब प्रवेश करता है मञ्च सब क्रोशन करता है । गोवाहीक, यहगौ, इत्यादि । काव्यमीमांसाके मर्म्मके निर्मन्थसे और प्रयोजन नहीं ॥ ७९ ॥

स च योगो यमादिभेदवशादष्टांग इति निर्दिष्टः । तत्र यमा अहिंसादयः । तदाह पतञ्जलिः, अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमा इति । नियमाः शौचादयः । तदप्याह, शौचसन्तोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमा इति ॥ ८० ॥

यह योग यमादिभेदवशतः अष्टांग इसप्रकार निर्दिष्ट हुआ है. उनमें अहिंसा आदिका नाम यम है । पतञ्जलिने कहा है, अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य्य और अपरिग्रह, इनका नाम यम है, शौचादिका नाम नियम है. सोभी कहा है शौच, सन्तोष, तपः, स्वाध्याय, ईश्वरप्रणिधान, इनका नाम नियम है ॥ ८० ॥

एते च यमनियमा विष्णुपुराणे दर्शिताः—
ब्रह्मचर्य्यमहिंसा च सत्यास्तेयापरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां स्वं मनो नयन् ॥ ८१ ॥

विष्णुपुराणमें उल्लिखित यम नियम प्रदर्शित हुए हैं जैसे ब्रह्मचर्य्य, अहिंसा, सत्य, अस्तेय अपरिग्रह. ये यमनियम योगी निष्काम सेवन करे ॥ ८१ ॥

स्वाध्यायशौचसन्तोषतपांसि नियमात्मवान् ।
कुर्वीत ब्रह्मणि परं परस्मिन् प्रवणं मनः ॥ ८२ ॥

एवं नियमात्मवान् होकर स्वाध्याय, शौच, सन्तोष और तपस्या एवं परब्रह्म मनः संनिधान करे ॥ ८२ ॥

एते यमाः सनियमाः पञ्च पञ्च प्रकीर्तिताः ।
विशिष्टफलदाः कामे निष्कामानां विमुक्तिदा इति ॥ ८३ ॥

ये यम नियम पांच पांच कहे गये । ये निष्काम व्यक्तियोंके मुक्तिविधान और सकाम व्यक्तियोंके विशिष्ट फल उत्पन्न करते हैं ॥ ८३ ॥

स्थिरसुखमासनं पद्मासनभद्रासनवीरासनस्वस्तिकासनदण्डकासनसोपाश्रयपर्य्यंकक्रौंचनिषदनोष्ट्रनिषदनसमसंस्थासम्भेदाद्दशविधम् ।

> पादांगुष्ठौ निबध्नीयाद्धस्ताभ्यां व्युत्क्रमेण तु ।
> ऊर्वोरुपरि विप्रेन्द्र ! कृत्वा पादतले उभे ।
> पद्मासनं भवेदेतत् सर्वेषामभिपूजितम् ॥ ८४ ॥

पद्मासन, भद्रासन, वीरासन, स्वस्तिकासन, दण्डकासन, सोपाश्रय, पर्यंक, क्रौञ्चनिषदन एवं समसंस्थानभेदसे स्थिर सुखासन दश प्रकारका है उनमें हे विप्रेन्द्र ! दोनो हाथसे व्युत्क्रमानुसार दोनां पैरके अंगूठेसे निबद्ध और पादतल जांघके ऊपर रक्खे तो पद्मासन होगा इन सब आसनोंको सबही उत्तम समझते हैं ॥ ८४ ॥

इत्यादिना याज्ञवल्क्यः पद्मासनादिस्वरूपं निरूपितवान् तत्सर्वं तत एवावगन्तव्यम् । तस्मिन्नासनस्थैर्य्ये सति प्राणायामः प्रतिष्ठितो भवति । स च श्वासप्रश्वासयोर्गतिविच्छेदस्वरूपः । तत्र श्वासो नाम बाह्यस्य वायोरन्तरानयनम् । प्रश्वासः पुनःकोष्ठस्य बहिर्निःसारणम् । तयोरुभयोरपि सञ्चरणाभावः प्राणायामः॥८५॥

इत्यादि विधानसे याज्ञवल्क्यने पद्मासनआदिका स्वरूप निरूपण किया है । वे सबही उसीसे जाने जावेंगे इस आसनके स्थिर होनेपरही, प्राणायाम प्रतिष्ठित होता है । यह प्राणायाम श्वास और प्रश्वास शब्दसे कोष्ठवायुका बाहर निकालना है । इन दोनोंहीके सञ्चरणाभाव को प्राणायाम कहते हैं ॥ ८५ ॥

ननु नेदं प्राणायामसामान्यलक्षणं तद्विशेषेषु रेचकपूरककुम्भकप्रकारेषु तदनुगतेरयोगादिति चेन्नैष दोषः सर्वत्रापि श्वासप्रश्वासगतिविच्छेदसम्भवात् । तथाहि कोष्ठस्य वायोर्बहिर्निःसरणं रेचकः प्राणायामः प्रश्वासत्वेन प्रागुक्तः । बाह्यवायोरन्तर्धारणं पूरकः यः श्वासरूपः । अन्तःस्तम्भवृत्तिः कुम्भकः । यस्मिन् जलमिव कुम्भे निश्चलतया प्राणाख्यो वायुरवस्थाप्यते तत्र सर्वत्र श्वासप्रश्वासद्वयगतिविच्छेदोऽस्त्येवेति नास्ति शंकावकाशः। तदुक्तं तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायाम इति ॥ ८६ ॥

यदि कहो कि, यह प्राणायामका सामान्य लक्षण नहीं है, क्योंकि, प्राणायामका प्रकार भेदस्वरूप रेचक, पूरक, और कुम्भक है। उसके अनुगतिका अयोग होता है। इसका उत्तर यह है कि उसमें दोष नहीं है। इसकारण यह है कि सर्वत्रही श्वास प्रश्वासके गति विच्छेद सम्भव होता है उसीप्रकार, कोष्ठवायुके बाहर निकालनेको रेचक कहते हैं । पहिलेही यह बात प्रकारान्तरसे कही गयी है। जैसे प्राणायाम शब्दसे श्वास प्रश्वासके गतिविच्छेदक स्वरूप है। पुनः बाह्यवायुके अन्तर्द्धारणको पूरक कहते हैं । इस पूरकको श्वासरूप कहते हैं- और, अन्तः स्तम्भवृत्तिका नाम कुम्भक है। जिसमें घटमें जलकी नाईं प्राणाख्य वायु निश्चलता क्रमसे अवस्थापित होता है इसप्रकार सर्वत्रही श्वास प्रश्वास दोनोंके गतिविच्छेद लक्षित होता है। सुतरां शंकाका अवसर नहीं। उसीप्रकार कहा है, तो श्वास प्रश्वासका गतिविच्छेद प्राणायाम है ॥ ८६ ॥

स च वायुः सूर्य्योदयमारभ्य सार्द्धघटिकाद्वयं घटीयन्त्रस्थितघटभ्रमणन्यायेन एकैकस्यां नाड्यां भवति । एवं सत्यहर्निशं श्वासप्रश्वासयोःषट्शताधिकैकविंशतिसहस्राणि जायन्ते अतएवोक्तं मन्त्रसमर्पणरहस्यवेदिभिरजपामन्त्रसमर्पणे ॥ ८७ ॥

यह वायु सूर्योदयसे आरम्भ करके अढाई घड़ीमें घटीयन्त्र स्थित घटभ्रमणकी नाईं एक एक नाड़ीमें सञ्चरित होता है। इसप्रकार दिन रातमें २१६०० वार श्वास प्रश्वास चलता है । इसीकारण मन्त्रसमर्पण रहस्य वेदि सम्प्रदाय अजपा मन्त्रसमर्पण प्रसंगमें कहा है ॥ ८७ ॥

षट्शतानि गणेशाय षट्सहस्रं स्वयम्भुवे ।
विष्णवे षट्सहस्रञ्च षट्सहस्रं पिनाकिने ॥ ८८ ॥
सहस्रमेवं गुरवे सहस्रं परमात्मने ।
सहस्रमात्मने चैवमर्पयामि कृतं जपमिति ॥ ८९ ॥

मैं दिनरात्रिमें जपोंमेंसे ६०० गणेशको ६००० ब्रह्माको ६००० विष्णुको ६००० महादेवको १००० गुरुको १००० परमात्माको एवं १००० आत्म को अर्पण करता हूं॥ ८८॥ ८९॥

तथा नाडीसञ्चरणदशायां वायोः सञ्चरणे पृथिव्यादीनि तत्त्वानि वर्णविशेषवशात् पुरुषार्थाभिलाषुकैः पुरुषैरवगन्तव्यानि । तदुक्तमभियुक्तैः ।

सार्द्ध घटीद्वयं नाडीरेकैकार्कोदयात् वहेत् ।
अरघट्टघटीभ्रान्तिन्यायो नाड्योः पुनः पुनः ॥ ९० ॥

इसप्रकार पुरुषार्थकामुक पुरुषगण नाडी सञ्चरणदशामें वायुके सञ्चरणसमयमें पृथिवीआदि तत्त्वोंको सविशेषतया जानेंगे । पण्डितोंने सो कहा है, सूर्यके उदयसे प्रत्येक नाड़ी अढ़ाई घडी घटीभ्रमणकी नांई चलती है ॥ ९० ॥

शतानि तस्य जायन्ते निःश्वासोच्छ्वासयोर्नव ।
खखषड्द्विकैः संख्याहोरात्रे सकले पुनः ॥ ९१ ॥

दिनरातमें २१६०० वार श्वास प्रश्वास चलता है ॥ ९१ ॥

षट्त्रिंशद्गुणवर्णानां या वेला भणने भवेत् ।
सा वेला मरुतो नाड्यन्तरे सञ्चरतो भवेत् ॥ ९२ ॥

३६ छत्तीस गुणवर्णोंके उच्चारणमें जो समय लगता है उतने समयमें नाडीके अन्तरमें वायुका सञ्चार होता है ॥ ९२ ॥ ॥

प्रत्येकं पंचतत्त्वानि नाड्योश्च वहमानयोः ।
वहन्त्यहर्निशं तानि ज्ञातव्यानि यतात्मभिः ॥ ९३ ॥

वह मान दोनों नाडियोंमें प्रत्येक पांचतत्त्व अहर्निश प्रवाहित होता है यतात्माओंको यह जानना आवश्यक है ॥ ९३ ॥

ऊर्ध्वं वह्निरधस्तोयं तिरश्चीनः समीरणः ।
भूमिमर्द्धपुटे व्योम सर्वगं प्रवहेत् पुनः ॥ ९४ ॥

उनमे अग्नि ऊपरको जल नीचेको वायु टेढा क्रमसे भूमि आधेपुटमें एवं आकाश सर्व वहता है ॥ ९४ ॥

वायोर्वह्नेरपां पृथ्व्या व्योम्नस्तत्त्वं वहेत् क्रमात् ।
वहन्त्योरुभयोर्नाड्योर्ज्ञातव्योऽयं यथाक्रमम् ॥ ९५ ॥

वायु वह्नि जल पृथ्वी और आकाश इन सबका तत्त्व यथाक्रमसे वहमान दोनों नाडियोंमें प्रवाहित होताहै । यह जानना परम कर्त्तव्यहै ॥ ९५ ॥

पृथ्व्याः पलानि पञ्चाशच्चत्वारिंशत् तथाम्भसः ।
अग्नेस्त्रिंशत् पुनर्वायोर्विंशतिर्नभसो दश ॥ ९६ ॥

उनमें पृथिवी तत्त्व ५० पल, जलतत्त्व ४० चालीस, अग्नितत्त्व ३० तीस, वायुतत्त्व २० एवं आकाशतत्त्व दशपल चलता है ॥ ९६ ॥

प्रवाहकालसंख्येयं हेतुर्निह्नुलयोरथ ।
पृथ्वी पञ्चगुणा तोयं चतुर्गुणमथानलः ॥ ९७ ॥

यहाँ महाहकाशकी संख्या है । पृथिवीके पांच गुण, जलके ४ गुण, अग्निके ॥ ९७ ॥

त्रिगुणो द्विगुणो वायुर्वियदेकगुणं भवेत् ।
गुणं प्रति दशपलान्युर्व्यां पञ्चाशदित्यतः ॥ ९८ ॥

तीन गुण, वायुके दो गुण एवं आकाशके एकमात्र गुण । गुणके प्रतिदशपल । इसलिये पृथिवीका ५० पञ्चाशत पल निर्दिष्ट हुआ है ॥ ९८ ॥

एकैकहानिस्तोयादेस्तथा पञ्च गुणाः क्षितेः ।
गन्धो रसश्च रूपञ्च स्पर्शः शब्दः क्रमादमी ॥ ९९ ॥

गन्ध, रस, रूप, स्पर्श, शब्द यथाक्रमसे इन सबका गुण है । उनमें पृथिवीका पांचगुण । जलआदिका एक एक गुण है ॥ ९९ ॥

तत्त्वाभ्यां भूजलाभ्यां स्यात् शान्तिकार्ये फलोन्नतिः ।
दीप्ता स्थिरादिका कृत्ये तेजो वाय्वम्बरेषु च ॥ १०० ॥

पृथिवीतत्त्व और जलतत्त्व इन दोनों तत्त्वद्वारा शान्तिकार्यमें फलोन्नति होती है ॥१००॥

पृथ्व्यप्तेजोमरुद्व्योमतत्त्वानां चिह्नमुच्यते ।
आद्ये स्थैर्यं स्वचित्तस्य शैत्ये कामोद्भवो भवेत् ॥ १०१ ॥

उक्त पृथिवीआदि पांचतत्त्वका चिह्न उल्लिखित होता है । पहिले अपने चित्तकी स्थिरता, शैत्य कामोद्भव ॥ १०१ ॥

तृतीये कोपसन्तापौ चतुर्थे चञ्चलात्मता ।
पञ्चमे शून्यतैव स्यादथवा धर्मवासना ॥ १०२ ॥

तृतीयमें कोप और सन्ताप, चतुर्थमें चञ्चलात्मता एवं पञ्चममें शून्यता या धर्मवासना होती है ॥ १०२ ॥

श्रुत्योरङ्गुष्ठौ मध्यांगुल्यौ नासापुटद्वये ।
सृक्कणोः प्रान्तकोपान्त्यांगुली शेषे दृगन्तयोः ॥ १०३ ॥

[illegible], दोनों नासापुट, दोनों सृक्कणि (दोनों [illegible]) [illegible] हैं ॥ १०३ ॥

न्यस्यान्तर्भूपृथिव्यादितत्त्वज्ञानं भवेत् क्रमात् ।
पीतश्वेतारुणश्यामैर्बिन्दुभिर्निरुपाधि खम् इत्यादिना ॥ १०४ ॥

[illegible], [illegible] पृथिवीआदि तत्त्वका ज्ञान होता है ॥ १०४ ॥

यथावद्वायुतत्त्वमवगम्य तन्नियमने विधीयमाने विवेकज्ञानावरणकर्मक्षयो भवति। तपो न परं प्राणायामादिति।

दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः।

प्राणायामैस्तु दह्यन्ते तद्वदिन्द्रियपन्नगा इति च ॥ १०५ ॥

यथावत् वायुतत्व अवगत होकर, उसके नियमन करनेपर, विवेकज्ञानका आवरण कर्म्म का क्षय (नाश) होता है। प्राणायामकी अपेक्षा उत्कृष्ट तपस्या नहीं। धातुओंके जलानेपर उनका मल जैसे न्यून होजाता वा नष्ट होजाता है उसीप्रकार प्राणायामद्वारा इन्द्रिय पन्नग (सर्प) सब दग्ध होते हैं ॥ १०५ ॥

तदेवं यमादिभिः संस्कृतमनस्कस्य योगिनः संयमप्रत्याहारः कर्त्तव्यः। चक्षुरादीनामिन्द्रियाणां प्रतिनियतरञ्जनीयकोपनीयमोहनीयप्रवणत्वप्रहाणेनाविकृतस्वरूपप्रवणचित्तानुकारः प्रत्याहारः इन्द्रियाणि विषयेभ्यः प्रतीपमाह्रियन्तेऽस्मिन्निति- व्युत्पत्तेः ॥ १०६ ॥

अतएव उक्तप्रकार, यम नियमादिद्वारा मन संस्कृत होनेपर योगीपुरुष, संयम प्रत्याहारमें प्रवृत्त होवें। उनमें, चक्षुआदि इन्द्रिय सबका प्रतिनियत रञ्जनीय कोपनीय और मोहनीय प्रवणताका परिहाणकेद्वारा अविकृतस्वरूप प्रवणचित्तका अनुकार करनेका नाम प्रत्याहार है। इन्द्रिय आदिकको विषय प्रतीप क्रमसे आहरण किया जाता है इसमें इसकारण इसका नाम प्रत्याहार है। यही प्रत्याहारकी व्युत्पत्ति है ॥ १०६ ॥

ननु तदा चित्तमभिनिविशते नेन्द्रियाणि तेषां बाह्यविषयत्वेन तत्र सामर्थ्याभावादतः कथं चित्तानुकारः अद्धा अतएव वस्तुतस्तस्यासम्भवमभिसन्धाय सादृश्यार्थमिव शब्दप्रकारं सूत्रकारः स्वविषयासम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहार इति ॥ १०७ ॥

सादृश्यञ्च चित्तानुकारनिमित्तं विषयासम्प्रयोगः । यदा चित्तं निरुध्यते तदा चक्षुरादीनां निरोधे प्रयत्नान्तरं नापेक्षणीयं यथा मधुकरराजं मधुमक्षिका अनुवर्त्तन्ते तथेन्द्रियाणि चित्तमिति । तदुक्तं विष्णुपुराणे ।

शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् ।
कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायण इति ॥ १०८ ॥

जब चित्तका निरोध किया जाता है. उसीसमय चक्षु आदिके निरोधके लिये प्रयत्नान्तर की अपेक्षा नहीं करनी पडती अर्थात चित्तके निरोध होनेपर सबही निरुद्ध होजाते एवं एकाग्रता होजाती है । इसका दृष्टान्त जैसे मधुमक्षिकागण मधुकरराज (रानी मक्षिका) के अनुवर्ती होती हैं. इन्द्रियभी इसीप्रकार चित्तका अनुकरण वा अनुवर्त्तन करती हैं । विष्णुपुराणमें सो लिखा है । जैसे, योगवित पुरुष प्रत्याहार परायण होकर, शब्दादि विषयसमूहमें अनुरक्त इन्द्रियादिकको निगृहीत करके, चित्तका अनुकारी करे ॥ १०८ ॥

वश्यता परमा तेन जायतेऽतिचलात्मनः ।
इन्द्रियाणामवश्यैस्तैर्योगी योगस्य साधक इति च ॥

नाभिचक्रहृदयपुण्डरीकनाडचग्रादावाध्यात्मिके हिरण्यगर्भवासवप्रजापतिप्रभृतिके बाह्ये वा देशे चित्तस्य विषयान्तरपरिहारेण स्थिरीकरणं धारणा । तदाह देशबन्धश्चित्तस्य धारणेति । पौराणिकाश्च-

प्राणायामेन पवनं प्रत्याहारेण चेन्द्रियम् ।
वशीकृत्य ततः कुर्य्याच्चित्तस्थानं शुभाश्रयमिति ॥ १०९ ॥

तस्मिन् देशे ध्येयावलम्बनस्य प्रत्ययस्य विसदृशप्रत्ययप्रहाणेन प्रवाहो ध्यानम् । तदुक्तं, तत्र प्रत्ययैकतानता ध्यानमिति ।

अन्यैरप्युक्तम्—

तद्रूपप्रत्ययैकाग्र्या सन्ततिश्चान्यनिस्पृहा ।
तद्ध्यानं प्रथमैरंगैः षड्भिर्निष्पाद्यते तथेति ॥ ११० ॥

उल्लिखित देशमें ध्यानावलम्बन प्रत्ययका विसदृशप्रत्यय प्रहाणद्वारा प्रवाहका नाम ध्यान है। सो कहा है, जैसे, वहां प्रत्ययके एकताननताको ध्यान कहते हैं। अन्यलोगभी कहते हैं, जो इसप्रकार प्रत्ययैकाग्र्य एवं जिसमें विषयान्तरकी स्पृहा नहीं, तादृश सन्ततिकोही ध्यान कहते हैं। प्रथम ६ प्रकार अंगद्वारा सो निष्पादित होता है ॥ ११० ॥

प्रसंगाच्चरममंगं प्रागेव प्रात्यपीपदामः ।

तदनेन योगांगानुष्ठानेनादरनैरन्तर्यदीर्घकालासेवितेन समाधिप्रतिपक्षक्लेशप्रक्षयेऽभ्यासवैराग्यवशान्मधुमत्यादिसमाधिलाभो भवति ॥ १११ ॥

प्रसङ्गक्रमसे चरम अङ्ग पूर्वहीमें प्रतिपादित हुआ है। इसप्रकार आदरनैरन्तर्यसे दीर्घकाल सेवित योगानुष्ठानद्वारा समाधिका प्रतिपक्षक्लेश समूहके प्रक्षय होनेसे अभ्यास वैराग्यवशतः मधुमती आदि समाधिलाभ होती है ॥ १११ ॥

अथ किमेवमकस्मादस्माननिविकटाभिरत्यन्ताप्रसिद्धाभिः कर्णाटगौडलाटभाषाभिर्भीषयते भवान् न हि वयं भवन्तं भीषयामहे किन्तु मधुमत्यादिपदार्थव्युत्पादनेन तोषयामः । ततश्चाकुतोभयेन भवता श्रूयतामवधानेन ॥ ११२ ॥

तत्र मधुमती नामाभ्यासवैराग्यादिवशादपास्तरजस्तमोलेश-
सुखप्रकाशमयसत्त्वभावनयानवद्यवैशारद्यविद्योतनरूपऋतम्भर-

प्रज्ञाख्यासमाधिसिद्धिः । तदुक्तम् ऋतम्भरा तत्र प्रज्ञेति । ऋतं सत्यं बिभर्त्ति कदाचिदपि न विपर्य्ययेणाच्छाद्यते तत्र स्थितौ दार्ढ्यें सति द्वितीयस्य योगिनः सा प्रज्ञा भवतीत्यर्थः ११३

उनमें अभ्यास और वैराग्य वशतः रजः तमोलेश अपास्त और सुख प्रकाशमय सत्व-भावनाका उदय होनेसे, अनवद्य वैशारद्य विद्योतनस्वरूप जो ऋतम्भरा नामकी प्रज्ञा समाधि सिद्ध होती है उसका नाम मधुमती है । ऋतशब्दसे सत्य, एवं उसको भरण करती है या नहीं कभी विपर्य्ययक्रमसे आच्छादन नहीं करती, इस अर्थमें ऋतम्भर हुआ है । उसमें स्थितिक्रमसे दार्ढ्य समुत्पन्न होनेपर द्वितीय योगीका उस प्रज्ञाका सञ्चार होता है । इसका अर्थ है ॥ ११३ ॥

चत्वारः खलु योगिनः प्रसिद्धाः प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रान्तभावनीयश्चेति । तत्राभ्यासी प्रवृत्तिमात्रज्योतिः प्रथमः । न त्वनेन परचित्तादिगोचरज्ञानरूपं वै ज्योतिर्वशीकृतमित्युक्तं भवति । ऋतम्भरप्रज्ञो द्वितीयः । भूतेन्द्रियजयी तृतीयः । परवैराग्यसम्पन्नश्चतुर्थः ॥ ११४ ॥

योगी चारप्रकारके हैं, जैसे, प्रथमकल्पिक मधुभूमिक, प्रज्ञाज्योतिः, एवं अतिक्रान्त भावनीय । इनमें अभ्यासी प्रवृत्तिमात्र ज्योतिः प्रथम है । इनकेद्वारा परचित्तादि गोचर (दूसरेके मनकी बात जानना) ज्ञानरूप ज्योतिः वशीकृत नहीं होता । इसप्रकार कहा गया है । ऋतम्भरा प्रज्ञाका नाम द्वितीययोगी. भूतेन्द्रियजयी तृतीययोगी एवं पर वैराग्य संपन्न चतुर्थयोगी है ॥ ११४ ॥

मनोजवीत्यादयो मधुप्रतीकसिद्धयः । तदुक्तं मनोजवित्वं विकरणाभावः प्रधानजयश्चेति । मनोजवित्वं नाम कायस्य मनोवदुत्तमो गतिलाभः । विकरणाभावः कायनिरपेक्षाणामिन्द्रियाणामभिमतदेशकाल विषयापेक्षवृत्तिलाभः । प्रधानजयः प्रकृतिविकारेषु सर्वेषु वशित्वम् ॥ ११५ ॥

एताश्च सिद्धयः करणपञ्चकस्वरूपजयात् तृतीयस्य योगिनः प्रादुर्भवन्ति । यथा मधुन एकदेशोऽपि स्वदते तथा प्रत्येकमेव ताः सिद्धयः स्वदन्त इति मधुप्रतीका सर्वभावाद्यधिष्ठातृत्वादिरूपा विशोका सिद्धिः । तदाह, सत्त्वपुरुषान्यताख्यातिमात्रप्रतिष्ठस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञत्वं चेति । सर्वेषां व्यवसायाव्यवसायात्मकानां गुणपरिणामरूपाणां भावानां स्वामिवदाक्रमणं सर्वभावाधिष्ठातृत्वं तेषामेव शान्तोदिताव्यपदेश्यधर्मित्वेन स्थितानां विवेकज्ञानं सर्वज्ञातृत्वम् । तदुक्तं विशोका वा ज्योतिष्मतीति ॥ ११६ ॥

ये सब सिद्धि करणपञ्चकस्वरूप जयवशतः आस्वादन कियाजाता है, उसीप्रकार इन सब सिद्धियोंमें प्रत्येक ही आस्वादित होती हैं । यह मधुमती प्रतीकाही विशोका नामक सिद्धि है । वह सर्व्वभाव वादिके अधिष्ठातृत्व आदि रूप आदिस्वरूप है । उसीप्रकार कहा है, सत्त्व पुरुषान्यताख्याति मात्रमें प्रतिष्ठित होनेपर, सर्व्वभावाधिष्ठातृत्व और सर्व्वज्ञत्व समुत्पन्न होता है । इनमें व्यवसाय और अव्यवसाय ये उभयात्मक गुणका परिणाम स्वरूप सब भावोंका प्रभुतुल्य आक्रमणको सर्वभावाधिष्ठातृत्व कहते हैं, एवं उन्हीं सबको विवेकज्ञानको सर्वज्ञातृत्व कहते हैं ॥ ११६ ॥

सर्ववृत्तिप्रत्यस्तमये परं वैराग्यमाश्रितस्य जात्यादिबीजानां क्लेशानां निरोधसमर्थो निर्बीजः समाधिः असम्प्रज्ञातपदवेदनीयः संस्कारशेषताव्यपदेश्यः चित्तस्यावस्थाविशेषः । तदुक्तं, विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्य इति ॥ ११७ ॥

एवञ्च सर्वतो विरज्यमानस्य तस्य पुरुषधौरेयस्य क्लेशबीजानि च निर्दग्धशालिबीजकल्पानि प्रसवसामर्थ्यविधुराणि मनसा सार्द्धं प्रत्यस्तं गच्छन्ति । तदेतेषु प्रलीनेषु निरुपप्रवातिक-

ख्यातिपरिपाकवशात् कार्य्यकारणात्मकानां प्रधाने लयः चितिशक्तिस्वरूपप्रतिष्ठा पुनर्बुद्धिसत्ताभिसम्बन्धविधुरा कैवल्यं लभेत इति । सिद्धिद्वयी च मुक्तिरुक्ता पतञ्जलिना । पुरुषार्थशून्यानां प्रतिप्रसवस्वरूपप्रतिष्ठा वा चितिशक्तिरिति॥११८॥

इसप्रकार सर्व्वतः विरागसम्पन्न है उसी पुरुषधौरेयका क्लेशबीज समस्त निर्दग्ध शालिबीज सदृश, प्रसव सामर्थ्यहीन होकर मनके अस्तमित होता है । ये सब लीन होनेपर तत्पातरहित विवेकख्यातिके परिपाकवशांतः कार्य्य कारणात्मक भावसमूह प्रधानमें लय प्राप्त होता है । तत्काल चितिशक्तिस्वरूप प्रतिष्ठाभी पुनः बुद्धिसत्ताभि सम्बन्धशून्य होनेपर कैवल्य लाभ होता है पतञ्जलिने दोनों सिद्धियोंको मुक्ति कहा है । जैसे पुरुषार्थ शून्य आदिके प्रति प्रसवस्वरूप प्रतिष्ठा अथवा चितिशक्ति इत्यादि ॥ ११८ ॥

न चास्मिन् सत्यपि कस्मान्न जायते जन्तुरिति वदितव्यं कारणाभावात् कार्य्याभाव इति प्रमाणसिद्धार्थे नियोगानुयोगयोरयोगात् । अन्यथा कारणाभावेऽपि कार्य्यसम्भवे मणिवेधादयोऽन्धादिभ्यो भवेयुः तथाचानुपपन्नार्थतायामाभाणको लौकिक उपपन्नार्थो भवेत् । तथाच श्रुतिः, अन्धोमणिमविन्दत् अविध्यत् तमनंगुलिरावयत् गृहीतवान् अग्रीवः प्रत्यमुञ्चत् पिनद्धवान् तमजिह्वो वा असंस्तुत अभ्यपूजयत् स्तुतवानिति यावत्॥११९॥

इस कारणसेभी किसकारण जन्तुओंका जन्म नहीं होता ऐसा कहा नहीं जासकता। क्योंकि, कारणाभावसे कार्य्याभाव, इत्यादि प्रमाणसिद्धविषयमें नियोग और अनुयोग दोनोंका अयोग होता है अन्यथा कारणाभावमेंभी कार्य्यसम्भव होनेसे अन्धा आदिभी मणिवेध करसकता । इसीप्रकार श्रुतिने कहा है. अन्धेने मणिवेध किया । जिसकी अंगुली नहीं, उसने उसको ग्रहण किया । जिसकी ग्रीवा नहीं उसने उसे पहना । जिसको जिह्वा नहीं उसने उसकी प्रशंसा की इत्यादि । ११९ ।

एवमिदं चिकित्साशास्त्रवद्योगशास्त्रं चतुर्व्यूहम् । यथा चिकित्साशास्त्रं रोगो रोगहेतुरारोग्यं भैषज्यमिति तथेदमपि संसारः संसारहेतुर्मोक्षो मोक्षोपाय इति । तत्र दुःखमयः संसारो हेयः प्रधानपुरु-

षयोः संयोगो हेयभोगहेतुः तस्यात्यन्तिकी निवृत्तिर्हानं तदुपायः सम्यग् दर्शनम् । एवमन्यदपि शास्त्रं यथासम्भवं चतुर्व्यूहमूहनीयमिति सर्वमवदातम् ॥ १२० ॥

इति सर्वदर्शनसंग्रहे पातञ्जलदर्शनम् ॥ १५ ॥

इसप्रकार चिकित्साशास्त्रवत् योगशास्त्र चतुर्व्यूह है । रोग, रोगहेतु, आरोग्य और भैषज्य, इन्हीं चारको लेकर जैसे चिकित्सा शास्त्र, उसीप्रकार, संसार, हेतु, मोक्ष और मोक्षोपाय इन चारोंको लेकर योगशास्त्र कल्पित हुआ है । उनमें दुःखमय संसार हेय प्रधान पुरुषका संयोग वही हेय भोगका हेतु, उसकी अत्यन्तिकी निवृत्ति होना एवं उसका उपाय सम्यग् दर्शन है । इसप्रकार अन्यान्य शास्त्र सबभी यथासम्भव चार व्यूहरूपसे विचार लेना इसके आगे सब दर्शनोंमें शिरोमणिस्वरूप शाङ्करदर्शन अन्यत्र लिखा गया इसकारण यहां उसकी उपेक्षा की गयी ॥ १२० ॥

इति सर्वदर्शनसंग्रहे पातञ्जलदर्शन समाप्त हुआ ॥ १५ ॥

इति सर्वदर्शनसंग्रहग्रन्थ समाप्त

पुस्तक मिलनेका ठिकाना-खेमराज श्रीकृष्णदास,
अध्यक्ष-"श्रीवेङ्कटेश्वर" स्टीम्-यन्त्रालय-मुंबई.